॥ श्री जिनायनमः ॥

॥ सान्वय गूर्जरभाषांतरसहितं च ॥

# ॥ श्री वासुपूज्यचरित्रं ॥ आठमो भाग ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित हीरालाल हंसराज.

अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्वहक स्वाधिन राख्यां छे

सने १९२९ मूल्य रु. ७-०-० सां. १९८५

॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्रीवासुपूज्यचरित्रं प्रारभ्यते ॥ (भाग आठमो)

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतर कर्ता–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

सुध्यानानामसावद्यकृतां मौहूर्तिकं हृदि । यत्साम्यमाद्यं तच्छिक्षाव्रतं सामायिकाभिधम् ॥ ७०० ॥

अन्वयः–सुध्यानानां असावद्यकृतां हृदि यत् मौहूर्तिकं साम्यं तत् सामायिक अभिधं आद्यं शिक्षा व्रतं. ॥ ७०० ॥

अर्थः–उत्तम ध्यानवाळा, तथा पापकार्य नही करनारा, एवा मनुष्योना हृदयमां जे मुहूर्तवारसुधी समता रहेछे, तेने सामायिक नामनुं पेहेलुं शिक्षाव्रत ( जाणवुं. ) ॥ ७०० ॥

आभाति यतिधर्मश्रीक्षणखेलनभूमिका । दुरितोर्मिविरामाय व्रतं सामायिकं पुनः ॥ १ ॥

अन्वयः—पुनः यति धर्म श्री क्षण खेलन भूमिका सामायिकं व्रतं दुरित ऊर्मि विरामाय आभाति. ॥ १ ॥

अर्थः—वळी मुनिधर्मनी लक्ष्मीने नृत्य करवानी रंगभूमिसरखुं सामायिक व्रत, पापोना उछाळानी शांतिमाटे शोभेछे, (अर्थात् ते पापोना उछाळाने शांत करेछे.) ॥ १ ॥

मोक्षश्रीममतारम्भः समताभ्यासरङ्गभूः । करुणारससिन्धूर्मिराद्यं शिक्षाव्रतं मतम् ॥ २ ॥

अन्वयः—मोक्ष श्री ममता आरंभः, समता अभ्यास रंगभूः, करुणा रस सिंधु ऊर्मिः, आद्यं शिक्षा व्रत मतं. ॥ २ ॥

अर्थः—मोक्षलक्ष्मीनी ममताना आरंभसरखुं, अने समताने क्रीडा करवानी रंगभूमिसरखुं, तथा कृपारसना महासागरना मोजांसरखुं, पेहेलुं शिक्षाव्रत कहेलुं छे. ॥ २ ॥

क्रूराचारोऽपि संसारकारया मुच्यते द्रुतम् । केशरीव त्रुटत्कर्मदामा सामायिकव्रती ॥ ३ ॥

अन्वयः—सामायिक व्रती क्रूर आचारः अपि केशरी इव त्रुटत् कर्म दामा द्रुतं संसार कारायाः मुच्यते. ॥ ३ ॥

अर्थः—सामायिक व्रतवाळो, मनुष्य क्रूर आचरणवाळो होवा छतां पण केशरी चोरनी पेठे कर्मोनी सांकळ तोडीने तुरत संसाररूपी केदखानामांथी छुटी जाय छे. ॥ ३ ॥

तथाहि शत्रुलोकाहिबर्हणः क्षीणगर्हणः । भूपोऽभूद्विजयो नाम धर्मी कामपुरे पुरे ॥ ४ ॥

अन्वयः—तथाहि—कामपुरे पुरे शत्रु लोक अहि बर्हिणः, क्षीण लोक गर्हणः, विजयो नाम धर्मी भूपः अभूत्. ॥ ४ ॥
अर्थः—ते केशरीचोरनुं उदाहरण कहे छे—कामपुरनामना नगरमां शत्रुओरूपी सर्पोनो ( नाश करवामां ) मयूरसरखो, तथा लोको तरफनी निंदाविनानो विजयनामनो धर्मिष्ट राजा हतो. ॥ ४ ॥

**तं श्रेष्ठी सिंहदत्ताख्यो नत्वाचख्यौ कदाचन । केशरी नाम मे स्वामिन्पुत्रोऽभूच्चौर्यभूरिति ॥ ५ ॥**

अन्वयः—कदाचन सिंहदत्त आख्यः श्रेष्ठी तं नत्वा इति आचख्यौ, (हे) स्वामिन्! केशरी नाम मे पुत्रः चौर्यभूः अभूत्.
अर्थः—एक दिवसे सिंहदत्तनामना शेठे ते राजाने नमीने एम कह्युं के हे स्वामी! केशरीनामनो मारो पुत्र चोरी करवामां आसक्त थयेलो छे. ॥ ५ ॥

**अथ स्थास्यसि मद्भूमौ यदि तद्वध्य एव मे । इति केशरिणं देशान्नरेशो निरकाशयत् ॥ ६ ॥**

अन्वयः—अथ यदि मद् भूमौ स्थास्यसि, तत् मे वध्यः एव, इति नरेशः देशात् केशरिणं निरकाशयत्. ॥ ६ ॥
अर्थः—हवे जो मारी भूमिमां तुं रहेशे, तो हुं तने मारीज नाखीश, एम ( कहीने ) राजाए ( पोताना ) देशमांथी ते केशरीने काहाडी मेल्यो. ॥ ६ ॥

**सोऽपि भूपभयाक्रान्तः श्रान्तो देशान्तरं व्रजन् । काप्यपश्यद्वने स्वच्छशीतस्वादुरसं सरः ॥ ७ ॥**

अन्वयः—भूप भय आक्रांतः सः अपि देशांतरं व्रजन् श्रांतः वने क्व अपि स्वच्छ स्वादु रसं सरः अपश्यत्. ॥ ७ ॥

अर्थः—राजाना भयथी डरेला ते केशरीए पण परदेशमां जतां थकां थाकीने वनमां क्यांक निर्मल अने स्वादिष्ट जलथी भरेलुं तळाव जोयुं. ॥ ७ ॥

**अचोर्याहृतमाशक्तेर्न पयोऽपि पपे मया । अहो कार्यं तदप्यद्य धिग्धिग्दैवविपर्ययम् ॥ ८ ॥**

**इति ध्यायन्नयं तत्र श्रान्तः कान्तारपल्वले । चौरश्चक्रे पयःपानं स्नानं च विदधेऽधिकम् ॥ ९ ॥ युग्मम् ॥**

अन्वयः—आशक्तेः अचौर्य आहृतं पयः अपि मया न पपे, अहो! अद्य तत् अपि कार्यं, दैव विपर्ययं धिक्धिक् ॥ ८ ॥ इति ध्यायन् श्रांतः अयं चौरः तत्र कांतार पल्वले पयः पानं चक्रे, च अधिकं स्नानं चक्रे. ॥ ९ ॥ युग्मं ॥

अर्थः—शक्ति होय त्यांसुधी चोरीथी नही मेळवेलुं जल पण में पीधुं नथी, अरे! आजे तेम पण करवुं पडशे, माटे दैवना विपरीतपणाने धिक्कार छे! धिक्कार छे! ॥ ८ ॥ एम विचारतां थाकी जवाथी ते चोरे त्यां ते वनमां रहेलां तळावमांथी जलपान कर्युं, तथा सारीरीते तेमां स्नान पण कर्युं. ॥ ९ ॥ युग्मं ॥

**निःसृत्य स गतश्रान्तिरारोहत्पालिशालिनम् । क्षुधाकुलः फलस्यूततरं चूततरुं ततः ॥ १० ॥**

अन्वयः—ततः गत श्रांतिः सः निःसृत्य क्षुधा आकुलः पालि शालिनं, फल स्यूततरं चूत तरुं आरोहत् ॥ १० ॥

अर्थ—पछी थाक उतर्याबाद ते त्यांथी निकळीने क्षुधातुर थवाथी ( ते तळावनी ) पाळपर रहेला तथा फलद्रुप थयेला आंबाना वृक्षपर चड्यो. ॥ १० ॥

फलैस्तृप्तस्ततो दृप्तः स चिन्तां क्लृप्तवानिति । हहा मम किमद्याहर्विना चौर्येण यास्यति ॥ ११ ॥

अन्वयः–ततः फलैः तृप्तः दृप्तः सः इति चिंतां क्लृप्तवान्, हहा! किं चौर्येण विना अद्य मम अहः यास्यति? ॥ ११ ॥

अर्थः–पछी फलोथी तृप्त थइ उन्मत्त थयेलो ते केशरी एवी चिंता करवा लाग्यो के, अरेरे! शुं चोरीविनाज आजनो मारो दिवस जशे? ॥ ११ ॥

इति चिन्तापरे तत्र मन्त्रसाधितपादुकः । उत्ततार सरस्तीरे कोऽपि योगीश्वरोऽम्बरात् ॥ १२ ॥

अन्वयः—इति चिंता परे मंत्र साधित पादुकः कः अपि योगीश्वरः अंबरात् तत्र सरः तीरे उत्ततार. ॥ १२ ॥

अर्थः–एरीते ते चिंता करतो हतो, एवामां मंत्रसिद्ध पावडीओवाळो कोइक योगींद्र आकाशमांथी ते तळावना किनारापर उतर्यो.

स व्योमगमनासन्नतपनातपतापितः । दत्वा दिक्षु दृशं मुक्त्वा पादुके उदकेऽविशत् ॥ १३ ॥

अन्वयः–व्योम गमन आसन्न तपन आतप तापितः सः दिक्षु दृशं दत्वा, पादुके मुक्त्वा उदके अविशत्. ॥ १३ ॥

अर्थः–आकाशगमन करवाथी नजीकमां रहेला सूर्यना तापथी तप्त थयेलो ते योगीराज दिशाओतरफ नजर करीने, तथा पावडीओ मूकीने जळमां दाखल थयो. ॥ १३ ॥

वेद्मीदं पादुकाद्वन्द्वमस्याकाशगतौ क्षमम् । यदेतदिह मुक्त्वासौ पद्भ्यामेव जलेऽविशत् ॥ १४ ॥

**तदेतच्चोरयामीति ध्यात्वोत्तीर्य द्रुतं द्रुमात् । पादुके पादयोः क्षिप्त्वा चौरोऽगाद्गगनाध्वना ॥१५॥ युग्मं**

अन्वयः—वेद्मि, अस्य इदं पादुका द्वंद्वं आकाश गतौ क्षमं, यत् असौ इह एतत् मुक्त्वा पद्भ्यां एव जले अविशत्, ॥ १४ ॥ तत् एतत् चोरयामि, इति ध्यात्वा, द्रुतं द्रुमात् उत्तीर्य, पादुके पादयोः क्षिप्त्वा चौरः गगन अध्वना अगात्. ॥ १५ ॥ युग्मं ॥

अर्थः—हुं एम धारुं छुं के, आनी आ बन्ने पावडीओ आकाशगमन करवामां समर्थ छे, केमके आ योगी अहीं ते पावडीओ मूकीने पगोवडेज जलमां दाखल थयो छे, ॥ १४ ॥ माटे आ पादुकाने चोरीलेउं, एम विचारीने तुरत वृक्षपरथी उतरीने, तथा पगमां ते पावडीओ पेहेरीने ते केशरीचोर आकाशमार्गे चाल्यो गयो. ॥ १५ ॥ युग्मं ॥

**स निर्गम्य दिनं क्वापि नक्तं तत्पादुकापदः । चिन्तासमानसमयं व्योम्ना धाम्नि ययो निजे ॥ १६ ॥**

अन्वयः– सः चिंता समान समयं दिनं क्व अपि निर्गम्य, तत् पादुका पदः नक्तं व्योम्ना निजे धाम्नि ययौ. ॥ १६ ॥

अर्थः–पछी ते केशरी चिंतातुर समयवाळा ते दिवसने क्यांक वीताडीने, ते पावडीओ पगमां पहेरीने रात्रिए आकाशमार्गे पोताने घेर गयो. ॥ १६ ॥

**राज्ञे विज्ञप्य चौरं मां त्वं पुरान्निरकाशयः । इत्युक्त्वाताडयद्दण्डैः पितरं नितरामसौ ॥ १७ ॥**

अन्वयः—राज्ञे मां चौरं विज्ञप्य त्वं पुरात् निरकाशयः, इति उक्त्वा असौ दंडैः पितरं नितरां अताडयत् . ॥ १७ ॥

अर्थः—राजाप्रते मने चोरतरीके जाहेर करीने तें नगरमांथी देशनिकाल कराव्यो छे, एम कहीने ते केशरीए लाकडीओवडे

(पोताना) पिताने बहुज मार्यो. ॥ १७ ॥

**परासुं पितरं त्यक्त्वा महर्द्धीनि गृहाणि सः । प्रविवेश पदार्थौघं सारं सारं जहार च ॥ १८ ॥**

अन्वयः—परासुं पितरं त्यक्त्वा सः महर्द्धीने गृहाणि प्रविवेश, च सारं सारं पदार्थ ओघं जहार. ॥ १८ ॥

अर्थः—(पछी) मरण पामेला पिताने तजीने ते केशरीचोर महान् समृद्धिवाळां घरोमां दाखल थयो, अने त्यांथी तेणे सारी सारी किमती वस्तुओना समूहनी चोरी करी. ॥ १८ ॥

**अन्त्ये यामे त्रियामायाः स समायातवान्पुनः । सरोवरं तदेवाशु दुर्गमारण्यमण्डनम् ॥ १९ ॥**

अन्वयः—पुनः त्रियामायाः अंत्ये यामे सः दुर्गम अरण्य मंडनं, तत् एव सरोवरं आशु समायातवान्. ॥ १९ ॥

अर्थः—पछी रात्रिने छेल्ले पहोरे ते केशरीचोर, अगोचरवनने शोभावनारा तेज सरोवरपासे तुरत आव्यो. ॥ १९ ॥

**नित्यमित्ययमुद्दामक्रौर्यश्चौर्यलसद्रसः । तदेव नगरं गत्वालुण्टद्विविधलुण्टनः ॥ २० ॥**

अन्वयः–इति उद्दाम क्रौर्यः, चौर्य लसत् रसः, विविध लुंटनः, अयं नित्यं तत् एव नगरं गत्वा अलुंटत्.

अर्थः–ए रीते अत्यंत निर्दय, अने चोरी करवामां रसवाळो, तथा नाना प्रकारनी लुंट चलावनारो ते केशरीचोर हमेशां तेज नगरमां जइने लुंटफाट करवा लाग्यो. ॥ २० ॥

**लोकं साधुसतीमुख्यं संतापयति पापिनि । यमागम इव भियेऽभवत्तत्र निशागमः ॥ २१ ॥**

अन्वयः—पापिनि साधु सती मुख्यं लोकं संतापयति, तत्र निशा आगमः यम आगमः इव भिये अभवत्. ॥ २१ ॥

अर्थः—ते पापी चोर मुनिओ तथा सतीओआदिक लोकोने संताप उपजावतो होवाथी त्यां रात्रिनुं आगमन, यमना आगमन- नीपेठे भयानक थइ पड्युं. ॥ २१ ॥

**तत्स्वरूपं परिज्ञाय राज्ञाथ व्यथितात्मना । परिपृष्टः पुरीरक्षो वैलक्ष्यन्यग्मुखोऽवदत् ॥ २२ ॥**

अन्वयः—अथ तत् स्वरूपं परिज्ञाय व्यथित आत्मना राज्ञा परिपृष्टः पुरी रक्षः वैलक्ष्य न्यग्मुखः अवदत्. ॥ २२ ॥

अर्थः–पछी ते हकीकत जाणीने मनमां खेद पामेला ते राजाए पूछवाथी नगरीनो रक्षक कोटवाल विलखो थइ नीचुं मुख करी कहेवा लाग्यो के, ॥ २२ ॥

**प्रभो नभोऽध्वगः कोऽपि पुरं मथ्नात्यदः सदा । न चौरचरणन्यासः क्वापि चाप्यत यद् भुवि ॥ २३ ॥**

अन्वयः-(हे) प्रभो! कः अपि नभः अध्वगः सदा अदः पुरं मथ्नाति, यत् भुवि क्व अपि चौर चरण न्यासः न च आप्यत.

अर्थः–हे! स्वामी! कोइक पण आकाशगामी चोर हमेशां आ नगरमां रंजाड करे छे, केमके जमीनपर क्यांयें पण चोरना पगलां मळतां नथी. ॥ २३ ॥

**ततः क्षितिपतिः कोपसंतप्तं लोचनद्वयम् । व्यथातुरः पुरप्रेक्षाकृपाश्रुषु निमज्जयन् ॥ २४ ॥**

**तपोधनतपःशीलवतीशीलप्रभावतः । तत्क्लेशसोद्यमः सोऽद्य मम चौरोऽस्तु गोचरः ॥ २५ ॥**

**इत्युक्त्वाल्पपरीवारः पुरीमयमलोकत । प्रत्यास्थानं प्रतिद्यूताश्रयं प्रतिसुरालयम् ॥२६॥ त्रिभिर्विशेषकम्**

अन्वयः—ततः व्यथा आतुरः क्षितिपतिः कोप संतप्त लोचन द्वयं पुर प्रेक्षा कृपा अश्रुषु निमज्जयन्. ॥ २४ ॥ तपः धन तपः शीलवती शील प्रभावतः तत् क्लेश सोद्यमः सः चौरः अद्य मम गोचरः अस्तु ? ॥२५॥ इति उक्त्वा अल्प परीवारः अयं प्रति आस्थानं, प्रति द्यूताश्रयं प्रतिसुरालयं पुरीं अलोकत. ॥ २६ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी चिंतातुर थयेलो ते राजा क्रोधथी तपेलां बन्ने चक्षुओने नगरमां तपास करवामाटेनी दयावाळां आंसुओमां भींजावतोथको, ॥ २४ ॥ तपस्वीओनी तपस्या, तथा शीलवंतीओना शीलना प्रभावथी, तेओने कष्ट आपवामां उद्यमी थयेलो ते चोर आजे मने दृष्टिगोचर थाओ ? ॥२५॥ एम कहीने स्वल्प परिवारवाळो ते राजा दरेक सभास्थानोमां, दरेक जुगारखानामां, तथा दरेक देवमंदिरोमां नगरनी अंदर तपास करवा लाग्यो. ॥ २६ ॥ त्रिभिर्विशेषकं ॥

**चौरचिह्नं क्वचित्किंचिदप्यनालोकयन्नृपः । जगामाक्षामसंकल्पः पुरीपरिसरावनिम् ॥ २७ ॥**

अन्वयः—कचित् किंचित् अपि चौर चिह्नं अनालोकयन्, अक्षाम संकल्पः नृपः पुरी परिसर अवनिं जगाम. ॥ २७ ॥

अर्थः—क्यांये कंइ पण चोरनुं चिह्न न जोवाथी अति चिंतातुर थयेलो ते राजा नगरनी आसपासनी भूमिपर (तपासमाटे) गयो.

**वापीकूपतडागादिस्थानेष्वपि निरूपयन् । न प्राप भूपतिः कापि चौरसंचारचेष्टितम् ॥ २८ ॥**

अन्वयः—वापी कूप तडाग आदि स्थानेषु निरूपयन् अपि भूपतिः क्व अपि चौर संचार चेष्टितं न प्राप. ॥ २८ ॥

अर्थः—वाव, कूवा, तथा तळाव आदिक स्थानोमां तपास करतां छतां पण राजा क्यांयें पण ते चोरना पगलांनुं चिन्ह मेळवी शक्यो नही. ॥ २८ ॥

**मध्याह्नेऽथ धरानेतुर्वनान्तर्भुवि तस्थुषः । नासामासादयद्गन्धः कर्पूरागुरुधूपभूः ॥ २९ ॥**

अन्वयः—अथ मध्याह्ने वनांतः भुवि तस्थुषः धरानेतुः नासां कर्पूर अगुरु धूपभूः गंधः आसादयत्. ॥ २९ ॥

अर्थः—एवामां मध्याह्नसमये वननी अंदरनी भूमिपर रहेला ते राजानी नासिकामां कपूर, अने अगुरुना धूपनी सुगंधि आववा लागी.

**व्रजन्गन्धानुसारेण चण्डिकागारमासदत् । चम्पकाद्यर्चितां तस्मिन्नपश्यच्चण्डिकां नृपः ॥ ३० ॥**

अन्वयः—गंध अनुसारेण व्रजन् नृपः चंडिका आगारं आसदत्, तस्मिन् चंपक आदि अर्चितां चंडिकां अपश्यत्. ॥ ३० ॥

अर्थः—ते सुगंधने अनुसारे जतो राजा चंडिकादेवीना मंदिरमां आव्यो, अने त्यां चंपकनां (पुष्पो) आदिकथी पूजन करेली चंडिकादेवीनां तेणे दर्शन कर्यां. ॥ ३० ॥

**उन्मुच्य धूपनं तादृग्भूपमभ्याययो ततः । संयोजितकरः पूजाकरः प्रवरचीवरः ॥ ३१ ॥**

अन्वयः—ततः तादृक् धूपनं उन्मुच्य प्रवर चीवरः पूजा करः संयोजित करः भूपं अभ्याययौ. ॥ ३१ ॥

अर्थः—पछी तेवीरीतनो धूप (करवानुं) छोडीने उत्तम वस्त्रधारी ते (देवीनो) पूजारी हाथ जोडीने राजापासे आव्यो. ॥ ३१ ॥

**केनोत्सवेन केनेदृक्चण्डीपूजाद्य कारिता । दत्तानि द्युतिदूनेन्दुभांसि वासांसि केन ते ॥ ३२ ॥**

अन्वयः–अद्य केन उत्सवेन केन ईदृक् चंडी पूजा कारिता? द्युति दून इंदु भांसि वासांसि ते केन दत्तानि? ॥ ३२ ॥

अर्थः–(त्यारे राजाए तेने पूछ्युं के) आजे कया उत्सवमाटे? अने कोणे आवी चंडिकानी पूजा करावी छे? अने कांतिथी चंद्रना तेजने पण जीतनारां (आ) वस्त्रो तने कोणे आप्यां? ॥ ३२ ॥

**इति पृच्छति भूजानौ पूजाकारी जगाद सः । दुःस्थान्वयस्य मे स्वामिन्भक्त्या तुष्टाद्य चण्डिका ॥३३॥**

अन्वयः–इति भूजानौ पृच्छति सः पूजाकारी जगाद, हे स्वामिन्! दुःस्थ अन्वयस्य मे भक्त्या अद्य चंडिका तुष्टा. ॥ ३३ ॥

अर्थः–एरीते राजाए पूछवाथी ते पूजाराए कह्युं के, हे स्वामी! दरिद्र कुलमां जन्मेला एवा मारापर भक्तिथी हमणा चंडिका तुष्टमान थइ छे. ॥ ३३ ॥

**प्रगे पूजार्थमायामि यदा नित्यं लभे तदा । देव्याः पादाग्रवर्तीनि रत्नानि कनकानि च ॥ ३४ ॥**

अन्वयः–प्रगे यदा पूजार्थं आयामि, तदा नित्यं देव्याः पाद अग्र वर्तीनि रत्नानि च कनकानि लभे. ॥ ३४ ॥

अर्थः—प्रभातमां ज्यारे पूजामाटे हुं आवुं छुं, त्यारे हमेशां आ देवीना चरणोपासे रहेलां रत्नो तथा सोनाम्होरो मने मळे छे.

**एवं देवीं त्रिकालं तत्पूजयामि जयामि च । तत्प्रसादोत्थनिःशेषश्रीपूरः श्रीदमप्यहम् ॥ ३५ ॥**

अन्वयः–तत् एवं त्रिकालं देवीं पूजयामि, च तत् प्रसाद उत्थ निःशेष श्रीपुरः अहं श्रीदं अपि जयामि. ॥ ३५ ॥

अर्थः–माटे एरीते हुं त्रणे काल आ देवीनुं पूजन करुं छुं, अने तेणीनी कृपाथी मळेली समस्त प्रकारनी लक्ष्मीना समूहवाळो थयोथको हुं कुबेरने पण जीती जाउं छुं. ॥ ३५ ॥

**नक्तं चौरागमं तत्र सुधीर्निश्चित्य तद्गिरा । ययौ वासरकृत्यार्थमावासं वासवो भुवः ॥ ३६ ॥**

अन्वयः–सुधीः भुवः वासवः तत् गिरा तत्र नक्तं चौर आगमं निश्चित्य वासर कृत्य अर्थं आवासं ययौ. ॥ ३६ ॥

अर्थः–ते महाबुद्धिवान राजा तेना वचनथी रात्रिए त्यां ते चोरना आगमननो ( मनमां ) निश्चय करीने दिवससंबंधि कार्यमाटे पोताने स्थानके गयो. ॥ ३६ ॥

**नक्तं सारपरीवारश्चण्डिकागारमागतः । न्यस्य दूरे नृपः शूरानिहैकः स्वयमास्थितः ॥ ३७ ॥**

अन्वयः–नक्तं सार परीवारः नृपः चंडिका आगारं आगतः, शूरान् दूरे न्यस्य, इह स्वयं एकः आस्थितः. ॥ ३७ ॥

अर्थः–( पछी ) रात्रिए मजबूत परीवारवाळो ते राजा ते चंडिकादेवीना मंदिरमां आव्यो, तथा सुभटोने दूर राखीने, ते पोते एकाकी अंदरना भागमां रह्यो. ॥ ३७ ॥

**निशीथे स्तम्भगुप्ताङ्गो भूभुजङ्गस्ततोऽम्बरात् । उत्तीर्णं पादुकासिद्धं तमालोकत तस्करम् ॥ ३८ ॥**

अन्वयः–ततः निशेथे स्तंभ गुप्त अंगः भू भुजंगः, अंबरात् उत्तीर्णं पादुका सिद्धं तं तस्करं आलोकत. ॥ ३८ ॥

अर्थः-पछी मध्यरात्रिए स्तंभनी पाछळ गुप्त रहेला ते राजाए, आकाशमांथी उतरेला, तथा पावडीओवडे आकाशगमन करनारा ते चोरने दीठो. ॥ ३८ ॥

**पादुकाद्वयमादाय सोऽथ वामेन पाणिना । गत्वा गर्भगृहं चण्डीमानर्च मणिभिः शुभैः ॥ ३९ ॥**

अन्वयः-अथ सः पादुका द्वयं वामेन पाणिना आदाय गर्भ गृहं गत्वा शुभैः मणिभिः चंडीं आनर्च ॥ ३९ ॥

अर्थः—पछी ते केशरीचोरे ( पोतानी ) ते बन्ने पावडीओ डाबा हाथमां लेइने, तथा मूळगंभारमां जइने मनोहर मणिओवडे ते चंडिकादेवीनी पूजा करी. ॥ ३९ ॥

**जगौ च स्वामिनि स्वैरचारिणश्चौर्यकारिणः । स्यान्ममेयममेयर्द्धिदायिनी क्षणदा मुदे ॥ ४० ॥**

अन्वयः—च जगौ, (हे) स्वामिनि! स्वैर चारिणः, चौर्य कारिणः, मम इयं क्षणदा अमेय ऋद्धि दायिनी मुदे. ॥ ४० ॥

अर्थः-पछी तेणे कह्युं के, हे स्वामिनि! स्वेच्छाथी गमन करनारा, तथा चोरी करनारा, एवा मने आ रात्री अमाप समृद्धि देनारी तथा हर्ष आपनारी थाओ? ॥ ४० ॥

**इत्युक्त्वा वलमानोऽयं द्वारमारुह्य भूभुजा । कृपाणपाणिना जीवन् रे न यासीति धर्षितः ॥ ४१ ॥**

अन्वयः-इति उक्त्वा वलमानः अयं द्वारं आरुह्य कृपाण पाणिना भूभुजा, रे! जीवन् न यासि, इति धर्षितः. ॥ ४१ ॥

अर्थः—एम कहीने पाछा वळता एवा ते केशरीचोरने, दरवाजापर चडीने, हाथमां तलवार खेंचीने राजाए, अरे! हवे तुं

जीवतो जवानो नथी एम कही धमकाव्यो. ॥ ४१ ॥

**इति भाषिणि भूपाले तद्भालं प्रति कालवित्। पादुकाद्वयमेवायमस्त्रीकृत्य क्रुधामुचत् ॥ ४२ ॥**

अन्वयः—इति भूपाले भाषिणि, कालवित् अयं पादुका द्वयं एव अस्त्रीकृत्य तद्भालंप्रति क्रुधा अमुचत्. ॥ ४२ ॥

अर्थः-एरीते राजाए कह्यार्थी अवसर जाणनारा ते चोरे ते बन्ने पावडीओनेज शस्त्ररूप करीने ते राजाना ललाटप्रते क्रोधथी फेंकी.

**तद्घातवञ्चनव्यग्रे महीभुजि महाभुजः। अयं जीवन्व्रजामीति वदन्नेवैष निर्ययौ ॥ ४३ ॥**

अन्वयः—महीभुजि तद् घात वंचन व्यग्रे महाभुजः अयं एषः, जीवन् व्रजामि इति वदन् एव निर्ययौ. ॥ ४३ ॥

अर्थः—राजा ते प्रहारथी बचवामां व्याकुल थये छते ते महान् बाहुबलवाळो चोर "आ हुं जीवतो चाल्यो जाउं छुं" एम बोलतोथकोज (त्यांथी) निकळी गयो. ॥ ४३ ॥

**यात्यसौ केशरी चौर इति भूपगिरा भटाः। तमाशु दूरे नश्यन्तमन्वधावन्नृपाज्ञया ॥ ४४ ॥**

अन्वयः—असौ केशरी चौरः याति, इति भूप गिरा भटाः नृप आज्ञया, दूरे नश्यंतं तं आशु अन्वधावन. ॥ ४४ ॥

अर्थः—आ केशरी चोर नाशी जाय छे, एवां राजाना वचनथी सुभटो ते राजानी आज्ञाथी दूर नाशता एवा ते चोरनी पाछळ तुरत दोड्या. ॥४४ ॥

**चौरलोप्त्रावनीं गन्तुं मन्त्रिणे दिष्टशक्ति तत् । प्रदाय पादुकाद्वन्द्वं भूपोऽप्यनुययौ भटान् ॥४५॥**

अन्वयः—दिष्ट शक्ति तत् पादुका द्वयं मंत्रिणे प्रदाय भूपः अपि चौर लोप्त्र अवनीं गंतु भटान् अनुययौ. ॥ ४५ ॥

अर्थः—जणावेली छे शक्ति जेनी एवी ते बन्ने पावडीओ मंत्रीने सोंपीने राजा पण ते चोरनी चोरीनो माल संताडवानी जगोए जवामाटे ते सुभटोनी पाछळ गयो. ॥ ४५ ॥

**स तु चौरस्त्वरादूरमुक्तशूरसमुच्चयः । पुरग्रामान्तगैर्मार्गैरेवागात्पदगुप्तये ॥ ४६ ॥**

अन्वयः—सः चौरः तु त्वरा दूर मुक्त शूर समुच्चयः पद गुप्तये पुर ग्राम अंतगैः मार्गैः एव अगात् . ॥ ४६ ॥

अर्थः-ते चोर तो (पोताना) वेगथी सुभटोना समूहने (पाछळ) दूर छोडीने पगलां संताडवामाटे शेहेरो तथा गांवडांओना छेडा-परना मार्गोए थइनेज नाशवा लाग्यो. ॥ ४६ ॥

**भयाकुलितचित्तोऽसौ किंचिद्वैराग्यवांस्ततः । दध्यावित्यद्य मे पापमत्युग्रं फलितं ध्रुवम् ॥ ४७ ॥**

अन्वयः—ततः भय आकुलित चित्तः, असौ किंचित् वैराग्यवान् इति दध्यौ, ध्रुवं अद्य मे अति उग्रं पापं फलितं. ॥ ४७ ॥

अर्थः—पछी भयथी व्याकुल हृदयवाळो एवो ते केशरीचोर कंइंक वैराग्य पामवाथी एम विचारवा लाग्यो के, खरेखर आजे मारुं अति उग्र पाप प्रगटी निकल्युं छे. ॥ ४७ ॥

ग्रामारामावनौ क्वापि कस्यापि दिशतो मुनेः। ध्यानतत्त्वं वचश्चौरः श्रद्धयेत्यशृणोत्तदा ॥ ४८ ॥

अन्वयः—तदा क्व अपि ग्राम आराम अवनौ दिशतः कस्य अपि मुनेः इति ध्यान तत्त्वं वचः चौरः श्रद्धया अशृणोत्. ॥४८॥

अर्थः—एवामां क्यांक गामपासेना बगीचानी भूमिमां धर्मदेशना आपता कोइक मुनिराजनुं, एवी रीतनुं ध्याननना साररूप वचन ते चोरे श्रद्धाथी सांभळ्युं. ॥ ४८ ॥

सर्वत्र ध्यानसमतारुचिर्मुच्येत पातकैः । जनः सद्योऽपि तिमिरैः कृतदीप इवालयः ॥ ४९ ॥

इति हृन्मर्मनिर्मग्नं चौरस्तद्भावयन्वचः । वपुरुत्पुलकं बिभ्रदूर्ध्वस्तत्रैव तस्थिवान् ॥ ५० ॥ युग्मम् ॥

अन्वयः—कृत दीपः आलयः तिमिरैः इव, ध्यान समता रुचिः जनः सर्वत्र सद्यः पातकैः अपि मुच्येत. ॥ ४९ ॥ इति हृद् मर्म निर्मग्नं तद्वचः भावयन् चौरः उत्पुलकं वपुः बिभ्रत् तत्र एव उर्ध्वः तस्थिवान्. ॥ ५० ॥ युग्मं ॥

अर्थः—करेलो छे दीपक जेमां एवुं मकान जेम अंधकारथी मुक्त थाय छे, तेम ध्यानथी समभावमां रहेलो मनुष्य सर्व जगोए तुरत पापोथी पण मुक्त थाय छे. ॥ ४९ ॥ एरीते हृदयना मर्मस्थानमां प्राप्त थयेलां ते वचनने भावतो थको ते चोर रोमांचित शरीर धारण करतोथको त्यांज उभो थइ रह्यो. ॥ ५० ॥ युग्मं ॥

सारासाराखिलजगन्नुतिनिन्दावियुक्तधीः । तस्थौ मध्यस्थतामग्नः स भग्नदुरितक्रमः ॥ ५१ ॥

अन्वयः–सार असार अखिल जगत् नुति निंदा वियुक्त धीः, भग्न दुरित क्रमः, सः मध्यस्थता मग्नः तस्थौ. ॥ ५१ ॥

अर्थः–सारा नरसा समस्त जगतनी स्तुति अथवा निंदाथी रहित बुद्धिवाळो, तथा पापोनी श्रेणिने तोडी पाडनारो ते केशरीचोर मध्यस्थ भावना भावतोथको ( त्यां ) उभो रह्यो. ॥ ५२ ॥

**शेषां रात्रिं दिनं चास्थादेष साम्यलयस्तथा । यथा स्थिरं मनो लीनं पवित्रे परमात्मनि ॥ ५२ ॥**

अन्वयः–शेषां रात्रिं च दिनं एषः साम्य लयः तथा अस्थात्, यथा पवित्रे परमात्मनि लीनं मनः स्थिरं ॥ ५२ ॥

अर्थः–बाकी रहेली रात्रि तथा दिवससुधी ते समतामां लीन थइने एवीरीते रह्यो, के जेथी पवित्र परमात्ममां तेनुं मन लीन थइने स्थिर थइ गयुं. ॥ ५२ ॥

**घातिकर्मक्षये सायं ज्ञानं जज्ञेऽस्य केवलम् । सर्वत्रान्वेषयंस्तत्र तदा नृपतिरप्यगात् ॥ ५३ ॥**

अन्वयः—घाति कर्म क्षये सायं अस्य केवलं ज्ञानं जज्ञे, तदा नृपतिः अपि सर्वत्र अन्वेषयन् तत्र अगात्. ॥ ५३ ॥

अर्थः–घातिकर्मोनो क्षय थतां संध्याकाळे तेने केवलज्ञान उत्पन्न थयुं, एवामां ते राजा पण सर्व जगोए तेनी शोध करतोथको त्यां आवी पहोंच्यो. ॥ ५३ ॥

**इतश्चान्वपतद्भूपस्तं हन्तुं भटभारभाक् । इतश्चागान्मरुद्वर्गो नन्तुं दत्तव्रतध्वजः ॥ ५४ ॥**

अन्वयः-इतश्च भट भार भाक् भूपः तं हंतुं अन्वपतत्, इतश्च दत्त व्रत ध्वज, मरुत् वर्गः नंतुं आगात्. ॥ ५४ ॥

अर्थः-पछी एकतरफथी सुभटोनो समूह साथे लेइने राजा तेने मारवामाटे दोडी आव्यो, तथा बीजी तरफथी देवोनो समूह तेने धर्मध्वज आपीने वांदवा आव्यो. ॥ ५४ ॥

**सुरैः कृतं सुवर्णाब्जमासीने केशरिण्यथ । ते हन्तारोऽपि नन्तारो भूपप्रभृतयोऽभवन् ॥ ५५ ॥**

अन्वयः-अथ केशरिणि सुरैः कृतं सुवर्ण अब्जं आसीने ते भूप प्रभृतयः हंतारः अपि नंतारः अभवन्. ॥ ५५ ॥

अर्थः-पछी ते केशरीनामना केवली भगवान् देवोए रचेलां सुवर्णकमलपर बेठाबाद ते राजाआदिक हणनाराओ पण तेमने नमवावाळा थया. ॥ ५५ ॥

**दन्तांशुभिः सुभिक्षाणि कुर्वाणश्चन्द्ररोचिषाम् । स व्यधाद्देशनां पापतमसः पूर्णिमां मुनिः ॥ ५६ ॥**

अन्वयः-दंत अंशुभिः चंद्र रोचिषां सुभिक्षाणि कुर्वाण स मुनिः पाप तमसः पूर्णिमां देशनां व्यधात्. ॥ ५६ ॥

अर्थः-दांतोना किरणोवडे चंद्रना तेजोनो सुकाळ करनार ते मुनिराज पापोरूपी अंधकारनो (नाश करवा माटे, पूर्णिमासरखी धर्मदेशना आपवा लाग्या. ॥ ५६ ॥

**क्व तत्ते चरितं नाथ क्व चायं केवलोदयः । इति क्षितिभृता पृष्टस्ततो व्याचष्ट केवली ॥ ५७ ॥**

अन्वयः-ततः (हे) नाथ! ते तत् चरितं क? च क अयं केवल उदयः? इति क्षितिभृता पृष्टः केवली व्याचष्ट. ॥ ५७ ॥

अर्थः-पछी हे स्वामी! आपनुं ते आचरण क्यां? अने क्यां आ केवलज्ञाननी प्राप्ति? एम राजाए पूछवाथी ते केवली भगवान कहेवा लाग्या के, ॥ ५७ ॥

**राजन्नाजन्म तत्तादृक्पापभाजोऽप्यभून्मम । श्रीरियं मुनिवाग्लब्धसामायिकमनोलयात् ॥ ५८ ॥**

अन्वयः—(हे) राजन्! आ जन्म तत् तादृक् पापभाजः अपि मम, मुनिवाक् लब्ध सामायिक मनः लयात् इयं श्रीः अभूत्. ॥

अर्थः—हे स्वामी! छेक जन्मथी मांडीने तेवीरीतनां ते पापकार्यो करनारा एवा पण मने, मुनिमहाराजना वचनथी प्राप्त थयेला सामायिकरूप समभावमां मन लीन थवाथी, आ केवल ज्ञाननी लक्ष्मी मळी छे. ॥ ५८ ॥

**यद्वर्षकोटितपसामप्यच्छेद्यं तदप्यहो । कर्म निर्मूल्यते चित्तसमत्वेन क्षणादपि ॥ ५९ ॥**

अन्वयः—यत् कर्म वर्ष कोटि तपसां अपि अच्छेद्यं, तत् अपि अहो! चित्त समत्वेन क्षणात् अपि निर्मूल्यते ॥ ५९ ॥

अर्थः—जे कर्म क्रोडोगमे वर्षोना तपथी पण छेदाय नही, ते कर्म पण अहो! मननी समताथी क्षणवारमांज मूळमांथी छेदाइ जाय छे. ॥ ५९ ॥

**इति श्रुत्वा प्रमुदितो जगाम नगरीं नृपः । बोधयन्वसुधां सोऽपि विजहार महामुनिः ॥ ६० ॥**

अन्वयः—इति श्रुत्वा प्रमुदितः नृपः नगरीं जगाम, सः महामुनिः अपि वसुधां बोधयन् विजहार. ॥ ६० ॥

अर्थः—एम सांभळीने खुशी थयेलो ते राजा (पोताना) नगरमां गयो, तथा ते महा मुनिराज पण पृथ्वीपर बोध देता थका विहार करवा लाग्या. ॥ ६० ॥

**पितृघातकरे सर्वजनसंतापकारिणि । चौरेऽपि दत्तनिर्वाणं सेव्यं सामायिकं बुधैः ॥ ६१ ॥**

अन्वयः—पितृघात करे, सर्व जन संताप कारिणि, चौरे अपि दत्त निर्वाणं सामायिकं बुधैः सेव्यं. ॥ ६१ ॥

अर्थः–पिताना घात करनारा, तथा सर्व लोकोने संताप उपजावनारा एवा आ चोरने पण मोक्ष आपनारुं सामायिकव्रत विचक्षणोए सेववुं. ॥ ६१ ॥

॥ एरीते सामायिकव्रतना संबंधमां केशरिकेवलीनो कथा समाप्त थइ. ॥

क्रियते दिग्व्रते मानसंक्षेपो यो दिवानिशम् ॥ द्वितीयं तदिदं शिक्षाव्रतं देशावकाशिकम् ॥ ६२ ॥

अन्वयः—दिग्व्रते दिवानिशं यः मान संक्षेपः क्रियते, तत् इदं देशावकाशिकं द्वितीयं शिक्षा व्रतं. ॥ ६२ ॥

अर्थः—दिशीव्रतमां हमेशां ( रातदहाडो ) जे प्रमाणनो संक्षेप करवामां आवे, तेने आ देशावकाशिक नामनुं बीजुं शिक्षाव्रत कहे छे. ॥ ६२ ॥

देशावकाशिकं यावत्कुरुते श्रद्धया सुधीः । तदन्यत्रात्मनां तेनाभयं दत्तं भवेत्तदा ॥ ६३ ॥

अन्वयः—सुधीः श्रद्धया यावत् देशावकाशिकं कुरुते, तदन्यत्र आत्मनां तेन तदा अभयं दत्तं भवेत्. ॥ ६३ ॥

अर्थः—उत्तम बुद्धिवान माणस श्रद्धाथी ज्यांसुधी देशावकाशिक व्रत करे छे त्यांसुधी ते प्रदेशनी बहार वसनारा प्राणीओने तेणे त्यारे अभयदान आपेलुं कहेवाय छे. ॥ ६३ ॥

प्रभावादस्य नश्यन्ति विघ्नाः शुद्धात्मनामिह । सुमित्रस्येव जायन्ते परत्र च शुभश्रियः ॥ ३४ ॥

अन्वयः—अस्य प्रभावात् सुमित्रस्य इव शुद्ध आत्मनां इह विघ्नाः नश्यंति, च परत्र शुभश्रियः जायंते. ॥ ६४ ॥

अर्थः—ते व्रतना प्रभावथी सुमित्रनीपेठे निर्मल आत्मावाळा मनुष्योनां आ लोकमां विघ्नो नाश पामे छे, तथा परलोकमां उत्तम लक्ष्मी प्राप्त थाय छे. ॥ ६४ ॥

मुख्या पुरीततावस्ति भुवस्तिलकवत्पुरी । चन्द्रिकेति चतुर्वर्गश्रीनिरर्गलनागरा ॥ ६५ ॥

अन्वयः—भुवः तिलकवत् पुरी ततौ मुख्या, चतुः वर्ग श्री निरर्गल नागरा चंद्रिका इति पुरी अस्ति. ॥ ६५ ॥

अर्थः—पृथ्वीना तिलकनी पेठे नगरीओनी श्रेणिमां मुख्य, तथा धर्म आदिक चारे वर्गोनी शोभाथी भरेला नागरिकोवाळी चंद्रिकानामनी नगरी छे. ॥ ६५ ॥

**नासीरवीरश्वासोर्मिसमुड्डीनारिमण्डलः । तारापीड इति क्ष्मापस्तामपालयदुत्सवैः ॥ ६६ ॥**

अन्वयः—नासीर वीरश्वास ऊर्मि समुड्डीन अरिमंडलः, तारापीडः इति क्ष्मापः तां उत्सवैः अपालयत्. ॥ ६६ ॥

अर्थः—संग्राममां आवेला सुभटोना (फक्त) श्वासोश्वासना मोजांओथीज उडी गयेला छे शत्रुओना समूहो जेना, एवो तारापीडनामनो राजा ते नगरीनुं महोत्सवपूर्वक रक्षण करतो हतो. ॥ ६६ ॥

**तन्मन्त्री कीर्तिकुसुमं सुमित्राख्यः समन्ततः । विश्वसौरभ्यकृद्रेजे जिनभक्तिलताद्रुमः ॥ ६७ ॥**

अन्वयः—कीर्ति कुसुमं, समंततः विश्व सौरभ्यकृत्, जिन भक्ति लता द्रुमः सुमित्र आख्यः तत् मंत्री. ॥ ६७ ॥

अर्थः—कीर्तिरूपी पुष्पोवाळो, तथा चोतरफथी जगतने सुगंधि करनारो, अने जिनेश्वरप्रभुनी भक्तिरूपी वेलडीने वृक्षसरखो सुमित्रनामनो तेनो मंत्रि हतो. ॥ ६७ ॥

**शास्त्रमङ्गलदीपोद्यद्धाम्नि हृन्नामधामनि । यस्यालीनौ भुजस्तम्भतोरणे मतिविक्रमौ ॥ ६८ ॥**

अन्वयः—शास्त्र मंगल दीप उद्यत् धाम्नि, भुज स्तंभ तोरणे, यस्य हृद् नाम धामनि मति विक्रमौ आलीनौ. ॥ ६८ ॥

अर्थः—शास्त्रोरूपी मंगल दीवाथी उल्लसित तेजवाळां, तथा भुजाओरूपी स्तंभोना तोरणवाळां, एवां जेना हृदयरूपी मेहेलमां बुद्धि अने पराक्रम छुपाइने रह्यां हतां. ॥ ६८ ॥

**नृपतिर्नवतारुण्यः पुण्यकर्मपराङ्मुखः । उवाच सचिवाधीशं कदाचिद्वार्धकाञ्चितम् ॥ ६९ ॥**

अन्वयः-नव तारुण्यः नृपतिः पुण्य कर्म पराङ्मुखः, कदाचित् वार्धक अंचितं सचिव अधीशं उवाच. ॥ ६९ ॥

अर्थः—नवी उगती युवानीवाळा ते राजाए पुण्य कार्योनो तिरस्कार करीने एक दिवसे वृद्धावस्थाथी शोभता एवा ते मंत्रिराजने कह्युं के, ॥ ६९ ॥

**देवार्चास्वकरोद्दामदानव्याख्याश्रवादिभिः । धर्मकृत्यैर्वपुर्मन्त्रिन्किं मुधा बाध्यतेऽधुना ॥ ७० ॥**

अन्वयः-(हे) मंत्रिन्! देव अर्चा स्वकर उद्दाम दान व्याख्या श्रव आदिभिः धर्म कृत्यैः अधुना मुधा वपुः किं बाध्यते? ॥

अर्थः-हे मंत्रीश्वर! देवपूजा, पोताना हाथे म्होटुं दान, तथा धर्मकथाना श्रवण आदिक धर्मकार्योथी आ वृद्धावस्थामां फोकट तुं शरीरने शामाटे क्लेश आपे छे ? ॥ ७० ॥

**क एभिर्विफलैर्धर्मकर्मक्लेशैर्भवादृशः । जराक्रान्तमविश्रान्तमिति देहं दहत्यहो ॥ ७१ ॥**

अन्वयः-अहो एभिः विफलैः धर्म कर्म क्लेशैः भवादृशः कः जरा आक्रांतं देहं इति अविश्रांतं दहति? ७१ ॥

अर्थः-अहो! आवां निष्फल धर्मकार्योनां क्लेशथी ताराजेवो कयो माणस वृद्धावस्थाथी जीर्ण थयेलां शरीरने आवीरीते एकदम

बाळी मूके? ॥ ७१ ॥

**इत्युक्तः स्मितवक्त्रोऽयं मन्त्री धात्रीधवं जगौ । किं नृदेव त्वमप्येवमनौचित्येन भाषसे ॥ ७२ ॥**

अन्वयः-इति उक्तः स्मित वक्त्रः अयं मंत्री धात्री धवं जगौ, (हे) नृदेव! त्वं अपि एवं अनौचित्येन किं भाषसे? ॥ ७२ ॥

अर्थः-एम कहेवाथी मुखपर हास्य लावीने ते मंत्रीए राजाने कह्युं के, हे राजन्! तमो पण आवीरीते अयोग्यपणे केम बोलो छो?

**इच्छामि धर्मकृत्येषु त्वां कारयितुमुद्यमम् । मामपि त्वं तु किं नाथ निषेधयसि तेषु हा ॥ ७३ ॥**

अन्वयः—त्वां धर्मकृत्येषु उद्यमं कारयितुं इच्छामि, (हे) नाथ! त्वं तु हा! मां अपि तेषु किं निषेधयसि? ॥ ७३ ॥

अर्थः-(हुं तो) तमोने धर्मकार्योमां उद्यम करावबाने इच्छुं छुं, एवामां हे स्वामी! तमो तो उलटा अरेरे! मने पण ते धर्मकार्यो करतां केम अटकावो छो? ॥ ७३ ॥

**धर्मः किं विफलः स स्याद्यत्प्रसादेन धीधनैः । निर्विघ्नैः स्वर्गमोक्षाणामपि सौख्यमवाप्यते ॥ ७४ ॥**

अन्वयः-यत् प्रसादेन निर्विघ्नैः धी धनैः स्वर्ग मोक्षाणां अपि सौख्यं अवाप्यते, सः धर्मः किं विफलः स्यात्? ॥ ७४ ॥

अर्थः-जेनी कृपाथी विघ्नविनाश बुद्धिवानो स्वर्ग अने मोक्षनुं सुख पण मेळवी शके छे, ते धर्म शुं निष्फल थाय छे? ॥७४॥

**अथोचे सचिवो राज्ञा मम ज्ञापय मन्त्रिप । विघ्नोच्छित्याथ संपत्त्या प्रत्यक्षं धर्मजं फलम् ॥ ७५ ॥**

अन्वयः—अथ राज्ञा सचिवः ऊचे, (हे) मंत्रिप! विघ्न उच्छित्त्या अथ संपत्त्या मम प्रत्यक्षं धर्मजं फलं ज्ञापय? ॥ ७५ ॥

अर्थः—त्यारे राजाए मंत्रिने कह्युं के, हे मंत्रीश्वर! विघ्नोना विनाश पूर्वक संपत्ति आपनारुं धर्मनुं फल मने तुं प्रत्यक्ष देखाड? ॥

**इत्युक्तिभाजं राजानं सचिवस्तमुवाच सः। त्वं नाथोऽन्ये तु ते भृत्याः साक्षादेतद्धि तत्फलम् ॥ ७६ ॥**

अन्वयः—इति उक्ति भाजं तं राजानं सः सचिवः उवाच, त्वं नाथः, अन्ये तु ते भृत्याः, एतत् हि साक्षात् तत् फलं. ॥७६॥

अर्थः—एम बोलता ते राजाने ते मंत्रीए कह्युं के, तमो स्वामी छो, अने बीजाओ तमारा नोकर छे, एज खरेखर साक्षात् ते धर्मनुंज फल छे. ॥ ७६ ॥

**ततोऽमात्यं जगौ राजा पाषाणे द्विदलीकृते। भवत्येकेन सोपानं द्वितीयेन तु देवता ॥ ७७ ॥**

**तत्किं तस्यैकदेशेन धर्मश्चक्रे परेण न। सिद्धा स्वभावाद्विश्वस्य भव्याभव्यव्यवस्थितिः ॥ ७८ ॥**

अन्वयः—ततः राजा आमात्यं जगौ, पाषाणे द्विदली कृते, एकेन सोपानं, तु द्वितीयेन देवता, ॥ ७७ ॥ तत् तस्य एक देशेन किं धर्मः चक्रे? परेण न? स्वभावात् विश्वस्य भव्य अभव्य व्यवस्थितिः सिद्धा. ॥ ७८ ॥

अर्थः—त्यारे राजाए मंत्रीने कह्युं के एक पत्थरना बे टुकडा करीने, तेमाना एक टुकडाथी पगथीयुं कराय छे, अने बीजामांथी देवनी मूर्ति कराय छे, ॥ ७७ ॥ त्यारे तेना एक टुकडाए शुं धर्म कर्यो हतो? अने बीजे शुं धर्म न्होतो कर्यो? माटे स्वभावथीज जगतनी सारानरसानी व्यवस्था सिद्ध थयेली छे. ॥ ७८ ॥ युग्मं ॥

अथाह मन्त्री नाजीवो ग्रावात्र स्यान्निदर्शनम् । सति धर्मिणि धर्माणां स्थापना युज्यते ततः ॥ ७९ ॥

अन्वयः—अथ मंत्री आह, अत्र अजीवः ग्रावा निदर्शनं न स्यात्, ततः धर्मिणि सति धर्माणां स्थापना युज्यते ॥ ७९ ॥

अर्थः-त्यारे मंत्रीए कह्यु के, अहीं अजीवपदार्थरूप पत्थरनुं दृष्टांत संभवी शके नही, माटे धर्मी होते छते धर्मोनी स्थापना संभवी शके छे. ॥ ७९ ॥

इत्युक्तस्तं नृपः किंचित्सवैलक्ष्यस्मितोऽवदत् । अहं मन्त्रिन्वचःशक्त्या त्वया चक्रे निरुत्तरः ॥ ८० ॥

अन्वयः—इति उक्तः नृपः किंचित् वैलक्ष्य स्मितः तं अवदत्, (हे) मंत्रिन्! त्वया वचः शक्त्या अहं निरुत्तरः चक्रे. ॥ ८० ॥

अर्थः-एम कहेवाथी राजा कंइक विलखो पडी हास्य करी तेने कहेवा लाग्यो के, हे मंत्री! तें तो वचननी युक्तिवडे मने उत्तररहित करी दीधो. ॥ ८० ॥

परं प्रत्यक्षदृष्टेन प्रभावेणैव कुत्रचित् । निःसंशयं करिष्यामि धर्मं मन्त्रीश नान्यथा ॥ ८१ ॥

अन्वयः—परं (हे) मंत्रीश! कुत्रचित् प्रत्यक्ष दृष्टेन प्रभावेण एव निःसंशयं धर्मं करिष्यामि, अन्यथा न. ॥ ८१ ॥

अर्थः-परंतु हे मंत्रीश्वर! क्यांक प्रत्यक्ष जोयेला प्रभावथीज संशयरहित हुं धर्म आचरीश, ते शिवाय आचरीश नही. ॥ ८१ ॥

इति प्रायस्तयोर्नित्यं संलापः क्षत्रमन्त्रिणोः । अजायत प्रजामध्ये प्रसिद्धिमधुरोऽधिकम् ॥ ८२ ॥

अन्वयः-इति तयोः क्षत्र मंत्रिणोः नित्यं संलापः प्रायः प्रजा मध्ये अधिकं प्रसिद्धि मधुरः अजायत. ॥ ८२ ॥

अर्थः—एरीते ते राजा अने मंत्रिवच्चे हमेशां थतो संवाद मार्ये करीने प्रजानी अंदर अधिक प्रसिद्धिपात्र थइ पड्यो. ॥ ८२ ॥

**निर्वर्त्य सर्वकृत्यानि कदाचित्सचिवेश्वरः । पाक्षिकावश्यकं कर्तुं सायं स्वावासमासदत् ॥ ८३ ॥**

अन्वयः-कदाचित् सचिवेश्वरः सर्व कृत्यानि निर्वर्त्य पाक्षिक आवश्यकं कर्तुं सायं स्व आवासं आसदत्. ॥ ८३ ॥

अर्थः—एक दिवसे ते मंत्रीश्वर सर्व कार्यो पतावीने पाक्षिकप्रतिक्रमण करवामाटे संध्याकाळे पोताना मकानमां आव्यो, ॥ ८३ ॥

**गृहाद्बहिर्न निर्यामीत्यात्तदेशावकाशिकः । सत्यसंधो महामात्यः प्रत्याख्यानविधिं व्यधात् ॥ ८४ ॥**

अन्वयः—आत्त देशावकाशिकः सत्य संधः महामात्यः, गृहाद् बहिः न यामि, इति प्रत्याख्यान विधिं व्यधात्. ॥ ८४ ॥

अर्थः-ग्रहण करेल छे देशावकाशिक व्रत जेणे, तथा सत्य प्रतिज्ञावाळा एवा ते मंत्रीश्वरे "मारे घरमांथी बहार जवुं नही" एवीरीतनां पच्चख्खाण कर्या. ॥ ८४ ॥

**आवश्यके कृते शुद्धश्रद्धानध्यानबन्धुरः । मन्त्रीश्वरो नमस्कारपरावर्तपरोऽभवत् ॥ ८५ ॥**

अन्वयः—आवश्यके कृते शुद्ध श्रद्धान बंधुरः मंत्रीश्वरः नमस्कार परावर्त परः अभवत्. ॥ ८५ ॥

अर्थः-प्रतिक्रमण कर्याबाद शुद्ध श्रद्धाथी मनोहर थयेलो ते मंत्रीश्वर नवकारमंत्रनो जाप करवामां तत्पर थयो. ॥ ८५ ॥

**समाह्वयति वः स्वामी गुरुकार्यतयेत्यथ । नृपतिप्रतिहारस्तं तदागत्य व्यजिज्ञपत् ॥ ८६ ॥**

अन्वयः-तदा, स्वामी वः गुरु कार्यतया समाह्वयति, इति नृपति प्रतिहारः आगत्य तं व्यजिज्ञपत्. ॥ ८६ ॥

अर्थः– ते वखते, राजा तमोने कंइं महान् कार्य प्रसंगे बोलावे छे, एम राजाना छडीदारे आवीने तेने विनंति करी. ॥ ८६ ॥

**आ प्रभाताद् गृहबहिर्गतिप्रत्याख्यया स्थितः । एष्यामि प्रातरित्युक्त्वा वेत्री प्रैष्यत मन्त्रिणा ॥८७॥**

अन्वयः–आ प्रभातात् गृह बहिः गति प्रत्याख्यया स्थितः ( अहं ) प्रातः एष्यामि, इति उक्त्वा मंत्रिणा वेत्री प्रैष्यत. ॥ ८७ ॥

अर्थः–प्रभातसुधी घरनी ब्हार न जवाना पच्चख्खाण करीने हुं रहेलो छुं, माटे हुं प्रभातमां आवीश, एम कहीने मंत्रीए ते छडीदारने पाछो मोकल्यो. ॥ ८७ ॥

**परमेष्ठिनमस्कारसुधासेकविवेकतः । पुनर्मानुषजन्मद्रुं सचिवः सफलं व्यधात् ॥ ८८ ॥**

अन्वयः–सचिवः पुनः परमेष्ठि नमस्कार सुधा सेक विवेकतः मानुष जन्मद्रुं सफल व्यधात्. ॥ ८८ ॥

अर्थः–पछी ते मंत्रीश्वर तो पंच परमेष्ठिना नमस्काररूपी अमृतना सिंचनथी मनुष्य जन्मरूपी वृक्षने सफल करवा लाग्यो. ॥८८॥

**समुपेत्य पुनर्वेत्री मन्त्रीन्दुमिदमभ्यधात् ॥ युष्मदुक्तैर्नृपः स्वाज्ञालोपात्कोपान्धतामधात् ॥ ८९ ॥**

अन्वयः—वेत्री पुनः समुपेत्य मंत्रींदु इदं अभ्यधात्, युष्मत् उक्तैः स्व आज्ञा लोपात् नृपः कोप अंधतां अधात् ॥ ८९ ॥

अर्थः–वळी ते छडीदारे पाछा आवीने ते मंत्रीश्वरने एम कह्युं के, तमारां वचनोथी, पोतानी आज्ञाना भंगथी राजा क्रोधांध थयाछे.

**इह नायाति मायातिचित्रधीः सचिवः स चेत् । तत्सर्वैश्वर्यमुद्रा मे याच्येति प्रजिघाय माम् ॥ ९० ॥**

अन्वयः—माया अति चित्र धीः सः सचिवः चेत् इह न आयाति, तत् मे सर्व ऐश्वर्य मुद्रा याच्या, इति मां प्रजिघाय. ॥९०॥

अर्थः—कपटथी अति विचित्र बुद्धिवाळो ते मंत्रीश्वर जो अहीं न आवतो होय, तो मारी सर्व अधिकारपणानी मुद्रा ते( नी पासेथी ) पाछी मागी लेवी, एम कहीने राजए मने मोकल्यो छे. ॥ ९० ॥

**इति श्रुतप्रतीहारव्याहारः सचिवो हसन् । तत्क्षणं प्रैषयन्मुद्रां दुःशीलामिव दासिकाम् ॥ ९१ ॥**

अन्वयः—इति श्रुत प्रतीहार व्याहारः सचिवः हसन्, दुःशीलां दासिकां इव, तत्क्षणं मुद्रां प्रैषयत्. ॥ ९१ ॥

अर्थः—एरीतनुं ते प्रतीहारनुं वचन सांभळीने ते मंत्रीश्वरे हसतांथकां कुलटा दासीनीपेठे तेज क्षणे ते राजमुद्राने पाछी आपी.

**मन्त्री श्रेयःसमुद्रोऽस्मिन्समुद्रे सद्मतो गते । राज्यचिन्ताशल्यनाशाद् दृढंधर्मपरोऽभवत् ॥ ९२ ॥**

अन्वयः-श्रेयः समुद्रः मंत्री, समुद्रे अस्मिन् सद्मतः गते, राज्य चिंता शल्य नाशात् दृढं धर्म परः अभवत् ॥ ९२ ॥

अर्थः-कल्याणना महासागर सरखो ते मंत्रीश्वर, मुद्रा सहित ते छडीदार घरमांथी बहार गयाबाद राज्यचिंतानुं शल्य नष्ट थवाथी दृढताथी धर्म कार्योमां तत्पर थयो. ।' ९२ ॥

**मुद्रां कौतुकतो वेत्री परिधाय करे तदा । मन्त्री जातोऽहमित्यात्मपदातिषु जगौ हसन् ॥ ९३ ॥**

अन्वयः—तदा कौतुकतः वेत्री करे मुद्रिकां परिधाय, अहं मंत्री जातः, इति हसन् आत्म पदातिषु जगौ. ॥ ९३ ॥

अर्थः-ते वखते गम्मतनी खातर ते छडीदार हाथमां ते मुद्रिकाने पहेरीने हुं मंत्री थयो छुं, एम हांसी करतो थको पोताना सुभटोने कहेवा लाग्यो. ॥ ९३ ॥

शनैर्मन्त्रिशिरोरत्न कुरु पादावधारणम् । इति हास्यमुखैः पुंभिर्वृतो गेहाच्चचाल सः ॥ ९४ ॥

अन्वयः—(हे) मंत्रि शिरः रत्न! शनैः पाद अवधारणं कुरु? इति हास्यमुखैः पुंभिः वृतः सः गेहात् चचाल. ॥ ९४ ॥

अर्था–हे मंत्रिशिरोमणि! आप धीमे धीमे पगलां भरो? एम मुखथी हांसी करता ते पुरुषोवडे वींटायेलो ते छडीदार त्यांथी चालवा लाग्यो. ॥ ९४ ॥

तदैव दैवतः कैश्चिद्भटैः प्रकटितासिभिः । आहत्य पातितो नीतश्चायं वार्ताविशेषताम् ॥ ९५ ॥

अन्वयः–तदा एव दैवतः प्रकटित असिभिः कैश्चित् भटैः आहत्य च अयं पातितः वार्ता अवशेषतां नीतः. ॥ ९५ ॥

अर्थः–तेज समये दैवयोगे तलवारो खेंचीने केटलाक सुभटोए ते छडीदारने मारीने पाडी नाख्यो, अने तेथी ते त्यांज मरण पाम्यो

त्रस्तशेषैस्तदा तस्य सुभटैर्जघ्निरेऽरयः । वेत्री हतो हत इति तुमुलश्च महानभूत् ॥ ९६ ॥

अन्वयः–तदा त्रस्त शेषैः तस्य सुभटैः अरयः जघ्निरे, च वेत्री हतः हतः, इति महान् तुमुलः अभूत्. ॥ ९६ ॥

अर्थः–ते वखते नाशतां बाकी रहेला ते छडीदारना सुभटोए ते शत्रुओने मारी नाख्या, अने छडीदार मरायो, मरायो, एम म्होटो कोलाहल थइ पड्यो. ॥ ९६ ॥

इति धात्रीधवः श्रुत्वा क्रोधधूमध्वजोद्धुरः । उच्चैर्जल्पमनल्पं स ज्वालाकल्पमकल्पयत् ॥ ९७ ॥

अन्वयः–इति श्रुत्वा क्रोध धूम ध्वज उध्धुरः सः धात्री धवः ज्वाला कल्पं अनल्पं जल्पं उच्चैः अकल्पयत्. ॥ ९७ ॥

अर्थः—ते सांभळीने क्रोधरूपी अग्निथी जाज्वल्यमान थयेलो ते राजा ज्वाला सरखां घणां वचनो म्होटेथी बोलवा लाग्यो ॥

**अस्मत्कार्यमिदं कुर्वन्नतुच्छच्छद्मसद्मना । संहारितः प्रतीहारस्तेनासौ मन्त्रिणा ध्रुवम् ॥ ९८ ॥**

अन्वयः–इदं अस्मत् कार्य कुर्वन् असौ प्रतीहारः ध्रुवं अतुच्छ च्छद्म सद्मना तेन मंत्रिणा संहारितः. ॥ ९८ ॥

अर्थः—अमारुं आ कार्य करनारा आ छडीदारने खरेखर विस्तीर्ण कपटना स्थानरूप ते मंत्रीए मारी नाख्यो छे. ॥ ९८ ॥

**एतस्य यदि वृद्धस्य शिरश्छित्वा स्वपाणिना । उच्छालयामि छलिनस्तन्मे मनसि निर्वृतिः ॥ ९९ ॥**

अन्वयः–यदि एतस्य छलिनः वृद्धस्य स्वपाणिना शिरः छित्वा उच्छालयामि, तत् मे मनसि निर्वृतिः. ॥ ९९ ॥

अर्थः–(माटे हवे) ज्यारे ते कपटी वृद्धमंत्रिनुं मस्तक मारे हाथेथी कापीने उछाळुं, त्यारेज मारा मनमां शांति थशे. ॥ ९९ ॥

**एवमुच्चैर्लपन्गोपः कोपाटोपभटोत्कटः । तत्रागाद्यत्र ते सन्ति घातार्ता वेत्रिघातकाः ॥ ८०० ॥**

अन्वय?–एवं उच्चैः लपन् गोपः कोप आटोप भट उत्कटः तत्र आगात्, यत्र ते वेत्रि घातकाः घातार्ताः संति. ॥ ८०० ॥

अर्थः–एरीते म्होटेथी बोलतो ते राजा, क्रोधना आवेशवाळा सुभटोथी भयंकर थयो थको त्यां आव्यो, के ज्यां ते छडीदारने मारनारा सुभटो घायल थइने पड्या हता. ॥ ८०० ॥

**अमात्यभृत्या नैते स्युः केऽपि वैदेशिका इव । इति ध्यात्वा नरेन्द्रस्तान्दीपदृष्टानभाषत ॥ १ ॥**

अन्वयः-एते अमात्य भृत्याः न स्युः, के अपि वैदशिकाः इव, इति ध्यात्वा नरेंद्रः दीप दृष्टान् तान् अभाषत. ॥ १ ॥

अर्थः-आ मंत्रिना नोकरो संभवता नथी, कोइक पण परदेशीजेवा जणाय छे, एम विचारी राजा दीपकथी जोइने तेओने कहेवा लाग्यो के,

**के यूयं किं हतो वेत्रीत्युर्वीनाथेऽथ पृच्छति । ऊचुस्तेऽमर्षदष्टौष्ठा वण्ठाः कण्ठागतासवः ॥ २ ॥**

अन्वयः-अथ यूयं के? वेत्री किं हतः? इति उर्वी नाथे पृच्छति अमर्ष दष्ट ओष्ठाः, कंठ आगत असवः ते वंठाः ऊचुः. ॥२॥

अर्थः-पछी तमो कोण छो? अने आ छडीदारने (तमोए) केम मार्यो? एम राजाए पूछवाथी क्रोधथी होठ करडनारा, तथा कंठे आवेला प्राणोवाळा ते लफंगा मवालीयो बोल्या के, ॥ २ ॥

**किमस्मान्पृच्छसि क्ष्माप दैवं पृच्छ दुराशयम् । अस्मदीशस्य येनैवं चक्रे व्यर्थो मनोरथः ॥ ३ ॥**

अन्वयः-(हे) क्ष्माप! अस्मान् किं पृच्छसि? दुराशयं दैवं पृच्छ? येन एवं अस्मत् ईशस्य मनोरथः व्यर्थः चक्रे. ॥ ३ ॥

अर्थः-हे राजन्! आप अमोने शुं पूछो छो? अमारां दुष्ट तगदीरने पूछो? के जेणे अमारा स्वामीनो मनोरथ आरीते निष्फल कर्यो

**धारावासपुराधीशः शूरसेनः स्वसेवकान् । सुमित्रं मन्त्रिणं हन्तुं प्रैषीदस्मान्महेच्छया ॥ ४ ॥**

अन्वयः—धारावास पुर अधीशः शूरसेनः महेच्छया सुमित्रं मंत्रिणं हंतुं अस्मान स्व सेवकान् प्रैषीत्. ॥ ४ ॥

अर्थः—धारावास नगरना शूरसेन नामना राजाए म्होटा मनोरथथी सुमित्र मंत्रिने मारवामाटे पोताना सेवक एवा अमोने मोकल्या हता. ॥ ४ ॥

यदयं दण्डयत्यस्मन्नेतारं प्रतिवत्सरम् । त्वामप्यस्मद्विभोः शत्रुं सर्वदा पोषयत्यलम् ॥ ५ ॥

अन्वयः—यत् अयं अस्मत् नेतारं प्रतिवत्सरं दंडयति, अस्मत् विभोः शत्रुं त्वां अपि सर्वदा अलं पोषयति. ॥ ५ ॥

अर्थः—केमके आ सुमित्र मंत्री अमारा स्वामीने दर वर्षे दंडे छे, अने अमारा स्वामीना शत्रु एवा तमोने पण हमेशां सारी रीते पोषे छे. ॥ ५ ॥

स्वाम्यादेशादिहास्माभिर्बबन्धेऽध्वाद्य मन्त्रिणः । कुतोऽयमपतत्सिंहबन्धनं जम्बुको यथा ॥ ६ ॥

अन्वयः—स्वामि आदेशात् इह अस्माभिः अद्य मंत्रिणः अध्वा बबंधे, यथा सिंह बंधनं जंबूकः, कुतः अयं अपतत्? ॥ ६ ॥

अर्थः—(अमारा) स्वामिना हुकमथी आजे अमोए अहीं ते मंत्रीनो मार्ग घेर्यो हतो, परंतु जेम सिंहनी जाळमां शियाळ न फसाय, तेम ते (अमारा हाथमां) क्यांथी सपडाय? ॥ ६ ॥

इत्युक्तिविकटावेशाः सुभटाः प्रकटाशयाः । ते चत्वारोऽपि पञ्चत्वं जग्मुस्तत्रैव घातकाः ॥ ७ ॥

अन्वयः—इति उक्ति विकट आवेशाः ते प्रकट आशयाः चत्वारः अपि घातकाः सुभटाः तत्र एव पंचत्वं जग्मुः. ॥ ७ ॥

अर्थः—ए रीतना वचनोना भयंकर आवेशवाळा, तथा प्रगट करेल छे, पोताना मनना अभिप्रायो जेओए एवा ते चारे घातकी सुभटो त्यांज मरण पाम्या ॥ ७ ॥

नृपः कृतानुतापोऽथ गत्वा पौरवरैर्वृतः । अमात्यं क्षमयामास बाहू धृत्वा वदन्निति ॥ ८ ॥

अन्वयः—अथ कृत अनुतापः नृपः पौर वरैः वृतः गत्वा, बाहू धृत्वा इति वदन् अमात्यं क्षमयामास. ॥ ८ ॥

अर्थः—पछी करेल छे पश्चात्ताप जेणे एवो ते राजा उत्तम नागरीकोसाथे जइने, तथा बन्ने हाथ झालीने, एम बोलतो थको ते मंत्रीश्वरनी क्षमा मागवा लाग्यो के, ॥ ८ ॥

**मया तेऽपि नृकल्पस्य कल्पितो योऽल्पबुद्धिना । त्वं क्षमस्व क्षमस्व त्वमपराधममुं मयि ॥ ९ ॥**

अन्वयः-मया अल्प बुद्धिना नृकल्पस्य अपि ते यः कल्पितः, अमुं अपराधं त्वं मयि क्षमस्व? क्षमस्व? ॥ ९ ॥

अर्थः-में अल्पबुद्धिए मनुष्योमां कल्पवृक्षसरखा एवा पण तमाराप्रते जे (आवी अयोग्य वर्तणुक चलावी) ते अपराधमाटे तमो मने क्षमाकरो? क्षमाकरो? ॥ ९ ॥

**व्रतं चेन्नाचरिष्यस्त्वं नाजीविष्यस्ततः पितः । त्वां विना नैव राज्यं मेऽभविष्यत्प्राज्यवैभवम् ॥ १० ॥**

अन्वयः-(हे) पितः! त्वं चेत् व्रतं न आचरिष्यः, ततः न अजीविष्य', त्वां विना मे राज्यं प्राज्य वैभवं न अभविष्यत्. १०

अर्थः-हे पिताजी! आपे जो आ व्रत न लीधुं होत, ता आप जीवी शकत नही, अने आपविना मारुं राज्य वैभवशाली थइ शके तेम नथी.

**तदद्यातुल्यकल्याणकारिणः पुण्यकर्मणः । फलं प्रत्यक्षमद्राक्षमहं पापापहं चिरात् ॥ ११ ॥**

अन्वयः—तत् अद्य अहं चिरात् अतुल्य कल्याण कारिणः पुण्य कर्मणः पाप अपहं फलं प्रत्यक्षं अद्राक्षं. ॥ ११ ॥

अर्थः—माटे आजे में घणे काळे अनुपम कल्याणकारी पुण्यकार्यनुं पापोनो नाश करनारुं फल प्रत्यक्ष जोयुं छे. ॥ ११ ॥

सुकृतं जीवितव्यं ते व्रतेनानेन पोषितम् । शोषितं त्वत्कृतेनाद्य दुःकृतं दुर्यशश्च मे ॥ १२ ॥

अन्वयः–त्वत् कृतेन अनेन व्रतेन अद्य ते सुकृतं जीवितव्यं पोषितं, मे दुःकृतं च दुर्यशः शोषितं. ॥ १२ ॥

अर्थः–तमोए करेलां आ व्रतथी आजे तमारुं पवित्र जीवन पुष्ट थयुं छे, अने मारुं पाप तथा अपयश नष्ट थयां छे. ॥ १२ ॥

तत्सहस्वापराधं मे प्रसीद वद सात्त्विक । धर्मं कारय मां तात तारयाशु भवार्णवात् ॥ १३ ॥

अन्वयः—तत् (हे) सात्त्विक! मे अपराधं सहस्व? प्रसीद? वद? (हे) तात्! मां धर्मं कारय? आशु भव अर्णवात् तारय?

अर्थः—हे! बहादूर मंत्रीश्वर! मारा अपराधनी तमो क्षमा करो? तथा कृपा करी मारी साथे बोलो? तथा हे पिताजी! मारीपासे धर्मकार्यो करावो? तथा तुरत आ संसार समुद्रथी तारो? ॥ १३ ॥

उवाच सचिवोऽथेदं नापराधोऽस्ति ते ध्रुवम् । यत्क्ष्माप सानुतापस्त्वं धर्मे धत्सेऽधुना धियम् ॥ १४ ॥

अन्वयः–अथ सचिवः इदं उवाच, हे क्ष्माप! ध्रुवं ते अपराधः न अस्ति, यत् अधुना स अनुतापः त्वं धर्मे धियं धत्से ॥१४॥

अर्थः—त्यारे मंत्रीश्वरे एम कह्युं के, हे राजन! खरेखर तमारो अपराध नथी, केमके हवे तमोए पश्चात्तापसहित धर्मबुद्धि धारण करी छे' ॥ १४ ॥

ततः संलब्धमुद्रेण मन्त्रिणा प्रेरितो नृपः । जगृहे गृहिणां धर्मं पूर्णचन्द्रगुरोः पुरः ॥ १५ ॥

अन्वयः-ततः संलब्ध मुद्रेण मंत्रिणा प्रेरितः नृपः पूर्णचंद्र गुरोः पुरः गृहिणां धर्मं जगृहे. ॥ १५ ॥
अर्थः-पछी पाछी मेळवेल छे मुद्रा जेणे एवा ते मंत्रीवडे प्रेरायेला ते राजाए पूर्णचंद्र गुरुनी पासेथी गृहस्थना धर्मनो स्वीकार कर्यो.

**मन्त्रिणः शङ्कमानोऽथ निजे कण्ठे कुठारवान् । आयातः शूरसेनोऽपि भूभुजा भूषितः श्रिया ॥ १६ ॥**

अन्वयः-अथ मंत्रिणः शंकमानः शूरसेनः अपि निजे कंठे कुठारवान् आयातः, भूभुजा श्रिया भूषितः. ॥ १६ ॥
अर्थः-पछी ते मंत्रीश्वरथी डरतो ते शूरसेन पण पोताना कंठमां कुहाडो पेहेरीने (राजा पासे) आव्यो, त्यारे राजाए पण तेनुं समृद्धिथी सन्मान कर्युं. ॥ १६ ॥

**देवार्चादानसुध्यानरथयात्रादिकर्मभिः । नृपो मन्त्र्युपदिष्टैः स्वं विदधे जन्म पावनम् ॥ १७ ॥**

अन्वयः-मंत्रि उपदिष्टैः देव अर्चा दान सुध्यान रथयात्रा आदि कर्मभिः नृपः स्वं जन्म पावनं विदधे. ॥ १७ ॥
अर्थः-पछी ते मंत्रीश्वरे उपदेशेलां देवपूजा, दान उत्तम ध्यान, तथा रथयात्रा आदिकनां कार्योथी ते राजाए पोतानुं जीवन पवित्र कर्युं

**तत्र स्वामिनि बालोऽपि चण्डालोऽपि न सोऽभवत् । न यो जिनाधिनाथोक्तधर्मकर्मठतां गतः ॥१८॥**

अन्वयः-तत्र स्वामिनि सः बालः अपि, चंडालः अपि न अभवत्, यः जिन अधिनाथ उक्त धर्म कर्मठतां न गतः. ॥ १८ ॥
अर्थः-ते राजाना राज्यमां एवो कोइ पण बालक के चंडाल पण न हतो, के जे जिनेश्वर प्रभुए उपदेशेला धर्मकार्यमां तत्पर न थयो.

**इत्थं मन्त्रीव भूपश्च कृत्वा धर्मं विशुद्धधीः । महाविदेहे मर्त्यत्वं प्राप्य लेभे शिवश्रियम् ॥ १९ ॥**

अन्वयः—इत्थं मंत्री इव विशुद्धधीः भूपः च महाविदेहे मर्त्यत्वं प्राप्य शिव श्रिय लेभे. ॥ १९ ॥

अर्थः—एरीते मंत्रीनीपेठे निर्मल बुद्धिवाळो ते राजा महाविदेह क्षेत्रमां मनुष्य जन्म पामीने मोक्षे गयो. ॥ १९ ॥

**ततः सुमित्रदीपेन गमितेऽस्मिन्प्रकाशताम् । देशावकाशिकपथे संचरन्तु सुखं बुधाः ॥ २० ॥**

अन्वयः—ततः सुमित्र दीपेन प्रकाशतां गमिते अस्मिन् देशावकाशिक पथे बुद्धाः सुखं संचरंतु? ॥ २० ॥

अर्थः—माटे ते सुमित्रनामना दीपके प्रकाशित करेला आ देशावकाशिकव्रतरूपी मार्गमां चतुर माणसोए सुखेथी संचार करवो. ॥

॥ एरीते देशावकाशिकनामना व्रतना संबंधमां सुमित्रनी कथा कही. ॥

**कुव्यापृतीनां स्नानादेस्त्यागो ब्रह्मव्रतं तपः । आहुः शिक्षाव्रतमिदं तृतीयं पौषधाभिधम् ॥ २१ ॥**

अन्वयः—कुव्यापृतीनां स्नान आदेः त्यागः, ब्रह्मव्रतं, तपः, इदं पौषध अभिधं तृतीयं शिक्षाव्रतं आहुः. ॥ २१ ॥

अर्थः—कनिष्ट व्यापारोनो, तथा स्नान आदिकोनो त्याग, ब्रह्मचर्यव्रतनुं पालन, तथा तप, तेने पौषधनामनुं त्रीजुं शिक्षाव्रत कहेलुं छे.

**तत्तु शुद्धोक्तचारित्रिव्रतवत्परिपाल्यते । अहोरात्रमथाशेषां रात्रिं यावज्जितेन्द्रियैः ॥ २२ ॥**

अन्वयः—तु तत् शुद्ध उक्त चारित्रि व्रत वत् जितइंद्रियैः अहोरात्रं, अथ अशेषां रात्रिं यावत् परिपाल्यते. ॥ २२ ॥

अर्थः—वळी ते पौषधव्रतने वर्णवेला शुद्ध दीक्षित मुनिना व्रतनी पेठे जितेंद्रियो एक रात्रिदिवस सुधी, अथवा समस्त रात्रि-

पर्यंत पाले छे. ॥ २२ ॥

**भवोरगमदच्छेदे पौषवत्पौषधव्रतम् । आपत्तापभिदे मित्रानन्दमन्त्रिपतेरिव ॥ २३ ॥**

अन्वयः–भव उरग मद च्छेदे पौषवत् पौषध व्रतं, मित्रानंद मंत्रिपतेः इव आपत् ताप भिदे. ॥ २३ ॥

अर्थः—संसाररूपी सर्पना मदनो नाश करवामां पोषमास सरखुं पौषधव्रत मित्रानंद नामना मंत्रीश्वरनी पेठे दुःखना संतापनो नाश करनारुं छे. ॥ २३ ॥

**तद्यथा–धर्मनिर्मलमत्यर्थमर्थविद्योति विद्यते । पुरं पुष्पपुरं पुष्पचापचापलपेशलम् ॥ २४ ॥**

अन्वयः—तद्यथा–धर्म निर्मलं, अत्यर्थं अर्थ विद्योति, पुष्प चाप चापल पेशलं पुष्पपुरं पुरं विद्यते. ॥ २४ ॥

अर्थः–ते मित्रानंद मंत्रीश्वरनुं उदाहरण नीचे मुजब छे–धर्मथी निर्मल, अत्यंत द्रव्यना तेजवाळुं, तथा कामदेवनी चपलताथी मनोहर लागतुं पुष्पपुर नामनुं नगर छे. ॥ २४ ॥

**तत्र युद्धसुधासत्रममित्रवसुधाभृताम् । बभूव भूविभुर्भानुर्जितभानुः स्वतेजसा ॥ २५ ॥**

अन्वयः—तत्र अमित्र वसुधाभृतां युद्ध सुधा सत्रं, स्व तेजसा जित भानुः, भानुः भूविभुः बभूव. ॥ २५ ॥

अर्थः–ते नगरमां शत्रुराजाओने युद्धरूपी अमृतनी दानशाळा सरखो, तथा पोताना तेजथी सूर्यने पण जीतनारो भानुनामे राजा हतो.

**मन्त्री तस्य धरित्रीन्दोर्मित्रानन्द इति श्रुतः । अजायत धियां पात्रं छात्रीकृतबृहस्पतिः ॥ २६ ॥**

अन्वयः—तस्य धरित्री इंदोः धियां पात्रं, छात्रीकृत बृहस्पतिः मित्रानंदः इति श्रुतः मंत्री अजायत. ॥ २६ ॥

अर्थः—ते राजाने बुद्धिना भाजन सरखो, तथा शिष्यरूप करेल छे बृहस्पतिने जेणे, एवो मित्रानंद नामनो प्रख्यात मंत्री हतो.

**मध्येसदः कदाप्युच्चैर्नरेन्द्रसचिवेन्द्रयोः । व्यवसायस्य पुण्यस्य प्रतिष्ठानेऽभवत्कलिः ॥ २७ ॥**

अन्वयः—कदापि मध्येसदः नर इंद्र सचिव इंद्रयोः व्यवसायस्य पुण्यस्य प्रतिष्ठाने कलिः अभवत्. ॥ २७ ॥

अर्थः—एक दिवसे सभामां ते राजा तथा मंत्रीश्वरवच्चे उद्यमवाद तथा पुण्यवादना स्थापनना संबंधमां क्लेश उत्पन्न थयो. ॥२७॥

**क्रुधाथ वसुधानाथः प्रोवाच सचिवं प्रति । व्यवसायः प्रमाणं न प्रमाणं पुण्यमेव चेत् ॥ २८ ॥**

**ततः स्वपुण्यमाहात्म्यात्त्वं पुण्यबलगर्वितः । गृहाण मम राज्यर्द्धिमित्थं संवर्धिमत्सरः । २९ । युग्मम् ।**

अन्वयः—अथ वसुधा नाथः क्रुधा सचिवंप्रति प्रोवाच, चेत् व्यवसायः प्रमाणं न, पुण्यं एव प्रमाणं, ॥ २८ ॥ ततः स्व पुण्य माहात्म्यात् पुण्य बल गर्वितः त्वं इत्थं संवर्धित मत्सरः मम राज्य ऋद्धि गृहाण ? ॥ २९ ॥ युग्मं ॥

अर्थः—पछी ते राजाए क्रोधथी मंत्रीने कह्युं के, जो उद्यम प्रमाणभूत न होय, अने पुण्यज प्रमाणभूत होय, ॥ २८ ॥ तो पोताना पुण्यना माहात्म्यथी पुण्यना बलथी गर्विष्ठ थयेलो तुं आरीते वृद्धि पामेला मत्सरवाळो थइने मारां राज्यनी समृद्धि लेइले? ॥

**यश्च कश्चित्पुरीमध्याद्भवन्तमनुयास्यति । तत्कण्ठात्तृषितोऽसौ मत्खड्गः पास्यति शोणितम् ॥ ३० ॥**

अन्वयः—च यः कश्चित् पुरी मध्यात् भवंतं अनुयास्यति, तत् कंठात् असौ तृषितः मत् खड्गः शोणितं पास्यति. ॥ ३० ॥

अर्थः-वळी जे कोइ नगरमांथी तारी पाछळ आवशे, तेना कंठमांथी मारी आ तरसी तलवार रुधिर पीसे. ।। ३० ।।

**गच्छ तुच्छमते तूर्णं पूर्णं कुरु निजं वचः । गृहे न हन्त गन्तव्यमित एवान्यतो व्रज ॥ ३१ ॥**

अन्वयः-हे! तुच्छ मते! तूर्णं गच्छ? निजं वचः पूर्णं कुरु? हंत गृहे न गंतव्यं, इतः एव अन्यतः व्रज? ।। ३१ ।।

अर्थः—हे तुच्छबुद्धि! तुं तुरत अहींथी चाल्यो जा? अने तारी शरत पूरी कर? वळी अरे! तारे हवे घेर पण न जवुं, अहींथीज बीजे क्यांक चाल्यो जा? ।। ३१ ।।

**इति क्षितिपतेराज्ञां विज्ञाय सचिवाग्रणीः । एकाक्येव दृढावेशोऽचलद्देशान्तरं प्रति ॥ ३२ ॥**

अन्वयः-इति क्षिति पतेः आज्ञां विज्ञाय सचिव अग्रणीः दृढ आवेशः एकाकी एव देशांतरंप्रति अचलत्. ।। ३२ ।।

अर्थः-एरीतनी राजानी आज्ञा जाणीने ते मंत्रीश्वर पण अत्यंत आवेशमां आवीने एकलोज परदेशप्रते चाली निकळ्यो. ।।३२।।

**पद्भ्यामेवादिभूचारविपद्भ्यामद्भुतोद्यमः । स निःससार नगरान्नगराज इवोन्नतः ॥ ३३ ॥**

अन्वयः-आदि भूचार विपद्भ्यां अद्भुत उद्यमः नगराजः इव उन्नतः, सः पद्भ्यां एव नगरात् निःससार. ।। ३३ ।।

अर्थः—प्रथमज करेल भूगमन तथा आपत्तिप्रते अद्भुत उद्यमवाळो, तथा गिरींद्रनीपेठे उंचो, एवो ते मंत्री (पोताना) बन्ने पगोवडेज नगरमांथी निकळी चालवा लाग्यो. ।। ३३ ।।

**गच्छन्नतुच्छपुण्योऽसौ श्रान्तो मध्यंदिनेऽधिकम् । ददर्शेन्दोरिव कलाकोटीभिर्घटितं सरः ॥ ३४ ॥**

अन्वयः—अतुच्छ पुण्यः असौ गच्छन् अधिकं श्रांतः मध्यंदिने इंदोः इव कला कोटीभिः घटितं सरः ददर्श ॥ ३४ ॥

अर्थः—अत्यंत पुण्यशाली एवा ते मंत्रीए चालतां थकां अत्यंत थाकी जतां मध्याह्नकाले चंद्रनीपेठे क्रोडोगमे कलाओथी रचेलां एक सरोवरने जोयुं. ॥ ३४ ॥

**यल्लोललहरीहस्तगणं भृङ्गघनस्वनाः । आह्वातुं तृषितान्वक्त्रकोटीरब्जच्छलाद्दधौ ॥ ३५ ॥**

अन्वयः—लोल लहरी हस्त गणं यत्, तृषितान् आह्वातुं इव, भृंग घन स्वनाः, अब्ज च्छलात् वक्त्र कोटीः दधौ. ॥ ३५ ॥

अर्थः—चपल मोजांओरूपी हाथोना समूहवाळुं जे तळाव, तृषातुरथयेला प्राणीओने जाणे बोलाववामाटे होय नही! तेम भमराओना गंभीर नादवाळां, कमलोना मिषथी क्रोडोगमे मुखोने धारण करतुं हतुं. ॥ ३५ ॥

**स कृतस्नानपानोऽत्र स्थितः पाल्यां तरोस्तले । नभसो रभसोत्तीर्णमपश्यत्पुरुषं पुरः ॥ ३६ ॥**

अन्वयः—अत्र कृत स्नान पानः, पाल्यां तरोः तले स्थितः सः पुरः नभसः रभसा उत्तीर्ण पुरुषं अपश्यत्. ॥ ३६ ॥

अर्थः—ते तळावमां स्नानपान करीने पालपर वृक्षनी नीचे बेठेला ते मंत्रीए आगळ आकाशमांथी एकदम उतरेला (एक) पुरुषने जोयो.

**संध्यायां चिन्तितं सैन्यं दास्यत्येष मणिस्तव । पश्चादपि श्रियं भूरि पूरयिष्यति पूजितः ॥ ३७ ॥**

**इत्युक्त्वा किं किमित्युक्तेरुच्चैश्चित्रस्य मन्त्रिणः । पाणौ चिन्तामणिं मुक्त्वा स द्यां दिव्यनरोऽगमत् ३८ युग्मम्**

अन्वयः-एषः मणिः संध्यायां तव चिंतितं सैन्यं दास्यति, पश्चात् अपि पूजितः भूरि श्रियं पूरयिष्यति, ॥ ३७ ॥ इति उक्त्वा किं किं? इति उक्तेः उच्चैः चित्रस्य मंत्रिणः पाणौ चिंतामणिं मुक्त्वा सः दिव्य नरः द्यां अगमत्. ॥ ३८ ॥ युग्मं ॥

अर्थः-आ मणि संध्याकाळे तने वांछित सैन्य आपशे, अने पाछळथी पण तेने पूजवाथी ते घणी लक्ष्मी आपशे, ॥ ३७ ॥ एम कहीने शुं? शुं? एम बोलता, तथा अति आश्चर्य पामेला से मंत्रीना हाथमां चिंतामणि रत्न मूकीने ते दिव्यपुरुष आकाशमां चाल्यो गयो. ॥ ३८ ॥ युग्मं ॥

**अथाब्जैर्मणिमभ्यर्च्य रोमाञ्चितवपुश्चिरम् । विरचय्य चमूचक्रं सायं सोऽगात्पुरं प्रति ॥ ३९ ॥**

अन्वयः-अथ रोमांचित वपुः सः अब्जैः चिरं मणिं अभ्यर्च्य, चमू चक्रं विरचय्य सायं पुरंप्रति अगात्. ॥ ३९ ॥

अर्थः-पछी रोमांचित शरीरवाळो ते मंत्री कमलोवडे घणा वखतसुधी ते मणिने पूजीने, तथा पछी सैन्यनो समूह रचीने संध्याकाळे ( पोताना ते ) नगरतरफ गयो. ॥ ३९ ॥

**गजवाजिरथाभोगमग्ननिस्वाननिस्वनः । तैर्बलैर्वलयामास मित्रानन्दोऽथ तत्पुरम् ॥ ४० ॥**

अन्वयः—अथ मित्रानंदः गज वाजि रथ आभोग मग्न निस्वान निस्वनः तै बलैः तत् पुरं वलयामास. ॥ ४० ॥

अर्थः—पछी ते मित्रानंदमंत्रीए हाथी, घोडा तथा रथोना समूह सहित डंकाओनी गर्जनाकरीने ते सैन्योथी ते नगरने घेरो घाल्यो. ॥ ४० ॥

कश्चकार पुरोरोधमिति बोधकृते नृपः । हेरिकान्प्रेरयामास तान्प्रेक्ष्य सचिवोऽब्रवीत् ॥ ४१ ॥

अन्वयः—पुरी रोधं कः चकार? इति बोधकृते नृपः हेरिकान् प्रेरयामास, तान् प्रेक्ष्य सचिवः अब्रवीत्. ॥ ४१ ॥

अर्थः—आ नगरीने कोणे घेरो घाल्यो छे? ए जाणवाने राजाए बातमीदारोने मोकल्या, तेओने जोइ मंत्रीए कह्युं के, ॥४१॥

भुजागर्वपराभूतभूरिभाग्यभरोद्भवः । अये मद्वचसा वाच्यो भवद्भिरिति भूपतिः ॥ ४२ ॥

अन्वयः–अये! भुजा गर्व पराभूत भूरि भाग्य भर उद्भवः भूपतिः भवद्भिः मद्वचसा इति वाच्यः, ॥ ४२ ॥

अर्थः—अरे! भुजाबलना गर्वथी नष्ट थयेल छे. घणा भाग्योना समूहनी उत्पत्ति जेनी एवा ते राजाने तमारे मारा कहेवाथी एम कहेवुं के, ॥ ४२ ॥

पुण्याप्तसैन्यसंदर्भो मित्रानन्दः समागमत् । विक्रमाक्रान्तविश्वोऽसि संप्रहर्तुं बहिर्भव ४३ ॥

अन्वयः–पुण्य आप्त सैन्य संदर्भः मित्रानंदः समागमत्, विक्रम आक्रांत विश्वः असि, संप्रहर्तुं बहिः भव? ॥ ४३ ॥

अर्थः—पुण्यथी प्राप्त थयेल छे. सैन्यनो समूह जेने एवो मित्रानंद आवी पहोंच्यो छे, अने तुं तो पोताना पराक्रमथी जगतने पण दबावनारो छे, माटे तेनी साथे लडवाने बहार आव? ॥ ४३ ॥

एवमाभाष्य संभूष्य प्रहिताः सचिवेन ते । गत्वा व्यज्ञपयन्राज्ञे सर्वमथ यथातथम् ॥ ४४ ॥

अन्वयः— एवं आभाष्य संभूष्य सचिवेन महिताः ते अथ गत्वा राज्ञे सर्वं यथा तथं व्यज्ञपयन्. ॥ ४४ ॥

अर्थः—एम कहीने, तथा तेओने शिरपाव आपीने मंत्रिए मोकलेला ते बातमीदारोए पछी (त्यांथी) जइने राजाने सघळी खरेखरी हकीकत जणावी. ॥ ४४ ॥

**स्वस्थीभूयाथ भूजानिः कैश्चित्परिवृतो जनैः । कृती तत्र ययौ यत्र मित्रानन्दः स्वयं स्थितः ॥ ४५ ॥**

अन्वयः—अथ कृती भूजानिः स्वस्थीभूय कैश्चित् जनैः परिवृतः यत्र मित्रानंदः स्वयं स्थितः, तत्र ययौ. ॥ ४५ ॥

अर्थः—पछी ते चतुर राजा शांत थइने केटलाक माणसो सहित परवर्यो थको, ज्यां मित्रानंद पोते रह्यो हतो, त्यां गयो. ॥ ४५ ॥

**अभ्युत्तस्थौ तदा मन्त्री निर्भाल्य नृपतिं पुरः । इष्टे हि दर्शनं यावद्विरोधो युज्यते सताम् ॥ ४६ ॥**

अन्वयः—तदा मंत्री पुरः नृपतिं निर्भाल्य अभ्युत्तस्थौ, हि सतां दर्शनं यावत् इष्टे विरोधो युज्यते ॥ ४६ ॥

अर्थः—ते वखते ते मंत्री आगळ राजाने जोइने उभो थयो, केमके सज्जनोनो फक्त नजरे देखावासुधीज इष्टजन मतेनो विरोध होय छे.

**प्रणिपत्याथ पृथ्वीन्दुर्निष्कपीठे निवेशितः । बलादर्धासने स्वस्य सचिवं न्यस्य सोऽवदत् ॥ ४७ ॥**

अन्वयः—अथ प्रणिपत्य पृथ्वी इंदुः निष्क पीठे निवेशितः, सः बलात् स्वस्य अर्ध आसने सचिवं न्यस्य अवदत् ॥ ४७ ॥

अर्थः—पछी प्रणाम पूर्वक (मंत्रीए) राजाने सिंहासनपर बेसाड्यो, त्यारे ते राजाए पण बलत्कारे पोताना अर्ध आसनपर ते मंत्रीने बेसाडीने कह्युं के, ॥ ४७ ॥

वरेण्यं पुण्यमस्त्येव शौर्यादिव्यवसायतः । पुण्यभाजां हि जायन्ते किंकरा व्यवसायिनः ॥ ४८ ॥

अन्वयः—शौर्य आदि व्यवसायतः पुण्यं एव वरेण्यं अस्ति, हि पुण्यभाजां व्यवसायिनः किंकराः जायंते. ॥ ४८ ॥

अर्थः-शौर्य आदिकना उद्यमथी पण पुण्यज उत्तम छे, केमके पुण्यशालीओ पासे उद्यमवंतो नोकर थइने रहे छे, ॥ ४८ ॥

भवद्भाग्योदयः कश्चिदयमीदृक्चमूचयः । येनाहं तव भर्तापि भृत्यवद्भामि तेऽग्रतः ॥ ४९ ॥

अन्वयः-अयं ईदृक् चमू चयः, कश्चित् भवत् भाग्य उदयः, येन अहं ते अग्रतः तव भर्ता अपि भृत्यवत् भामि. ॥ ४९ ॥

अर्थः-आ आवो सैन्यनो समूह (जे तमोने प्राप्त थयो ते खरेखर) तमारा पुण्यना उदयने सूचवनारो छे, के जेथी हुं तमारी पासे तमारो स्वामी छतां पण नोकर सरखो लागुं छुं. ॥ ४९ ॥

किं त्वसावियती भूतिर्बभूव भवतः कुतः । इत्युक्तो भूभुजा मन्त्री स्वचरित्रमचीकथत् ॥ ५० ॥

अन्वयः—किंतु भवतः असौ इयती भूतिः कुतः बभूव ? इति भूभुजा उक्तः मंत्री स्व चरित्रं अचीकथत्. ॥ ५० ॥

अर्थः-परंतु तमोने आ आटली समृद्धि क्यांथी प्राप्त थइ एम राजाए पूछवाथी ते मंत्रीए पोतानुं वृत्तांत कही संभळाव्युं. ॥५०॥

अथ विस्मयविस्मेरनेत्रपत्रजनेक्षितः । मित्रानन्देन सानन्दः पृथ्वीन्दुः प्राविशत्पुरम् ॥ ५१ ॥

अन्वयः-अथ विस्मय विस्मेर नेत्र पत्र जन ईक्षितः, सानंदः पृथ्वी इंदुः मित्रानंदेन पुरं प्राविशत्. ॥ ५१ ॥

अर्थः—पछी आश्चर्यथी विकस्वर थयेलां नेत्रोवाळा लोकोथी जोवाएला ते राजा आनंदथी ते मित्रानंद मंत्रीसहित नगरमां दाखल थयो.

**उपायैः फलितं श्रीभिर्मणिमाहात्म्यतोऽधिकम् । ववृधे च नरेन्द्रेण मन्त्रिणो मैत्र्यमद्‌भुतम् ॥ ५२ ॥**

अन्वयः—च मणि माहात्म्यतः उपायैः श्रीभिः अधिकं फलितं नरेंद्रेण मंत्रिणः मैत्र्यं अद्‌भुतं ववृधे. ॥ ५२ ॥

अर्थः—पछी ते मणिना प्रभावथी उद्यम अने लक्ष्मीथी अधिक फलद्रुप थयेली ते राजासाथेनी मंत्रीनी मित्राइ आश्चर्यकारकरीते वृद्धि पामवा लागी. ॥ ५२ ॥

**कदापि भानुभूपेन सहोत्तंसितसंसदम् । आरादारामिकोऽभ्येत्य तं धर्मज्ञं व्यजिज्ञपत् ॥ ५३ ॥**

अन्वयः—कदापि भानु भूपेन सह उत्तंसित संसदं तं धर्मज्ञं आरामिकः आरात् अभ्येत्य व्यजिज्ञपत्. ॥ ५३ ॥

अर्थः—पछी एक दिवसे ते भानुराजासहित राजसभाने शोभावता एवा ते धर्मिष्ठ मंत्रीनीपासे वनरक्षक मालीए तुरत आवीने कह्युं के,

**दिष्ट्याद्य वर्धसे स्वाभिन्नङ्गी धर्म इवागमत् । मुनिः सुमन्धरो नाम ज्ञानी लीलावनीं तव ॥ ५४ ॥**

अन्वयः—हे स्वामिन्! अद्य दिष्ट्या वर्ध्यसे, अंगी धर्मः इव सुमंधरः नाम ज्ञानी मुनिः तव लीला अवनीं आगमत्. ॥ ५४ ॥

अर्थः—हे स्वामी! आजे (हुं आपने) आनंदथी वधामणी आपुं छुं के, देहधारी धर्मसरखा सुमंधर नामना ज्ञानीमुनि आपना क्रीडावनमां पधार्या छे. ॥ ५४ ॥

**प्रोत्याथ तस्मै दत्त्वाङ्गभूषणानि क्षणेन सः । जगामारामजगतीं जगतीपतिना समम् ॥ ५५ ॥**

अन्वयः—अथ प्रीत्या तस्मै अंग भूषणानि दत्वा क्षणेन सः जगती पतिना समं आराम जगतीं जगाम. ॥ ५५ ॥

अर्थः-तेज वखते आनंदथी तेने शरीरपरना आभूषणो आपीने क्षणवारमांज ते मित्रानंदमंत्री राजासहित ते बगीचानी भूमिमां गयो.

**मुनिं नेत्रामृतं नेत्रैरापीय नृपमन्त्रिणौ । नत्वाथ न्यविशेतां तौ पातुं कर्णामृतं वचः ॥ ५६ ॥**

अन्वयः-अथ तौ नृप मंत्रिणौ नेत्र अमृतं मुनिं नेत्रैः आपीय, नत्वा, कर्ण अमृतं वचः पातुं न्यविशेतां. ॥ ५६ ॥

अर्थः-पछी ते राजा तथा मंत्री, नेत्रोने अमृतसमान एवा ते मुनिराजने नेत्रोवडे जोइने, तथा नमीने, कर्णोमां अमृत समान, एवी तेमनी वाणी सांभळवाने बेठा. ॥ ५६ ॥

**मुनीशं देशनान्तेऽथ पप्रच्छ पृथिवीपतिः । धन्यस्य कथमस्यासन्विपत्कालेऽपि संपदः ॥ ५७ ॥**

अन्वयः—अथ देशना अंते पृथिवीपतिः मुनीशं पप्रच्छ, धन्यस्य अस्य विपत् काले अपि संपदः कथं आसन्? ॥ ५७ ॥

अर्थः-पछी धर्मदेशनाने अंते राजाए ते मुनिराजने पूछ्युं के, आ भाग्यशाळी मंत्रीने आपत्तिसमये पण संपदा केम प्राप्त थइ?

**अथाचष्ट मुनिः स्पष्टविभवा भुवि भाति पूः । धन्यभारच्युतेव द्यौः पद्मनेत्रेति विश्रुता ॥ ५८ ॥**

अन्वयः—अथ मुनिः आचष्ट, स्पष्ट विभवा, धन्य भार च्युता द्यौः इव, पद्मनेत्रा इति विश्रुता, पूः भुवि भाति. ॥ ५८ ॥

अर्थः-त्यारे ते मुनिराजे कह्युं के, प्रगट वैभववाळी, तथा भाग्यशालीओना भारथी जाणे नीचे आवी पडी होय नही! एवी देवलोकसरखी "पद्मनेत्रा" नामनी प्रसिद्ध नगरी पृथ्वीपर शोभे छे. ॥ ५८ ॥

तत्रादित्य इति क्ष्मापस्तत्प्रसादास्पदं धनी । श्रेष्ठी सुदत्त इत्यासीज्जिनधर्मधुरन्धरः ॥ ५९ ॥

अन्वयः—तत्र आदित्यः इति क्ष्मापः, तत् प्रसाद आस्पदं, जिन धर्म धुरंधुरः, सुदत्तः इति धनी श्रेष्ठी आसीत्. ॥ ५९ ॥

अर्थः—ते नगरीमां आदित्यनामनो राजा हतो, ते राजानी कृपाना स्थानरूप, तथा जैनधर्मीओमां अग्रेसर सुदत्तनामे धनवान शेठ हतो. ॥ ५९ ॥

सोऽन्यदा पापरोगाणामौषधं पौषधं श्रितः । तस्थौ निशि निशान्तेऽसौ शान्तेन मनसा रसात् ॥ ६० ॥

अन्वयः—अन्यदा सः पाप रोगाणां औषधं निशि पौषधं श्रितः, निशा अंते असौ रसात् शांतेन मनसा तस्थौ. ॥ ६० ॥

अर्थः—एक दिवसे ते शेठे पापोरूपी रोगो मटाडवाने औषधसरखा रात्रिपौषधनो स्वीकार कर्यो, अने रात्रिने छेडे ते आनंदथी शांत चित्ते रह्यो. ॥ ६० ॥

तदा कश्चिदवस्वापविद्यावेदी तदोकसि । भूरिभीमपरीवारः प्राविशत्तस्कराग्रणीः ॥ ६१ ॥

अन्वयः—तदा तत् ओकसि अवस्वाप विद्या वेदी, भूरि भीम परीवारः कश्चित् तस्कर अग्रणीः प्राविशत्. ॥ ६१ ॥

अर्थः—ते वखते तेना घरमां अवस्वापिनी विद्या जाणनारो, तथा घणा भयंकर परीवारवाळो कोइक म्होटो चोर दाखल थयो.

विद्या चौरस्मृता लोकं तत्रामूर्छयताखिलम् । सुदत्ते सा नमस्कारमन्त्रध्याने तु नास्फुरत् ॥ ६२ ॥

अन्वयः–चौर स्मृता विद्या तत्र अखिलं लोकं अमूर्छयत्, तु नमस्कार मंत्र ध्याने सुदत्ते सा न अस्फुरत्. ॥ ६२ ॥

अर्थः—पछी ते चोरे याद करेली विद्याए त्यांना सर्व लोकोने मूर्छित कर्या, परंतु नवकारमंत्रना ध्यानमां रहेला सुदत्तशेठपर ते विद्याए असर करी नही. ॥ ६२ ॥

**तं पश्यन्तमपश्यन्त एकान्तस्थं मलिम्लुचाः । जगृहुस्तद्गृहद्रव्याण्यखिलान्यस्खलन्मुदः ॥ ६३ ॥**

अन्वयः—एकांतस्थं पश्यंतं तं अपश्यंतः मलिम्लुचाः, अस्खलन्मुदः अखिलानि तद् गृह द्रव्याणि जगृहुः. ॥ ६३ ॥

अर्थः—एकांतमां रहेला, तथा जोता एवा ते शेठने नही जोता एवा ते चोरोए अत्यंत हर्षित थइने तेना घरमांथी सघळुं द्रव्य ग्रहण कर्युं. ॥ ६३ ॥

**द्राग्भञ्जन्ति स्म मञ्जूषाः कपाटौघमपाटयन् । द्रव्याय स्पष्टयामासुरमी भूमिगृहाण्यपि ॥ ६४ ॥**

अन्वयः—अमी द्राग् मंजूषाः भंजंतिस्म, कपाट ओघं अपाटयन, द्रव्याय भूमि गृहाणि अपि स्पष्टयामासुः. ॥ ६४ ॥

अर्थः–तेओ तुरत पेटीओ भांगवा लाग्या, कमाडोनो समूह तोडी पाडवा लाग्या, तथा द्रव्य मेळववामाटे भोंयरांओ पण खालवा लाग्या.

**अहो महात्मनस्तस्य धर्मावष्टम्भयन्त्रितम् । जातेऽप्युत्पातजातेऽस्मिन्न ध्यानाच्चलितं मनः ॥ ६५ ॥**

अन्वयः–अहो! अस्मिन् उत्पात जाते जाते अपि, तस्य महात्मनः धर्म अवष्टंभ यंत्रितं मनः ध्यानात् न चलितं. ॥ ६५ ॥

अर्थः–अहो! आवो सघळो उत्पात थया छतां पण ते महात्मानुं धर्मना आलंबनमां आसक्त थयेलुं मन ध्यानथी चलायमान थयुं नही.

अनागतेष्वथागत्य गृह्णत्सु धनपद्धतीः । तेषु यातेषु च ध्यानभेदोऽभूत्तस्य न क्वचित् ॥ ६६ ॥

अन्वयः—अथ तेषु अनागतेषु, आगत्य धन पद्धतीः गृह्णत्सु, च यातेषु, तस्य क्वचित् ध्यान भेदः न अभूत्. ॥ ६६ ॥

अर्थः—वळी ते चोरोना आव्या पेहेलां, आवीने धनश्रेणि लेतां, तथा ते लेइने गयाबाद पण ते शेठना ध्यानमां कोइ पण रीते भंगाण थयुं नही. ॥ ६६ ॥

जने शोचत्यथोन्निद्रे धननाशं निशात्यये । व्यलसद्दिनकृत्येषु श्रेष्ठी पारितपौषधः ॥ ६७ ॥

अन्वयः—अथ निशा अत्यये उन्निद्रे जने धन नाशं शोचति, श्रेष्ठी पारित पौषधः दिन कृत्येषु व्यलसत्. ॥ ६७ ॥

अर्थः—पछी रात्री वीत्याबाद जागेलां (घरना) माणसो द्रव्यना नाशमाटे शोक करवा लाग्यां, त्यारे ते शेठ तो पौषध पारीने (पोताना) नित्यकार्योमां जोडाइ गया. ॥ ६७ ॥

क्रमादर्जयतो भाग्यभङ्गीसङ्गीकृतात्मनः । धनधोरणयस्तस्य भूरयोऽप्यभवन्पुनः ॥ ६८ ॥

अन्वयः—भाग्य भंगी संगीकृत आत्मनः तस्य क्रमात् अर्जयतः पुनः अपि भूरयः धन धोरणयः अभवन्. ॥ ६८ ॥

अर्थः—भाग्योनी श्रेणिमां जोडेलो छे आत्मा जेणे, एवा ते शेठने अनुक्रमे व्यापार करतां थकां फरीने पाछी घणी धननी श्रेणिओ प्राप्त थइ. ॥ ६८ ॥

स कदाचिदवस्वापविद्याविच्चोरचक्रराट् । एकं तल्लोप्त्रतो हारं विक्रेतुं प्राप तां पुरोम् ॥ ६९ ॥

अन्वयः—कदाचित् अवस्वाप विद्या वित् सः चौर चक्र राट् तत् लोप्त्रतः एकं हारं विक्रेतुं तां पुरीं प्राप. ॥ ६९ ॥
अर्थः—पछी एक दिवसे अवस्वापिनी विद्याने जाणनारो ते चोरशिरोमणि ते चोरेली वस्तुओमांथी एक हार वेचवामाटे ते नगरीमां आव्यो. ॥ ६९ ॥

**तं हारं श्रेष्ठिनस्तस्य वणिक्पुत्रो धनाभिधः । उपलक्ष्यार्पयामास तलारक्षाय तस्करम् ॥ ७० ॥**

अन्वयः—धन अभिधः वणिक् पुत्रः तस्य श्रेष्ठिनः तं हारं उपलक्ष्य, तस्करं तलारक्षाय अर्पयामास. ॥ ७० ॥
अर्थः—त्यारे धननामना एक वणिक्पुत्रे (वाणोतरे) शेठनो ते हार ओळखीने ते चोरने कोटवाळने सोंपी दीधो, ॥ ७० ॥

**तद्विज्ञाय द्रुतं गत्वा श्रेष्ठी तत्र कृपामयः । स्वं वणिक्पुत्रमाक्षिप्य तलारक्षमदोऽवदत् ॥ ७१ ॥**

अन्वयः—तत् विज्ञाय कृपामयः श्रेष्ठी द्रुतं तत्र गत्वा, स्वं वणिक्पुत्रं आक्षिप्य तलारक्षं अदः अवदत्. ॥ ७१ ॥
अर्थः—ते हकीकत जाणीने ते दयाळु शेठे तुरत त्यां जइने, तथा पोताना ते वाणोतरने धमकावीने, कोटवाळने एम कह्युं के,

**धनोऽयं नैव जानाति चौरव्यतिकरात्पुरा । अस्मै महात्मने मूल्यान्मया हारोऽयमर्पितः ॥ ७२ ॥**

अन्वयः—अयं धनः न एव जानाति, चौर व्यतिकरात् पुरा मया अस्मै महात्मने अयं हारः मूल्यात् अर्पितः. ॥ ७२ ॥
अर्थः—आ धनने कंइ खबरज नथी, केमके चोरी थया पेहेलांज में आ महात्माने आ हार किम्मत लेइ वेचाथी आप्यो छे.

तदयं मुच्यतां मास्मिन्नुच्यतां चौर्यदुर्यशः । रोहिणीयोगमात्रात्किं स्यात्कलङ्कीन्दुवद्रविः ॥ ७३ ॥

अन्वयः–तत् अयं मुच्यतां? अस्मिन् चौर्य दुर्यशः मा उच्यतां? रोहिणी योग मात्रात् रविः किं इंदुवत् कलंकी स्यात्? ॥७३॥

अर्थः—माटे आने छोडीद्यो? अने तेनापते चोरीनो अपजश न बोलो? केमके फक्त रोहिणीना योगथी सूर्य शुं चंद्रनीपेठे कलंकीत थइ शके? ॥ ७३ ॥

द्वादशव्रतधर्तायं नासत्यं वदतीत्यथ । सुदत्तवचसामुञ्चत्तलारक्षो मलिम्लुचम् ॥ ७४ ॥

अन्वयः–अथ द्वादश व्रत धर्ता अयं असत्यं न वदति, इति सुदत्त वचसा तलारक्षः मलिम्लुचं अमुंचत्. ॥ ७४ ॥

अर्थः—हवे बार व्रतो धारण करनारो आ सुदत्त जूठुं बोले नही, एम विचारी ते सुदत्तना वचनथी कोटवाळे ते चोरने छोडी मेल्यो.

असत्यमपि तत्सत्यं यत्प्राणिहितमित्यसौ । असत्ययापि वाचामुं श्रेष्ठी चौरममूमुचत् ॥ ७५ ॥

अन्वयः—असत्यं अपि यत् प्राणि हितं तत् सत्यं, इति असौ असत्यया वाचा अपि श्रेष्ठी अमुं चौरं अमूमुचत्. ॥ ७५ ॥

अर्थः—असत्य छतां पण जे प्राणिओने हितकारी छे ते सत्य छे, एम विचारी असत्य वचनथी पण शेठे ते चोरने छोडाव्यो.७५

श्रेष्ठी तं भोजयित्वा च वरे दत्त्वा च चीवरे । नाकृत्येषु मतिः कृत्येत्युक्त्वा च प्राहिणोत्कृती ॥७६॥

अन्वयः—च कृती श्रेष्ठी तं भोजयित्वा, च वरे चीवरे दत्वा, अकृत्येषु मतिः न कृत्या, इति उक्त्वा, प्राहिणात्. ॥ ७६ ॥

अर्थः–वळी ते चतुर शेठे तेने भोजन करावीने, तथा बे उत्तम वस्त्रो आपीने, (हवे पछी) अकार्यो करवामां बुद्धि करवी नही

एम कही रवाना कर्यो. ।' ७६ ॥

श्रेष्ठीन्दोरुपकारेण शिक्षया च द्रवन्मनाः । किं स्यादकृत्यमित्येष विज्ञातुं धारयन्धियम् ॥ ७७ ॥
निर्यन्पुराद्बहिर्भागभूमौ शुभ्रप्रभाभिधम् । धर्मोपदेशान्ददतं मुनिराजमलोकत ॥ ७८ ॥ युग्मम् ॥

अन्वयः—श्रेष्ठी इंदोः उपकारेण, च शिक्षया द्रवन्मनाः एषः, अकृत्यं किं स्यात्? इति विज्ञातुं धियं धारयन्, ॥ ७७ ॥ पुरात् निर्यन् बहिः भाग भूमौ, धर्म उपदेशान् ददतं शुभ्रप्रभ अभिधं मुनिराजं अलोकत. ॥ ७८ ॥ युग्मं ॥

अर्थः—ते उत्तम शेठे करेला उपकारथी, तथा तेमनी शिखामणथी कोमळ हृदयवाळा थएला ते चोरे " अकार्य शुं होय? " ए जाणवाने बुद्धि धारण करतां थकां, ॥ ७७ ॥ नगरमांथी निकळीने बहारनी भूमिना भागमां धर्मनो उपदेश देता शुभ्रप्रभनामना मुनिराजने जोया. ॥ ७८ ॥ युग्मं ॥

श्रुत्वा तद्देशनां ज्ञातकृत्याकृत्यविवेचनः । मुनीन्दोस्तस्य पादान्ते दीक्षां दक्षोऽयमग्रहीत् ॥ ७९ ॥

अन्वयः-तत् देशनां श्रुत्वा ज्ञात कृत्य अकृत्य विवेचनः अयं दक्षः तस्य मुनींदोः पादांते दीक्षां अग्रहीत्. ॥ ७९ ॥

अर्थः-तेमनो उपदेश सांभळीने जाणेल छे कार्य अकार्यनो विवेक जेणे एवा ते चतुर चोरे ते मुनिराजनी पासे दीक्षा लीधी. ॥

चारित्रं शुद्धमासेव्य सौधर्मेऽसौ सुरोऽभवत् । सुदत्तस्तु विपद्यायमभवत्त्सचिवस्तव ॥ ८० ॥

अन्वय –असौ शुद्धं चारित्रं आसेव्य सौधर्मे सुरः अभवत्, अयं सुदत्तः तु विपद्य तव सचिवः अभवत्. ॥ ८० ॥

अर्थः–पछी ते शुद्ध चारित्र पाळीने सौधर्म देवलोकमां देव थयो, अने ते सुदत्त पण मरण पामीने आ तारो मंत्री थयो. ॥ ८० ॥

**संपत्सु ह्रियमाणासु यद्बभञ्ज न पौषधम् । पदे पदे तदत्रायं विचित्राः प्राप संपदः ॥ ८१ ॥**

अन्वयः–संपत्सु ह्रियमाणासु यत् पौषधं न बभंज, तत् अत्र पदे पदे अयं विचित्राः संपदः प्राप. ॥ ८१ ॥

अर्थः—संपत्ति चोराया छतां पण (तेणे) पौषधव्रत भांग्युं नही, तेथी अहीं पगले पगले ते विविध प्रकारनी संपदा पाम्यो. ८१

**स तु चौरः सुरीभूतः स्मरन्नुपकृतीः कृती । चिन्तार्ताय ददौ रत्नं प्रस्तावं प्राप्य मन्त्रिणे ॥ ८२ ॥**

अन्वयः–सुरीभूतः सः कृती चौरः तु उपकृतीः स्मरन् प्रस्तावं प्राप्य चिंतार्ताय मंत्रिणे रत्नं ददौ. ॥ ८२ ॥

अर्थः–देवभव पामेला ते कृतज्ञ चोरे पण उपकारने याद करीने प्रसंग मेळवी आ चिंतातुर थयेला मंत्रिने रत्न आप्युं. ॥ ८२ ॥

**प्रभो द्रक्ष्यति तं मन्त्रीत्युक्ते राज्ञा मुनिर्जगौ । मन्त्रिणो जीवितान्ते तद्दर्शनं भावि मुक्तये ॥ ८३ ॥**

अन्वयः—(हे) प्रभो! तं मंत्री द्रक्ष्यति? इति राज्ञा उक्ते मुनिः जगौ, मंत्रिणः जीवित अंते मुक्तये तत् दर्शनं भावि. ॥ ८३ ॥

अर्थः—हे भगवन! ते देवने मंत्री शुं जोइ शकशे? एम राजाए कहेवाथी ते मुनिए कह्युं के, मंत्रिना जीवने अंते मोक्ष मेळववामां साधनरूप ते देवनुं तेने दर्शन थशे. ॥ ८३ ॥

**यतो नन्दीश्वरे देवान्नन्तुमस्याभिलाषिणः । समयज्ञसुरानीतविमानस्थस्य गच्छतः ॥ ८४ ॥**

शुद्धध्यानलयस्यान्तकृतकेवलितायुजः । लवणाब्धेरुपर्येव मुक्तिर्भूप भविष्यति ॥ ८५ ॥ युग्मम् ॥

अन्वयः—(हे) भूप! यतः नंदीश्वरे देवान् नंतुं अभिलाषिणः, समयज्ञ सुर आनीत विमानस्थस्य गच्छतः अस्य, ॥ ८४ ॥ शुद्ध ध्यान लयस्य, अंतकृत केवलिता युजः, लवण अब्धेः उपर्येव मुक्तिः भविष्यति. ॥ ८५ ॥ युग्मं ॥

अर्थः—हे राजन्! केमके नंदीश्वर द्वीपमां रहेली ( तीर्थंकरप्रभुओनी शाश्वती प्रतिमाओने ) वांदवानी इच्छावाळा, तथा समयने जाणनारा ते देवे लावेलां विमानमां बेसीने जता, ॥ ८४ ॥ अने निर्मल ध्यानमां रहेला, तथा अंतकृत केवलिपणुं पामेला आ मंत्रीनो लवणसमुद्र उपरज मोक्ष थशे. ॥ ८५ ॥ युग्मं ॥

इत्याकर्ण्य मुनेर्वाचमुदञ्चद्धर्मबुद्धयः । सर्वेऽप्युर्वीश्वराद्यास्ते सानन्दा मन्दिराण्यगुः ॥ ८६ ॥

अन्वयः—इति मुनेः वाचं आकर्ण्य उदंचत् धर्मबुद्धयः, उर्वीश्वर आद्याः ते सर्वे अपि सानंदाः मंदिराणि अगुः. ॥ ८६ ॥

अर्थः—एरीतनी मुनिनी वाणी सांभळीने प्रगट थयेली धर्मबुद्धिवाळा, राजाआदिक तेओ सघळा आनंद सहित ( पोत पोताने ) स्थानके गया. ॥ ८६ ॥

एवं प्राक्पुण्यपूर्णर्द्धिमित्रानन्दनिदर्शनात् । भजन्तु भवपेषाय पौषधे सुधियो धियम् ॥ ८७ ॥

अन्वयः—एवं प्राक् पुण्य पूर्ण ऋद्धि मित्रानंद निदर्शनात् सुधियः भव पेषाय पौषधे धियं भजंतु. ॥ ८७ ॥

अर्थः—एरीते पूर्वे करेलां पुण्यथी मळेली समृद्धिवाळा मित्रानंद मंत्रिना उदाहरणथी उत्तम बुद्धिवानोए संसारनुं छेदन करवा-

माटे पौषध व्रतमां बुद्धिने धारण करवी. ॥ ८७ ॥

**दानं चतुर्विधाहारवस्त्रपात्रौकसां मुनौ । शिक्षाव्रतं तदतिथिसंविभागं तुरीयकम् ॥ ८८ ॥**

अन्वयः—चतुर्विध आहार वस्त्र पात्र ओकसां मुनौ दानं, तत् तुरीयकं अतिथिसंविभागं शिक्षा व्रतं. ॥ ८८ ॥

अर्थः—चार प्रकारना आहार, वस्त्र, पात्र तथा उपाश्रयोनुं मुनिओने जे दान आपवुं, तेने चोथुं अतिथि संविभागनामनुं शिक्षाव्रत कहेलुं छे. ॥ ८८ ॥

**एकावयवतोऽप्येतत्सेवितं श्रद्धयाधिकम् । सुमित्राया इवोन्नत्यै जायते द्वादशं व्रतम् ॥ ८९ ॥**

अन्वयः—एक अवयवतः अपि अधिकं श्रद्धया सेवितं एतत् द्वादशं व्रतं सुमित्रायाः इव उन्नत्यै जायते. ॥ ८९ ॥

अर्थः—एक देशथी पण अधिकपणे श्रद्धापूर्वक सेवेलुं आ बारमुं व्रत सुमित्रानीपेठे उन्नतिमाटे थाय छे. ॥ ८९ ॥

**तद्यथा पृथिवीभूषा श्रीवसन्तपुराभिधम् । पुरन्दरपुरश्रीणां विवर्तो वर्तते पुरम् ॥ ९० ॥**

अन्वयः—तद्यथा—पृथिवी भूषा, पुरंदर पुरश्रीणां विवर्तः श्रीवसंतपुर अभिधं पुरं वर्तते. ॥ ९० ॥

अर्थः—ते सुमित्रानुं उदाहरण नीचेमुजब छे—पृथ्वीने शोभावनारुं, इंद्रनी नगरीनी लक्ष्मीना घेरावा सरखुं श्रीवसंतपुरनामनुं नगर छे.

**विक्रमाक्रान्तदिक्चक्रः क्ष्माशक्रो विक्रमाभिधः । नृपः । कृपापवित्रोऽभूत्तत्र क्षत्रशिरोमणिः ॥ ९१ ॥**

अन्वयः—तत्र विक्रम आक्रांत दिक् चक्रः क्ष्मा शक्रः कृपा पवित्रः, क्षत्र शिरः मणिः विक्रम अभिधः नृपः अभूत्. ॥ ९१ ॥
अर्थः—ते नगरमां पराक्रमथी जीतेल छे दिशाओनो समूह जेणे, पृथ्वीपर इंद्रसमान, अने क्षत्रीओमां शिरोमणि विक्रमनामे राजा हतो.

**तन्मन्त्रीशो वसुर्जज्ञे यद्बुद्धिभरनीरजे । राज्यलक्ष्मीः सुखं तस्थौ विकाशाढये दिवानिशम् ॥ ९२ ॥**

अन्वयः—वसुः तत् मंत्रीशः जज्ञे, विकाश आढये यत् बुद्धि भर नीरजे राज्य लक्ष्मीः दिवानिशं सुखं तस्थौ. ॥ ९२ ॥
अर्थः—वसुनामे तेनो मंत्रीश्वर हतो, के जेनी बुद्धिना समूहरूपी विकस्वर कमलपर राज्यलक्ष्मी हमेशां सुखेथी रहेती हती.॥९२॥

**जिनदासाभिधः श्रेष्ठी तस्य पृथ्वीपतेः प्रियः । बभूव तीर्थकृद्धर्मधौरेयः श्रेयसां निधिः ॥ ९३ ॥**

अन्वयः—तस्य पृथ्वी पतेः प्रियः, तीर्थकृत् धर्म धौरेयः, श्रेयसां निधिः जिनदास अभिधः श्रेष्ठी बभूव. ॥ ९३ ॥
अर्थः—ते राजाने व्हालो, तथा जिनधर्ममां अग्रेसर, अने कल्याणना भंडारसरखो जिनदासनामनो शेठ हतो. ॥ ९३ ॥

**तदर्जितैरसंख्यातैः स्वर्णरत्नैरपि ध्रुवम् । निष्पाद्येते क्षितौ मेरुरोहणावपरावपि ॥ ९४ ॥**

अन्वयः—तत् अर्जितैः असंख्यातैः स्वर्ण रत्नैः अपि ध्रुवं क्षितौ अपरौ मेरु रोहणौ अपि निष्पाद्येते. ॥ ९४ ॥
अर्थः—तेणे मेळवेलां असंख्यातां स्वर्ण अने रत्नोथी पण खरेखर पृथ्वीपर बीजा मेरु अने रोहणाचल पण बनावी शकाय. ॥

**यक्षराजो धनाध्यक्ष इत्येव ख्यातिमर्हति । धनदो जिनदासस्तु स स्तुतोऽर्थिगणैरपि ॥ ९५ ॥**

अन्वयः—यक्ष राजः धन अध्यक्षः इति एव ख्यातिं अर्हति, जिनदासः तु धनदः, इति अर्थि गणैः अपि स्तुतः. ॥ ९५ ॥

अर्थः—कुबेर तो धनना मालीकपणानीज प्रख्यातिने लायक छे, अने आ जिनदास तो धन आपनारो छे, एम याचकोना समूहो तेनी स्तुति करता हता. ॥ ९५ ॥

**धनस्य सार्थवाहस्य सुतां काशिनिवासिनः । ख्यातां रत्नवतीं नाम्ना व्यवहारी व्युवाह सः ॥ ९६ ॥**

अन्वयः—काशि निवासिनः धनस्य सार्थवाहस्य रत्नवतीं नाम्ना ख्यातां सुतां सः व्यवहारी व्युवाह. ॥ ९६ ॥

अर्थः—काशीनगरीना रहेवासी धननामना सार्थवाहनी रत्नवती नामनी प्रख्यात पुत्रीने ते व्यापारी परण्यो हतो. ॥ ९६ ॥

**जिनदासस्य विश्वासपात्रं लक्ष्मीधराभिधः । विप्रो बभूव भ्रातेव चरमः परमः सुहृत् ॥ ९७ ॥**

अन्वयः—जिनदासस्य लक्ष्मीधर अभिधः विप्रः विश्वास पात्रं चरमः भ्राता इव परमः सुहृत् बभूव. ॥ ९७ ॥

अर्थः—ते जिनदासनो लक्ष्मीधरनामनो ब्राह्मण विश्वासु अने न्हाना भाइ सरखो परम मित्र हतो. ॥ ९७ ॥

**न मन्त्री न कलत्रं न पुत्रो धात्रीपतेः पुनः । नान्यत्किंचिच्च तस्याभूज्जिनदास इव प्रियम् ॥ ९८ ॥**

अन्वयः—पुनः तस्य धात्री पतेः जिनदासः इव, न मंत्री, न कलत्रं, न पुत्रः. च अन्यत् किंचित् न प्रियं अभूत्. ॥ ९८ ॥

अर्थः—वळी ते राजाने ते जिनदासनीपेठे, नही मंत्री, नही स्त्री, नही पुत्र, के बीजुं कंइ पण प्रिय न्होतुं. ॥ ९८ ॥

**मित्रे नृपः कदाप्यत्र मन्त्रितामपि दास्यति । राजमन्त्रीति तं हन्तुं विरुद्धं विदधे मनः ॥ ९९ ॥**

अन्वयः—नृपः कदापि अत्र मित्रे मंत्रितां अपि दास्यति, इति राज मंत्री तं हंतुं विरुद्धं मनः विदधे. ॥ ९९ ॥

अर्थः—राजा कोइ पण दिवसे (पोताना) आ मित्रने मंत्रीनी पदवी पण आपी देशे, एम विचारी ते राजानो मंत्री ते जिनदासने मारवाने विरुद्ध विचार करतो हतो. ॥ ९९ ॥

**जिनदासस्तु दाक्ष्येण परचित्तोपलक्षकः । चक्षुर्वचोविकारेण तं विरुद्धमबुध्यत ॥ १०० ॥**

अन्वयः—दाक्ष्येण पर चित्त उपलक्षकः जिनदासः तु चक्षुः वचः विकारेण तं विरुद्धं अबुध्यत. ॥ १०० ॥

अर्थः—चतुराइथी परना हृदयने ओळखनारा ते जिनदासे तो आंखोना तथा वचनोना विकारथी ते मंत्रीने शत्रुतरीके जाणी लीधो.

**ततो भूपालमापृच्छ्य तीर्थयात्रापदेशतः । पत्नीं रत्नवतीं प्रैषीदसौ पितृगृहं प्रति ॥ १ ॥**

अन्वयः—ततः भूपालं आपृच्छ्य तीर्थ यात्रा अपदेशतः असौ रत्नवतीं पत्नीं पितृगृहंप्रति प्रैषीत्. ॥ १ ॥

अर्थः—पछी राजानी रजा लेइने तीर्थयात्राना मिषथी तेणे पोतानी पत्नी रत्नवतीने (तेणीना) पिताने घेर मोकली दीधी. ॥१॥

**अथ चौरच्छलेनासौ तमालब्धुं कृतादरः । मन्त्री निशि तदावासमार्गं भृत्यैररोधयत् ॥ २ ॥**

अन्वयः—अथ असौ मंत्री चौर च्छलेन तं आलब्धुं कृत आदरः निशि तत् आवासमार्गं भृत्यैः अरोधयत्. ॥ २ ॥

अर्थः—पछी ते मंत्रीए चोरना मिषथी तेने पकडवाने सावधान रहीने रात्रिए तेना घरना मार्गने चाकरोवडे रोकी राख्यो. ॥ २ ॥

मत्वेति कर्मकृद्वेषः सह लक्ष्मीधरेण सः । प्रभाववन्ति रत्नानि गृहीत्वा निःसृतः पुरात् ॥ ३ ॥

अन्वयः—इति मत्वा कर्मकृत् वेषः सः प्रभाववंति रत्नानि गृहीत्वा लक्ष्मीधरेण सह पुरात् निःसृतः ॥ ३ ॥

अर्थः—एम जाणीने नोकरनो वेष लेइ ते जिनदास शेठ प्रभाविक रत्नो लेइने ( पोताना मित्र ) लक्ष्मीधरनी साथे नगरमांथी निकळी गयो. ॥ ३ ॥

अजानन्नपि पन्थानं गच्छन्नेष निरन्तरम् । अरण्ये पतितः क्वापि तृष्णातरललोचनः ॥ ४ ॥

अन्वयः—पंथानं अजानन् अपि निरंतरं गच्छन् एषः तृष्णा तरललोचनः क्व अपि अरण्ये पतितः ॥ ४ ॥

अर्थः-मार्ग नही जाणतां छतां पण निरंतर चालतो ते शेठ तृषाथी चपल चक्षुओवाळो थयो थको कोइक जंगलमां जइ चड्यो.

तत्र वस्त्रलवाबद्धां रत्नालीं सुहृदः करे । रीणोऽयमर्पयामास जीवितव्यमिवात्मनः ॥ ५ ॥

अन्वयः—तत्र आत्मनः जीवितव्यं इव वस्त्र लव आबद्धां रत्न आलिं रीणः अयं सुहृदः करे अर्पयामास. ॥ ५ ॥

अर्थः—त्यां पोताना जीवितव्य सरखी, अने वस्त्रना टुकडामां बांधेली ते रत्नोनी श्रेणिने, गभरायेला ते शेठे मित्रना हाथमां सोंपी.

क्वापि पश्यन्पयः कूपे रत्नलोभाद्द्विजेन सः । कराभ्यां पातितः प्रेर्य विश्वासः कोऽस्तु जीवताम् ॥ ६ ॥

अन्वयः—क्व अपि कूपे पयः पश्यन् सः रत्न लोभात् द्विजेन कराभ्यां प्रेर्य पातितः, जीवतां विश्वासः कः अस्तु? ॥ ६ ॥

अर्थः—पछी कोइक कूवामां जलने जोता एवा ते शेठने रत्नोना लोभथी ते ब्राह्मणे बन्ने हाथथी हडसेलीने फेंकी दीधो, जीवता माणसनो विश्वास शानो होय? ॥ ६ ॥

**त तदा पतितः कूपे कोऽयमित्यशृणोद्वचः । उपलक्ष्य स्वरेणाथ प्राह रत्नवतीं प्रियाम् ॥ ७ ॥**

अन्वयः—कूपे पतितः सः तदा कः अयं? इति वचः अशृणोत्, अथ स्वरेण प्रियां रत्नवतीं उपलक्ष्य प्राह. ॥ ७ ॥

अर्थः—कूवामां पडेला ते शेठे ते वखते "आ कोण छे?" एवुं वचन सांभळ्युं, पछी स्वरथी पोतानी स्त्री रत्नवतीने ओळखीने ते बोल्यो के, ॥ ७ ॥

**अयि त्वमपि कूपेऽत्र पतितासि कुतः प्रिये । स ते परिजनः क्वास्ति धिग्धिग्विधिविडम्बितम् ॥ ८ ॥**

अन्वयः—अयि प्रिये! त्वं अपि अत्र कूपे कुतः पतिता असि? सः ते परिजनः क्व अस्ति? धिग् धिग् विधिविडंबितं. ॥ ८ ॥

अर्थः—अरे प्रिया! तुं पण आ कुवामां क्यांथी पडी छे? तारोते परिवार क्यां छे? धिक्कार छे! धिक्कार छे! विधातानी विडंबनाने!

**साप्यवस्थागतं कान्तं वीक्ष्य प्राप्तं च संनिधौ । बाष्पं दृशि दधौ दुःखानन्दसंकरसंकटम् ॥ ९ ॥**

अन्वयः—सा अपि अवस्था गतं, च संनिधौ प्राप्तं कांतं वीक्ष्य, दुःख आनंद संकर संकटं बाष्पं दृशि दधौ. ॥ ९ ॥

अर्थः—पछी ते रत्नवती पण आपत्तिमां पडेला, तथा (पोतानी) पासे आवेला (पोताना) स्वामीने जोइने दुःख तथा हर्षथी मिश्रित थयेलां आंसुओ चक्षुमां धरवा लागी. ॥ ९ ॥

मन्वाना धन्यमात्मानं तत्रापि प्रियदर्शनात् । ऊचे सतीशिरोरत्नमियं रत्नवती ततः ॥ १० ॥

अन्वयः—ततः सती शिरः रत्नं इयं रत्नवती तत्र अपि प्रिय दर्शनात् आत्मानं धन्यं मन्वाना ऊचे. ॥ १० ॥

अर्थः—पछी सतीओमां शिरोमणि एवी ते रत्नवती त्यां पण स्वामीना दर्शनथी पोताने धन्य मानतीथकी कहेवा लागी के,

तत्सर्वमटवीमध्ये गृहीतमिह तस्करैः । कान्दिशीकः समग्रोऽपि ययौ परिजनः क्वचित् ॥ ११ ॥

अन्वयः—तत् सर्वं इह अटवी मध्ये तस्करैः गृहीतं, समग्रः परिजनः अपि कांदिशीकः क्वचित् ययौ. ॥ ११ ॥

अर्थः—ते सघळुं अहीं वननी अंदर चोरोए लुंटी लीधुं, अने पछी सघळो परिवार पण गभराइने क्यांक चाल्यो गयो. ॥ ११ ॥

तेषु मद्भोगलुब्धेषु वेगादहमिहापतम् । वरं हि मरणं स्त्रीणां न पुनः शीलखण्डनम् ॥ १२ ॥

अन्वयः—तेषु मद् भोग लुब्धेषु अहं वेगात् इह अपतं, हि स्त्रीणां मरणं वरं, पुनः शील खंडनं न. ॥ १२ ॥

अर्थः—तेओ मारीसाथे भोग भोगववाने लालचु थये छते, हुं एकदम आ कूवामां पडी, केमके स्त्रीओने माटे मृत्यु पामवुं सारुं, परंतु शीलनुं खंडन थवुं सारुं नथी. ॥ १२ ॥

कृतान्तमुखरूपेऽस्मिन्कूपेऽपि पतिता प्रिय । जीवितास्मि भवद्वक्त्रालोकभोक्तव्यकर्मभिः ॥ १३ ॥

अन्वयः—हे प्रिय! कृतांत मुख रूपे अस्मिन् कूपे पतिता अपि भवद् वक्त्र आलोक भोक्तव्य कर्मभिः जीविता अस्मि. ॥१३॥

अर्थः–हे स्वामी! यमना मुखसरखा आ कुवामां पड्या छतां पण, आपनुं मुख जोवाना भोगावळी कर्मोथी हुं जीवती रही छुं. ॥

**कथ्यतां च कथं पातः कूपेऽत्र भवतामपि । सचिवः स च विद्वेषी विदधे किं विरोधतः ॥ १४ ॥**

अन्वयः–च कथ्यतां? अत्र कूपे भवतां अपि कथं पातः? च सः विद्वेषी सचिवः विरोधतः किं विदधे? ॥ १४ ॥

अर्थः–वळी कहो के, आ कुवामां आपनुं पण शाथी पडवुं थयुं? अने ते द्वेषी मंत्रीए विरोधथी शुं कर्युं? ॥ १४ ॥

**जगाद जिनदासोऽथ सचिवे मारणोत्सुके । गृहतः कर्मकृत्कूटादेकोऽहं निशि निःसृतः ॥ १५ ॥**

अन्वयः–अथ जिनदासः जगाद, मारण उत्सुके सचिवे अहं कर्मकृत् कूटात् एकः गृहतः निशि निःसृतः. ॥ १५ ॥

अर्थः–पछी जिनदासे कह्युं के ते मंत्री ज्यारे मारवाने उद्यमवंत थयो, त्यारे हुं नोकरनो वेष लेइ एकाकी घरमांथी रात्रीए नीकळी गयो.

**निरन्तरविहारेण कान्तारेऽत्र समागतः । तृषितोऽस्मिन्पयः पश्यन्पादस्खलनतोऽपतम् ॥ १६ ॥**

अन्वयः–निरंतर विहारेण अत्र कांतारे समागतः, तृषितः अस्मिन् पयः पश्यन् पाद स्खलनतः अपतं. ॥ १६ ॥

अर्थः–पछी निरंतर चालतोथको हुं आ वनमां आवी चड्यो, तथा तृषा लागवाथी आ कुवामां जल जोतोथको पग सरीपडवाथी (अंदर) पडी गयो. ॥ १६ ॥

**अनुक्तमिवदौष्टयस्य तदा तस्यातिसत्त्वतः । कूपेऽस्मिन्निर्जलेऽप्यम्भो नाभिदघ्नं ददुः शिराः ॥ १७ ॥**

अन्वयः-तदा अनुक्त मित्र दौष्टयस्य तस्य अति सत्त्वतः अस्मिन् निर्जले अपि कूपे शिराः नाभिदघ्नं अंभः ददुः. ॥ १७ ॥

अर्थः-ते समये मित्रनो दोष नही बोलनारा एवा ते जिनदासशेठना अतिशयथी ते निर्जल कूवामां पण सरवाणीओए दुंटीसुधी-नुं जल आप्युं. ॥ १७ ॥

**अथ तौ प्रथितस्वेदखेदतृष्णापरम्परौ । जितक्षीरेण नीरेण तेन प्रीतिं परां गतौ ॥ १८ ॥**

अन्वयः-अथ प्रथित स्वेद खेद तृष्णा परंपरौ तौ जित क्षीरेण तेन नीरेण परां प्रीतिं गतौ. ॥ १८ ॥

अर्थः—पछी थयेल छे, पसीनानी, थाकनी तथा तृषानी परंपरा जेओने एवा तेओ बन्ने दूधने पण जीतनारां ते जलवडे परम आनंद पाम्या. ॥ १८ ॥

**अथ कूपेऽत्र केनापि सज्जरज्जुनियन्त्रितः क्षिप्तोऽम्भःकृतये कुम्भः पुण्यकुम्भ इवैतयोः ॥ १९ ॥**

अन्वयः-अथ अत्र कूपे अंभः कृतये एतयोः पुण्य कुंभः इव, सज्ज रज्जु नियंत्रितः कुंभः केन अपि क्षिप्तः. ॥ ॥ १९ ॥

अर्थः-एवामां ते कूवामां जल लेवामाटे, तेओ बन्नेना पुण्यकुंभनी पेठे दोरीमां बांधेलो घडो कोइए नाख्यो. ॥ १९ ॥

**ततोऽन्तः कुम्भरोधेन तौ मत्वा तेन धीमता । मेलयित्वा जनान्कृष्टौ कूपान्मृत्योर्मुखादिव ॥ २० ॥**

अन्वयः-ततः अंतः कुंभ रोधेन तौ मत्वा तेन धीमता जनान् मेलयित्वा मृत्योः मुखात् इव कूपात् कृष्टौ. ॥ २० ॥

अर्थः—पछी अंदरथी घडो पकडी राखवाथी, तेओ बन्नेने अंदर पडेला जाणीने ते बुद्धिवाने लोकोने एकठा करीने, मृत्युना

मुखमांथी जेम, तेम ते कूवामांथी (बहार) खेंची कहाड्या. ॥ २० ॥

**यावत्तौ निःसृतौ सार्थस्तावदग्रे स्थितो महान् । निर्गतं मिथुनं कूपादिति कोलाहलं व्यधात् ॥ २१ ॥**

अन्वयः—यावत् तौ निःसृतौ, तावत् अग्रे स्थितः महान सार्थः " कूपात् मिथुनं निर्गतं " इति कोलाहलं व्यधात्. ॥ २१ ॥

अर्थः—जेवामां तेओ बन्ने (बहार) निकळ्या, तेवामां आगळ रहेला लोकोना ते म्होटा टोळाए "कूवामांथी जोडकुं निकळ्युं" एम कोलाहल कर्यो. ॥ २१ ॥

**तच्छब्दात्कौतुकी सार्थवाहोऽपि द्रुतमागतः । सुतां पतियुतामग्रे पश्यन्मनसि विस्मितः ॥ २२ ॥**

अन्वयः—तत् शब्दात् कौतुकी सार्थवाहः अपि द्रुतं आगतः, अग्रे पति युतां सुतां पश्यन् मनसि विस्मितः. ॥ २२ ॥

अर्थः—ते कोलाहलथी ते कौतुक जोवानी इच्छावाळो ते सार्थवाह पण तुरत (त्यां) आव्यो, तथा आगळ (पोताना) पति सहित पुत्रीने जोइने मनमां आश्चर्य पाम्यो. ॥ २२ ॥

**धनाख्यं जिनदासोऽपि सार्थवाहं निरीक्ष्य तम् । श्वशुरोऽयमिति ज्ञात्वा नमश्चक्रे चमत्कृतः ॥ २३ ॥**

अन्वयः—जिनदासः अपि तं धन आख्यं सार्थवाहं निरीक्ष्य, अयं श्वशुरः इति ज्ञात्वा चमत्कृतः नमश्चक्रे. ॥ २३ ॥

अर्थः—जिनदासे पण ते धन नामना सार्थवाहने जोइने, आ तो मारा ससरा छे, एम जाणीने आश्चर्य पामी नमस्कार कर्यो.

**ननाम नितरां प्रीत्या पितरं रत्नवत्यपि । अहो भाग्यस्य सौरभ्यं चिन्तयन्ती स्वचेतसि ॥ २४ ॥**

अन्वयः—अहो! भाग्यस्य सौरभ्यं! (इति) स्वचेतसि चिंतयंती रत्नवती अपि नितरां प्रीत्या पितरं ननाम. ॥ २४ ॥

अर्थः—अहो! भाग्यनी केवी खुबी छे? एम पोताना मनमां चिंतवती रत्नवतीए पण अत्यंत आनंदथी (पोताना) पिताने नमस्कार कर्यो. ॥ २४ ॥

**अथास्मै सार्थवाहाय किमेतदिति पृच्छते । जिनदासः स्ववृत्तं तदादितोऽपि न्यवेदयत् ॥ २५ ॥**

अन्वयः—अथ एतत् किं? इति पृच्छते अस्मै सार्थवाहाय तदा जिनदासः अपि स्ववृत्तं आदितः न्यवेदयत्. ॥ २५ ॥

अर्थः—पछी आ ते शुं थयुं? एम पूछता ते सार्थवाहने ते समये जिनदासे पण पोतानुं वृत्तांत पेहेलेथी कही संभळाव्युं. ॥ २५ ॥

**तादृक्स्वजनसंपर्कनिपीतव्यापदूर्मयः । अथ ते तोषपोषेण तस्थुर्वसनवेश्मनि ॥ २६ ॥**

अन्वयः—अथ तादृक् स्वजन संपर्क निपीत व्यापत् ऊर्मयः ते तोष पोषेण वसन वेश्मनि तस्थुः ॥ २६ ॥

अर्थः—पछी तेवी रीतना स्वजनोना मेलापथी नष्ट थयेल छे दुःखनी ऊर्मिओ जेओनी एवा तेओ सर्वे आनंदथी तबूओमां रह्या.

**अथास्मिंश्चरिते चित्रे गत्वार्केणेव शंसिते । तद्वीक्षाकौतुकेनेव संध्यायां विधुरुद्ययौ ॥ २७ ॥**

अन्वयः—अथ अस्मिन् चित्रे चरित्रे अर्केण गत्वा शंसिते इव, तत् वीक्षा कौतुकेन इव संध्यायां विधुः उद्ययौ. ॥ २७ ॥

अर्थः—पछी आ आश्चर्यकारक वृत्तांत सूर्ये जइने जाणे कह्यो होय नही! तेम ते जोवाना कौतुकथी जाणे संध्याकाळे चंद्रनो उदय थयो.

**तोयपात्रं गृहीत्वाथ जिनदासो निशागमे । तरूनन्तरयामास देहचिन्ताकृते बहून् ॥ २८ ॥**

अन्वयः–अथ निशा आगमे जिनदासः तोय पात्रं गृहीत्वा देह चिंता कृते बहूम तरूम् अंतरयामास. ॥ २८ ॥

अर्थः–एवामां रात्रि पडवाबाद ते जिनदासशेठ जलनुं पात्र लेइने शरीर चिंतामाटे (जतोथको) घणां वृक्षोने वटावीने (आगळ चाल्यो.)

**अथेन्दुद्युतिभिर्वीक्ष्य सुप्तं कंचिदसौ नरम् । यावद्यात्यग्रतस्तावन्मृतो लक्ष्मीधरः पुमान् ॥ २९ ॥**

अन्वयः—अथ असौ इंदु द्युतिभिः कंचित् नरं सुप्तं वीक्ष्य, यावत् अग्रतः याति, तावत् पुमान् मृतः लक्ष्मीधरः. ॥ २९ ॥

अर्थः—पछी ते जिनदास चंद्रना तेजथी कोइक पुरुषने सुतेलो जोइने, जेवामां तेनी पासे जाय छे, तेवामां ते पुरुषने मृत्यु पामेला लक्ष्मीधर तरीके (ओळख्यो.) ॥ २९ ॥

**मृतमक्षतमेवैनं वीक्ष्यासौ मित्रवत्सलः । भुजङ्गदशनं तस्मिन्निश्चिनोति स्म दुःखितः ॥ ३० ॥**

अन्वयः–अक्षतं एव मृतं एनं वीक्ष्य मित्र वत्सलः असौ दुःखितः तस्मिन् भुजंग दशनं निश्चिनोतिस्म. ॥ ३० ॥

अर्थः–घायल थयाविनाज तेने मृत्यु पामेलो जोइने, मित्रपरना प्रेमवाळा ते जिनदासे दुःख पामीने तेने सर्प दंशेलो छे, एवो निश्चय कर्यो. ॥ ३० ॥

**आदाय स्वान्मणींस्तस्मात्कृष्ट्वा फणिमणिं ततः । तदीयस्पर्शपूतेन पयसा तमजीवयत् ॥ ३१ ॥**

अन्वयः–ततः स्वान् मणीन् आदाय, तस्मात् फणिमणिं कृष्ट्वा तदीय स्पर्श पूतेन पयसा तं अजीवयत्. ॥ ३१ ॥

अर्थः–पछी पोताना मणिओने लेइने, तथा तेमांथी फणामणिने कहाडीने, तेना स्पर्शथी पवित्र थयेलां जलवडे तेणे तेने जीवतो कर्यो.

उपकृत्युपकुर्वाणा ध्रियन्ते धरया न के । अपकृत्युपकारी यस्तेन तु ध्रियते धरा ॥ ३२ ॥

अन्वयः—उपकृति उपकुर्वाणाः के धरया न ध्रियंते? यः अपकृति उपकारी, तेन तु धरा ध्रियते. ॥ ३२ ॥

अर्थः–उपकार करनारपर उपकार करनारा केटला माणसोने पृथ्वी धारण करती नथी? परंतु जे अपकार करनारपर उपकार करे छे, ते माणसज आ पृथ्वीने धारण करेछे. ॥ ३२ ॥

वीक्ष्य लक्ष्मीधरो जीवञ्जिनदासमथाग्रतः । त्रपानतमुखाम्भोजस्तत्सौहार्दमिवानमत् ॥ ३३ ॥

अन्वयः—अथ जीवन् लक्ष्मीधरः अग्रतः जिनदासं वीक्ष्य, तत् सौहार्दं इव, त्रपानत मुख अंभोजः अनमत्. ॥ ३३ ॥

अर्थः–पछी जीवतो थयेलो ते लक्ष्मीधर (पोतानी) आगळ (उभेला) जिनदासने जोइने, तेनी मित्राइनीपेठे लज्जाथी (पोतानुं) मुखकमल नमावीने नम्यो. ॥ ३३ ॥

अथैनमाह माहात्म्यमयो रत्नवतीपतिः । अन्तःप्रेमसुधासिन्धुतरङ्गोत्तरया गिरा ॥ ३४ ॥

अन्वयः—अथ माहात्म्यमयः रत्नवती पतिः, अंतः प्रेम सुधा सिंधु तरंग उत्तरया गिरा एनं आह. ॥ ३४ ॥

अर्थः–पछी ते महिमावंत जिनदासशेठ हृदयनी प्रीतिरूपी अमृत सागरना मोजांसरखी उतम वाणीथी तेने कहेवा लाग्या के.

पादस्खलनतः कूपे पतितोऽहं त्वयोज्झितः । इति किं लज्जसे केन स्वोऽप्यनुम्रियते जनः ॥ ३५ ॥

अन्वयः—पाद स्खलनतः अहं कूपे पतितः, त्वया उज्झितः, इति किं लज्जसे ? स्वः अपि जनः केन अनुम्रियते ? ॥ ३५ ॥
अर्थः—पग सरी पडवाथी हुं कूवामां पडी गयो, अने तें मने तजी दीधो एमां तुं शामाटे शरमाय छे? केमके पोताना संबंधिनी पाछळ पण मरवाने कोण तैयार थाय छे? ॥ ३५ ॥

**मिलितोऽस्मिन्ममारण्ये सार्थवाहोऽधुना धनः । काशीं यास्याम्यहं गच्छ स्वावासं प्रति संप्रति ॥३६॥**

अन्वयः—अस्मिन् अरण्ये अधुना धनः सार्थवाहः मम मिलितः, अहं काशीं यास्यामि, संप्रति स्व आवासंप्रति गच्छ ? ॥ ३६ ॥
अर्थः—आ जंगलमां हमणाज धनसार्थवाह मने मळ्या छे, अने हुं काशी जाउं छुं, अने तुं पण हवे तारे पोताने घेर जा? ३६

**इत्युक्त्वा प्रेषितो विप्रस्त्रपमाणस्तदा ययौ । सहैव सार्थवाहेन सोऽपि वाणारसीमगात् ॥ ३७ ॥**

अन्वयः—इति उक्त्वा प्रेषितः विप्रः तदा त्रपमाणः ययौ, सः अपि सार्थवाहेन सह एव वाणारसीं अगात्. ॥ ३७ ॥
अर्थः—एम कहीने मोकलेलो ते ब्राह्मण ते समये लज्जातुर थयोथको (त्यांथी) चाल्यो गयो, अने ते जिनदास पण ते सर्थवाहनी साथे वाणारसी नगरीमां गयो. ॥ ३७ ॥

**यावल्लक्ष्मीधरो याति वसन्तपुरपत्तनमं । जिनदासवियोगेन तावदार्तोऽस्ति भूपतिः ॥ ३८ ॥**

अन्वयः—लक्ष्मीधरः यावत् वसंतपुर पत्तनं याति, तावत् भूपतिः जिनदास वियोगेन आर्तः अस्ति. ॥ ३८ ॥
अर्थः—हवे ते लक्ष्मीधर जेवामां वसंतपुर नगरमां पहोंच्यो, एवामां राजा ते जिनदासना वियोगथी पीडित थयेलो हतो. ॥ ३८ ॥

इति लक्ष्मीधरो मत्वा गत्वा क्षितिपतेः पुरः । स्वरूपं जिनदासस्य मन्त्रिणश्च न्यवेदयत् ॥ ३९ ॥

अन्वयः—लक्ष्मीधरः इति मत्वा, क्षितिपतेः पुरः गत्वा जिनदासस्य च मंत्रिणः स्वरूपं न्यवेदयत्. ॥ ३९ ॥

अर्थः—लक्ष्मीधरे ते वृत्तांत सांभळीने राजा पासे जइ जिनदासनी तथा मंत्रिनी ते हकीकत जाहेर करी. ॥ ३९ ॥

श्रुत्वेति भूभुजा मन्त्री कारागारे नियन्त्रितः । पश्यतो जिनदासस्य हन्तव्योऽयमिति क्रुधा ॥ ४० ॥

अन्वयः—इति श्रुत्वा, जिनदासस्य पश्यतः अयं हंतव्यः, इति क्रुधा भूभुजा मंत्री कारागारे नियंत्रितः. ॥ ४० ॥

अर्थः—ते हकीकत सांभळीने जिनदासना देखतांज आने मारवो छे, एवा क्रोधथी राजाए ते मंत्रीने केदखानामां पूर्यो. ॥४०॥

अथ जङ्घालकरभारूढो वीरद्वयान्वितः । जगाम जिनदासाय काशीं गुप्तो नृपः स्वयम् ॥ ४१ ॥

अन्वयः—अथ नृपः स्वयं जंघाल करभ आरूढः, वीर द्वय अन्वितः, गुप्तः काशीं जिनदासाय जगाम. ॥ ४१ ॥

अर्थः—पछी ते राजा पोते वेगवाळा उंटपर चडीने बे सुभटो सहित गुप्त रीते काशी नगरीमां जिनदास पासे गयो. ॥ ४१ ॥

कार्यो मन्त्री स एवेति वचो निश्चित्य धर्मधीः । सभार्यः सह भूपेन स वसन्तपुरं ययौ ॥ ४२ ॥

अन्वयः—सः एव मंत्री कार्यः, इति वचः निश्चित्य धर्मधीः सः सभार्यः भूपेन सह वसंतपुरं ययौ. ॥ ४२ ॥

अर्थः—तेनेज मंत्री करवो, एवुं वचन लेइने धर्मबुद्धिवाळो ते जिनदास स्त्रीसहित राजानी साथे (पाछो) वसंतपुरमां गयो. ॥४२॥

सर्वैश्वर्यं नृपादाप्य सचिवायापकारिणे । मन्त्रित्वं स ददौ धीमान्न द्विष्टा ह्युपकारिणः ॥ ४३ ॥

अन्वयः—नृपात् सर्व ऐश्वर्य आप्य सः धीमान् अपकारिणे सचिवाय मंत्रित्वं ददौ, हि उपकारिणः द्विष्टाः न. ॥ ४३ ॥

अर्थः—राजापासेथी सर्व अधिकार मेळवीने ते बुद्धिवान जिनदासे ते अपकार करनारा मंत्रीने मंत्रीपणुं आप्युं, केमके परोपकारी मनुष्यो द्वेषवाळा होता नथी. ॥ ४३ ॥

अथागाद्वनपालोऽत्र वर्धयन्निति भूपतिम् । वनेऽभूत्केवलज्ञानं शङ्करर्षेस्तपस्यतः ॥ ४४ ॥

अन्वयः—अथ वनपालः इति वर्धयन् अत्र भूपतिं आगात्, वने तपस्यतः शंकर ऋषेः केवल ज्ञानं अभूत्, ॥ ४४ ॥

अर्थः—एवामां वनपाल एवी वधामणी आपतो थको त्यां राजा पासे आव्यो के, वनमां तप करता शंकरनामना मुनिराजने केवलज्ञान थयुं छे. ॥ ४४ ॥

तुष्टिदानं प्रदायास्मै वनेऽगाद्विक्रमो नृपः । सहैव जिनदासेन धुर्या धर्मे हि तादृशाः ॥ ४५ ॥

अन्वयः–विक्रमः नृपः अस्मै तुष्टि दानं प्रदाय जिनदासेन सह एव वने अगात्, हि तादृशाः धर्मे धुर्याः. ॥ ४५ ॥

अर्थः—पछी विक्रमराजा तेने तुष्टिदान आपीने जिनदाससहित वनमां गयो, केमके तेवा मनुष्यो धर्ममां अग्रेसर होय छे. ४५

मुनिं नत्वोपदेशं च श्रुत्वावादीददो नृपः । मन्मित्रे जिनदासे किं सापदः संपदः प्रभो ॥ ४६ ॥

अन्वयः–मुनिं नत्वा, च उपदेशं श्रुत्वा नृपः अदः अवादीत्, (हे) प्रभो! मन्मित्रे जिनदासे सापदः संपदः किं? ॥ ४६ ॥

अर्थः–मुनिराजने वांदीने, तथा धर्मोपदेश सांभळीने राजाए एम कह्युं के, हे! भगवन्! (आ) मारा मित्र जिनदासने विपत्तिसहित संपदा केम थइ? ॥ ४६ ॥

**अथ ज्ञानामृताम्भोधिर्दशनद्युतिवीचिभिः । तत्पुण्यवेलाविपिनं प्लावयन्प्रभुरभ्यधात् ॥ ४७ ॥**

अन्वयः–अथ ज्ञान अमृत अंभोधिः प्रभुः, दशन द्युति वीचिभिः तत् पुण्यवेला विपिनं प्लावयन् अभ्यधात्. ॥ ४७ ॥

अर्थः—त्यारे ज्ञानरूपी अमृतना महासागर सरखा ते केवली भगवान दांतोनी कांतिना मोजांओथी तेना पुण्यरूपी किनारापरना बगीचाने सींचताथका बोल्या के, ॥ ४७ ॥

**कौशाम्ब्यां दत्तनामाभून्मातृभक्तो धनी वणिक् । सुमित्राख्या जनन्यस्य दयिता च जयाह्वया ॥ ४८ ॥**

अन्वयः–कौशांब्यां दत्त नामा मातृ भक्तः धनी वणिक् अभूत्, च अस्य सुमित्रा आख्या जननी, जया आह्वया दयिता. ४८

अर्थः—कौशांबीनगरीमां दत्तनामे (एक) मातानी भक्ति करनारो धनवान् वणिक हतो, तेने सुमित्रानामनी माता, तथा जयानामनी स्त्री हती. ॥ ४८ ॥

**दानमेव गृहस्थानां मुख्यो धर्म इति स्फुटम् । स्वगुरोर्वाचमाचख्यौ सुमित्रा सूनवेऽन्यदा ॥ ४९ ॥**

अन्वयः–दानं एव गृहस्थानां स्फुटं मुख्यः धर्मः, इति स्वगुरोः वाचं सुमित्रा अन्यदा सूनवे आचख्यौ. ॥ ४९ ॥

अर्थः—दानज गृहस्थोनो प्रगट रीते मुख्य धर्म छे, एम पोताना गुरुनी वाणी सुमित्राए एक दिवसे (पोताना) पुत्रने कही. ४९

दानोन्मुखं मनो मातुर्मत्वा मतिमतां वरः। आनन्दाज्जननीं नत्वा सभार्यः स व्यजिज्ञपत् ॥ ५० ॥

अन्वयः—मातुः मनः दान उन्मुखं मत्वा मतिमतां वरः सः सभार्यः आनंदात् जननीं नत्वा व्यजिज्ञपत्. ॥ ५० ॥

अर्थः—माताना मनने दानमाटे उत्सुक जाणीने ते उत्तम बुद्धिवान दत्तवणिके स्त्री सहित आनंदथी माताने कह्युं के, ॥ ५० ॥

यथाविधि सुपात्रेषु कृपापात्रेष्वपि स्वयम्। देहि त्वं हि धनं धान्यं त्वत्प्रसादाद् गृहे बहु ॥ ५१ ॥

अन्वयः—सुपात्रेषु, कृपा पात्रेषु अपि यथाविधि त्वं स्वयं धनं धान्यं देहि? हि त्वत् प्रसादात् गृहे बहु. ॥ ५१ ॥

अर्थः—सुपात्रोने तथा दया करवालायक मनुष्योने पण विधिपूर्वक तमो पोते धन धान्य आपो? केमके तमारी कृपाथी (आपणा) घरमां ते घणां छे. ॥ ५१ ॥

सत्फलं नियमान्मत्वेत्येषाभिग्रहमग्रहीत्। स्वेच्छया विधिवद्दानं दत्वा भोक्ष्येऽहमन्वहम् ॥ ५२ ॥

अन्वयः—नियमात् सत्फलं, इति मत्वा एषा, स्व इच्छया अन्वहं विधिवत् दानं दत्वा अहं भोक्ष्ये, इति अभिग्रहं अग्रहीत्.

अर्थः—नियम लेवाथी उत्तम फल मळे छे, एम जाणीने, मारी इच्छा मुजब हमेशां विधिपूर्वक दान आपीने हुं भोजन करीश, एवो तेणीए अभिग्रह लीधो. ॥ ५२ ॥

ततः सुतस्नुषाभ्यां चानुमताभिमतं निजम्। पूरयन्ती मुदा कालं कियन्तं सात्यवाहयत् ॥ ५३ ॥

अन्वयः-ततः सुत स्नुषाभ्यां च अनुमत अभिमतं निजं पूरयंती सा मुदा कियंतं कालं अत्यवाहयत्. ॥ ५३ ॥

अर्थः-पछी पुत्र अने पुत्रवधूए अनुमोदेलां पोतानां वांछितने पूरती एवी ते हर्षथी केटलोक समय निर्गमन करवा लागी. ५३

**दैवज्ञैः कथितेऽत्यर्थमवृष्टे दारुणेऽन्यदा । दुर्भिक्षे सर्वतो जाते जया दत्तमदोऽवदत् ॥ ५४ ॥**

अन्वयः-अन्यदा दैवज्ञैः अत्यर्थं दारुणे अवृष्टे कथिते, सर्वतः दुर्भिक्षे जाते जया दत्तं अदः अवदत्. ॥ ५४ ॥

अर्थः-पछी एक दिवसे ज्योतिषीओए अत्यंत भयंकर अवृष्टि थवानुं कहेवाथी चोतरफथी दुष्काळ थये छते जयाए दत्तने एम कह्युं के,

**मूलेऽपि रौरवः कालोऽपत्यपूर्णं च ते गृहम् । अतः स्वां जननीं दानात्कुटुम्बाधार वारय ॥ ५५ ॥**

अन्वयः—हे कुटुंब आधार ! मूले अपि कालः रौरवः, च ते गृहं आपत्य पूर्णं, अतः स्वां जननीं दानात् वारय? ॥ ५५ ॥

अर्थः—हे ! कुटुंबना आधारभूत स्वामी! मूलमां आ दुष्काळ पण भयंकर छे, अने तमारुं आ घर छयांछोकरांओथी भरेलुं छे, माटे आपनी माताजीने हवे दान देतां अटकावो? ॥ ५५ ॥

**अथ तेन निषिद्धाम्बा सुमित्रा दानतः क्षणात् । निःसत्त्वतामपि ह्यङ्गीकुर्वन्ति स्त्रीजिता नराः ॥ ५६ ॥**

अन्वयः-अथ तेन क्षणात् सुमित्रा अंबा दानतः निषिद्धा, हि स्त्री जिताः नराः निःसत्त्वतां अपि अंगीकुर्वंति. ॥ ५६ ॥

अर्थः—पछी तेणे क्षणवारमां ते सुमित्रामाताने दान आपती अटकावी, केमके स्त्रीने वश थयेला पुरुषो निर्बलपणानो पण

स्वीकार करे छे. ॥ ५६ ॥

**संस्मृत्य नियमं सा स्वं निश्चिकायेति चेतसि । अदत्ते भोज्यमात्रेऽपि न भोक्ष्येऽन्तेऽपि जन्मनः ॥५७॥**

अन्वयः—सा स्वं नियमं संस्मृत्य चेतसि इति निश्चिकाय, भोज्य मात्रे अपि अदत्ते जन्मनः अंते अपि न भोक्ष्ये. ॥ ५७ ॥

अर्थः—(पछी) तेणीए पोताना नियमने याद करीने मनमां एवो निश्चय कर्यो के, भोजन जेटलुं पण दान दीधा विना हुं जीव जतां पण जमीश नहीं. ॥ ५७ ॥

**उपवासाष्टकस्यान्ते तस्याः सत्त्वमहानिधेः । वृत्तमज्ञापयद्दत्तं दुर्यशःशङ्किता जया ॥ ५८ ॥**

अन्वयः—सत्त्व महानिधेः तस्याः उपवास अष्टकस्य अंते, दुर्यशः शंकिता जया दत्तं वृत्तं अज्ञापयत्. ॥ ५८ ॥

अर्थः—हिम्मतना महान् भंडारसरखी एवी तेणीने आठ उपवासो थयाबाद अपयशनी शंकावाळी जयाए दत्तने ते वृत्तांत जणाव्यो.

**दत्तेन बन्धुभिः सार्धं निर्बन्धं बध्नताधिकम् । नवमेऽह्नि भोक्तुमुपवेशिता सेत्यचिन्तयत् ॥ ५९ ॥**

अन्वयः—बंधुभिः सार्धं दत्तेन अधिकं निर्बंधं बध्नता नवमे अह्नि भोक्तुं उपवेशिता सा इति अचिंतयत्. ॥ ५९ ॥

अर्थः—पछी बंधुओ सहित ते दत्ते अत्यंत आग्रह करीने नवमे दिवसे भोजन करवामाटे बेसाडेली ते एम चिंतववा लागी के,

**कारणं भोजनत्यागे विदन्नपि सुतः स्वयम् । न मां दापयते किंचिद्धिग्मे दुःकर्मजृम्भितम् ॥ ६० ॥**

अन्वयः—सुतः स्वयं भोजन त्यागे कारणं विदन् अपि मां किंचित् न दापयते, मे दुःकर्म जृंभितं धिक्. ॥ ६० ॥

अर्थः—आ पुत्र पोते मारां भोजन तजवाना कारणने जाणतां छतां पण मने ( दानमाटे ) कंई अपावतो नथी, माटे मारां दुष्कर्मना उदयने धिक्कार छे! ॥ ६० ॥

**तत्स्वभोज्यमिदं किंचित्कस्मैचिच्चेद्ददेऽधुना । तन्मे स्यान्नियमः श्लाघ्योऽश्लाघ्यो न स्याच्च मे सुतः ६१**

अन्वयः-तत् इदं किंचित् स्वभोज्यं चेत् अधुना कस्मैचित् ददे, तत् मे नियमः श्लाघ्यः स्यात्, च मे सुतः अश्लाघ्यः न स्यात्.

अर्थः—माटे आ मारुं किंचित् भोजन आ समये जो हुं कोइने आपुं, तो मारो नियम प्रशंसनीय थाय, अने आ मारा पुत्रनो अपयश न थाय. ॥ ६१ ॥

**ध्यायन्त्येति गृहायातः सहसैव मुनिस्तदा । अदृश्यत तया मूर्तः पुण्यराशिरिवात्मनः ॥ ६२ ॥**

अन्वयः—इति ध्यायंत्या तया आत्मनः मूर्तः पुण्य राशिः इव, सहसा तदा गृह आयातः मुनिः अदृश्यत. ॥ ६२ ॥

अर्थः-एम विचारती ते सुमित्राए पोताना मूर्तिवंत पुण्यना समूह सरखा, अचानक ते समये घेर आवेला मुनिराजने जोया. ६२

**साधो विशुद्धमाहारं गृहाणानुगृहाण माम् । वदन्त्येति सहर्षाश्रु प्रत्यलाभि मुनिस्तया ॥ ६३ ॥**

अन्वयः—(हे) साधो! विशुद्धं आहारं गृहाण? मां अनुगृहाण? इति वदंत्या तया सहर्ष अश्रु मुनिः प्रत्यलाभि. ॥ ६३ ॥

अर्थः—हे मुनिराज! आ शुद्ध आहार ग्रहण करो? अने मारापर कृपा करो? एम बोलती ते सुमित्राए हर्षाश्रुसहित ते मुनि-

राजने प्रतिलाभ्या ॥ ६३ ॥

गन्धाम्बुपुष्पवर्षान्तेऽवदच्छासनदेवता । धन्ये मासोपवासी यत्पारणं कारितस्त्वया ॥ ६४ ॥

तत्ते सत्त्वभवाद्दानाच्छान्ता वृष्टिहृतो ग्रहाः । अस्माद्गर्जिरवाद्दिव्याद् वृष्टो दुर्भिक्षहृद्घनः ॥ ६५ ॥ युग्मम् ॥

अन्वयः—गंध अंबु पुष्प वर्षा अंते शासन देवता अवदत्, हे धन्ये! त्वया यत् मास उपवासी पारणं कारितः, ॥ ६४ ॥ तत् सत्त्व भवात् ते दानात् वृष्टि हृतः ग्रहाः शांताः, अस्मात् दिव्यात् गर्जि रवात् दुर्भिक्ष हृत् घनः वृष्टः. ॥ ६५ ॥ युग्मं ॥

अर्थः—सुगंधि जल तथा पुष्पोनी वृष्टिने अंते शासनदेवीए कह्युं के, हे धन्ये! तमोए जे एक मासना उपवासी मुनिराजने पारणुं कराव्युं, ॥ ६४ ॥ तेथी हिम्मत भरेलां तमारां दानथी वृष्टिने हरनारा ग्रहो शांत थया छे, अने आ दिव्य गर्जारवथी दुष्काळने हरनारो वरसाद वरस्यो छे. ॥ ६५ ॥ युग्मं ॥

अत्रोत्सवे कृते राज्ञा पौरैश्चाक्षतपात्रिभिः । मातरं क्षमयामास नत्वा दत्तो जयान्वितः ॥ ६६ ॥

अन्वयः—अत्र राज्ञा, च अक्षत पात्रिभिः पौरैः उत्सवे कृते, दत्तः जया अन्वितः मातरं नत्वा क्षमयामास. ॥ ६६ ॥

अर्थः—(पछी)त्यां राजाए तथा (हाथमां) अक्षतना पात्रोवाळा नगरना लोकोए महोत्सव करते छते दत्ते जयासहित माताने नमीने खमावी. ॥ ६६ ॥

तेऽथ धर्मं व्यधुः शुद्धं श्रद्धावन्तो निरन्तरम् । भुक्त्वायुस्तत्र जज्ञेऽत्र सुमित्रात्मा नृपो भवान् ॥६७॥

अन्वयः—अथ ते श्रद्धावंतः निरंतरं शुद्धं धर्मं व्यधुः, तत्र आयुः भुक्त्वा सुमित्रा आत्मा अत्र भवान् नृपः जज्ञे. ॥ ६७ ॥
अर्थः—पछी तेओए श्रद्धापूर्वक निरंतर शुद्ध धर्मने आराध्यो, तथा त्यां आयु संपूर्ण करीने ते सुमित्रानो जीव अहीं तुं राजा थयो.

**दत्तात्मा जिनदासोऽभूज्जयात्मा रत्नवत्यपि । दानरोधादभूल्लक्ष्मीस्त्वन्मित्रे सकृदन्तरा ॥ ६८ ॥**

अन्वयः—दत्त अत्मा जिनदासः अभूत्, रत्नवती अपि जयात्मा, दान रोधात् त्वत् मित्रे सकृत् अंतरा लक्ष्मीः अभूत्. ॥ ६८ ॥
अर्थः—ते दत्तनो आत्मा आ जिनदास थयो, अने आ रत्नवती पण जयानो आत्मा थयो, ए रीते दान देवानी अटकायत करवाथी आ तारा मित्रने कंइंक अंतरवाळी लक्ष्मी प्राप्त थइ. ॥ ६८ ॥

**श्रुत्वेति प्राग्भवं स्मृत्वा गुरुं नत्वा गताः पुरम् । धर्मध्यानरताः प्रापुर्नृपाद्यास्ते महोदयम् ॥ ६९ ॥**

अन्वयः—इति श्रुत्वा, प्राग्भवं स्मृत्वा, गुरुं नत्वा नृप आद्याः ते पुरं गताः, धर्म ध्यान रताः महोदयं प्रापुः. ॥ ६९ ॥
अर्थः—ते सांभळीने (तथा जातिस्मरण ज्ञानथी) पूर्व भवने याद करीने, अने गुरुने वांदीने राजाआदिक तेओ नगरमां गया, अने धर्मध्यानमां लीन थइने मोक्षे गया. ॥ ६९ ॥

**इत्याकर्ण्य जनाः सौम्यं सुमित्राया निदर्शनम् । व्रतं सेवध्वमतिथिसंविभागं शुभास्पदम् ॥ ७० ॥**

अन्वयः—(हे) जनाः! इति सुमित्रायाः सौम्यं निदर्शनं आकर्ण्य, शुभ आस्पदं अतिथि संविभागं व्रतं सेवध्वं? ॥ ७० ॥
अर्थः—हे मनुष्यो! एरीते ते सुमित्रानुं मनोहर दृष्टांत सांभळीने कल्याणना स्थानरूप अतिथि संविभाग व्रतने सेवो? ॥ ७० ॥

एवं निशम्य सम्यक्त्वमूलव्रतविचारणाम् । द्विपृष्ठः प्राप सम्यक्त्वं श्राद्धत्वं विजयः पुनः ॥ ७१ ॥

अन्वयः—एवं सम्यक्त्वमूल व्रत विचारणां निशम्य द्विपृष्ठः सम्यक्त्वं प्राप, पुनः विजयः श्राद्धत्वं ॥ ७१ ॥

अर्थः-एरीते सम्यक्त्वमूल बार व्रतोनुं वर्णन सांभळीने द्विपृष्ठवासुदेवे सम्यक्त्व स्वीकार्युं, अने विजये श्रावकपणुं अंगीकारकर्युं.

भूरयोऽप्यभजन्भर्तुः पुरो भद्रकतां जनाः । श्रावकत्वं यतित्वं च चञ्चदुत्सवचञ्चवः ॥ ७२ ॥

अन्वयः—चंचत् उत्सव चंचवः भूरयः अपि जनाः भर्तुः पुरः भद्रकतां, श्रावकत्वं च यतित्वं अभजन् . ॥ ७२ ॥

अर्थः—वळी अति आनंदमां तत्पर थयेला घणा लोकोए प्रभुनी पासे भद्रकपणुं, श्रावकपणुं, तथा मुनिपणुं अंगीकार कर्युं. ॥७२॥

महीमहीनसुकृतां कुर्वन्मोहतमो हरन् । विजहार यशोहारनायको जिननायकः ॥ ७३ ॥

अन्वयः—यशः हार नायकः जिन नायकः महीं अहीन सुकृतां कुर्वन्, मोहतमः हरन्, विजहार. ॥ ७३ ॥

अर्थः—यशरूपी हारना चगदांसरखा जिनेश्वरप्रभु पण पृथ्वीने पुष्ट पुण्यवाळी करताथका, तथा मोहरूपी अंधकारने हरताथका विचरवा लाग्या, ॥ ७३ ॥

देशनापद्पीयूषजीमूतो भूतलं विभुः । क्रमेण जनयामास धर्मबीजाङ्कुराङ्कितम् ॥ ७४ ॥

अन्वयः-देशना पद पीयूष जीमूतः विभुः क्रमेण भूतलं धर्म बीज अंकुर अंकितं जनयामास. ॥ ७४ ॥

अर्थः-देशनानी वाणीरूपी अमृतना वरसादसरखा प्रभु अनुक्रमे पृथ्वीतलने धर्मरूपी बीजना अंकुराओवाळुं करवा लाग्या. ७४

इतश्च भूषयत्युर्वीमखर्वसुकृता पुरी । संपन्नसंपत्संपाता चम्पा तारुण्यवद्दिवः ॥ ७५ ॥

अन्वयः—इतश्च दिवः तारुण्यवत् अखर्व सुकृता, संपन्न संपत् संपाता चंपा पुरी उर्वीं भूषयति. ॥ ७५ ॥

अर्थः–हवे देवलोकनी तरुणावस्थानी पेठे प्रवाहित पुण्यवाळी, तथा संपत्तिओना आगमनवाळी चंपानामनी नगरी पृथ्वीने शोभावे छे.

वसुपूज्ये जयायुक्ते स्वर्गस्थे वासुपूज्यजः । मघवा नामतस्तस्यामवनीमघवाजनि ॥ ७६ ॥

अन्वयः—जया युक्ते वसुपूज्ये स्वर्गस्थे वासुपूज्यजः मघवा नामतः तस्यां अवनी मघवा अजनि. ॥ ७६ ॥

अर्थः—जयादेवी सहित वसुपूज्य राजा स्वर्गे गयाबाद श्रीवासुपूज्यप्रभुना मघवा नामना पुत्र ते नगरीमां राजा थया. ॥ ७३ ॥

कटाक्षपातैः कामस्याकाण्डताण्डवपण्डिता । अभूदलक्ष्यवक्त्रेन्दुलक्ष्मीर्लक्ष्मीस्तदङ्गना॥ ७७ ॥

अन्वयः—कटाक्ष पातैः कामस्य अकांड तांडव पंडिता, अलक्ष्य वक्त्र इंदु लक्ष्मीः लक्ष्मीः तत् अंगना अभूत्. ॥ ७७ ॥

अर्थः–कटाक्षो फेंकवाथीज कामदेवने अचानक नचाववामां चतुर, तथा जेना मुखरूपी चंद्रनी शोभा कोइना पण जोवामां आवी नथी, एवी लक्ष्मीनामनी तेनी स्त्री हती. ॥ ७७ ॥

अनयोर्जयसेनाद्याः सूनवो बहवोऽभवन् । तेषामुपर्यभूत्पुण्यारोहिणी रोहिणी सुता ॥ ७८ ॥

अन्वयः—अनयोः जयसेन आद्याः बहवः सूनवः अभवन, तेषां उपरि पुण्य आरोहिणी रोहिणी सुता अभूत्. ॥ ७८ ॥

अर्थः–तेओने जयसेन आदिक घणा पुत्रो हता, तेओनी उपर अति पुण्यशाली रोहिणीनामनी पुत्री थइ. ॥ ७८ ॥

**स्वस्वव्यवस्थावस्थानश्लाघ्यरुग्वर्णवर्णना । याराजद्रूपराजस्य राजधानीव जङ्गमा ॥ ७९ ॥**

अन्वयः–स्व स्व व्यवस्था अवस्थान श्लाघ्य रुक् वर्ण वर्णना या रूपराजस्य जंगमा राजधानी इव अराजत्. ॥ ७९ ॥

अर्थः—पोतपोतानी व्यवस्थामुजब गोठवाइने रहेली, तथा प्रशंसनीय कांति तथा वर्णवाळी ते रोहिणी रूपराजनी जंगम राजधानी सरखी शोभती हती. ॥ ७९ ॥

**सकलोद्यत्कलावल्लेर्गुणद्रुमवनावनेः । यस्या यशःप्रसूनानि कास्त्रीचक्रे न मन्मथः ॥ ८० ॥**

अन्वयः–सकल उद्यत् कला वल्लेः, गुण द्रुम वन अवनेः यस्याः यशः प्रसूनानि मन्मथः क न अस्त्री चक्रे? ॥ ८० ॥

अर्थः—प्रगट थती सर्व कलाओनी वेलडी सरखी, तथा गुणोरूपी वृक्षोनी वनभूमिसरखी, एवी ते रोहिणीना यशरूपी पुष्पोनो कामदेवे क्यां क्यां शस्त्ररूपे उपयोग न कर्यो? ॥ ८० ॥

**तां मत्तयौवनां वीक्ष्य नृपः समदसंमदः । अस्या योग्यं वरं ख्यात सचिवानूचिवानिति ॥ ८१ ॥**

अन्वयः–मत्त यौवनां तां वीक्ष्य समद संमदः नृपः, अस्याः योग्यं वरं ख्यात? इति सचिवान् ऊचिवान्. ॥ ८१ ॥

अर्थः—प्रगटी निकळेलां यौवनवाळी तेणीने जोइने मदसहित आनंदित थयेला राजाए "आने लायक वर बतावो?" एम मंत्रिओने कह्युं. ॥ ८१ ॥

**ततः सुबुद्धिसिद्धार्थसमुद्रनयवादकाः । चत्वारः सचिवाश्चारुदृक्सम्यग्दृष्टिविष्टपाः ॥ ८२ ॥**

**कलाविलासरूपश्रीकेलिशैलानिलापतीन् । स्थामनामान्वयस्थानैराख्यायेदं न्यवेदयन् ॥ ८३ ॥युग्मम्॥**

अन्वयः—ततः सुबुद्धि सिद्धर्थ समुद्र नयवादकाः चत्वारः सचिवाः, चारुदृक् सम्यग् दृष्ट विष्टपाः ॥ ८२ ॥ कला विलास रूप श्री केलि शैलान् इला पतीन्, स्थाम नाम अन्वय स्थानैः आख्याय इदं न्यवेदयन्. ॥ ८३ ॥ युग्मं ॥

अर्थः–त्यारे सुबुद्धि, सिद्धार्थ, समुद्र तथा नयवादक नामना चार मंत्रीओ, के जेओए पोतानी चीवटभरेली दृष्टिथी सारीरीते जगतने जोयेलुं छे, तेओए, ॥ ८२ ॥ कला, विलास, रूप तथा लक्ष्मीने क्रीडा करवाना पर्वतसरखा राजाओनां पराक्रम, नाम वंश तथा स्थानोनुं वर्णन करीने एम कह्युं के, ॥ ८३ ॥ युग्मं ॥

**स्वामिन्नमी समीभावं भजन्ते भूभुजः श्रिया । नैतत्तु विद्मः कुत्रापि कन्याया रमते मतिः ॥ ८४ ॥**

अन्वयः–(हे) स्वामिन् ! अमी भूभुजः श्रिया समीभावं भजंते, तु एतत् न विद्मः, कन्यायाः मतिः कुत्र अपि रमते. ॥ ८४ ॥

अर्थः–हे स्वामी ! ते (सर्व) राजाओ समृद्धिवडे सरखा छे, परंतु ते हकीकत अमो नथी जाणता के राजकन्यानुं मन कोनापर खुशी छे ?

**स्वयंवरं कुरु ततस्त्वत्कन्येयं यथारुचि । कंचिद्वरं वृणोत्वक्षिपरीक्षकपरीक्षितम् ॥ ८५ ॥**

अन्वयः–ततः स्वयंवरं कुरु ? इयं त्वत्कन्या यथा रुचि अक्षि परीक्षक परीक्षितं कंचित् वरं वृणोतु. ॥ ८५ ॥

अर्थः—माटे आप स्वयंवर करो? के जेथी आ कन्या पोतानी इच्छामुजब आंखोरूपीप रीक्षके परीक्षित करेला कोइक वरने वरीले.

**तथेत्यथ नृपस्तेने तेनेह त्वरितं नृपाः । सर्वेऽपि रूपगर्वेण दूताहूताः समाययुः ॥ ८६ ॥**

अन्वयः—अथ तथा इति नृपाः तेने, तेन इह सर्वे अपि नृपाः त्वरितं दूत आहूताः रूप गर्वेण समाययुः. ॥ ८६ ॥

अर्थः—पछी तेम करवुं ठीक छे, एम कही राजाए स्वयंवरमंडप रचाव्यो, अने तेथी सर्वे राजाओ तुरत दूतो मारफते बोलाव्याथी पोताना रूपना गर्वथी (त्यां) आवी पहोंच्या. ॥ ८६ ॥

**ते तदाहारताम्बूलचेलालंकारढौकनैः । महीभृता मघवता मोदयांचक्रिरे मुदा ॥ ८७ ॥**

अन्वयः—तदा मघवता महीभृता आहार तांबूल चेल अलंकार ढौकनैः ते मुदा मोदयां चक्रिरे. ॥ ८७ ॥

अर्थः—ते वखते ते मघवाराजाए भोजन, तांबूल, वस्त्रो, तथा आभूषणो आपीने तेओने हर्षपूर्वक आनंदित कर्या. ॥ ८७ ॥

**अथार्कं कलशीकर्तुमिव नीते महोन्नतिम् । आनिन्यिरे नरेशास्ते स्वयंवरणमण्डपे ॥ ८८ ॥**

अन्वयः—अथ अर्कं कलशीकर्तुं इव महोन्नतिं नीते स्वयवरण मंडपे ते नर ईशाः आनिन्यिरे. ॥ ८८ ॥

अर्थः—पछी जाणे सूर्यने कलशरूप करवामाटे होय नही, तेम अत्यंत उंचा बांधेला स्वयंवर मंडपमां ते राजाओने लाववामां आव्या.

**न रूपं पापवृत्त्यै स्यादिति वाचामुदाहृतिः । श्रीमान्महेन्द्रसेनाख्यः श्रीकोशलपुरेश्वरः ॥ ८९ ॥**

अन्वयः-रूपं पापकृत्यै न स्यात्, इति वाचां उदाहृतिः, श्री कोशलपुर ईश्वरः श्रीमान् महेंद्रसेन आख्यः. ॥ ८९ ॥

अर्थः—रूप पापाचरण माटे होतुं नथी, एवा वचनना उदाहरण सरखो श्री कोशलपुरनो राजा श्रीमान् महेंद्रसेननामे (त्यां आव्यो हतो.)

**स्वकायकान्तिपीयूषपानानिमिषविष्टपः । सिंहनाथः सुधर्मैकाशिथिलो मिथिलापतिः ॥ ९० ॥**

अन्वयः-स्व काय कांति पीयूष पान अनिमिष विष्टपः, सुधर्म एक अशिथिलः मिथिला पतिः सिंहनाथः. ॥ ९० ॥

अर्थः-पोतानां शरीरनी कांतिरूपी अमृतना पानथी निमेषरहित करेल छे जगत जेणे, तथा उत्तम धर्ममांज आदरवाळो मिथिलानगरीनो सिंहनाथ नामे राजा (आव्यो हतो.) ॥ ९० ॥

**लावण्यामृतसिन्धूर्मितरन्मकरकेतनः । जिनभक्ताभिधः पुंसां रत्नं रत्नपुराधिपः ॥ ९१ ॥**

अन्वयः—लावण्य अमृत सिंधु ऊर्मि तरत् मकर केतनः, पुंसां रत्नं जिनभक्त अभिधः रत्नपुर अधिपः ॥ ९१ ॥

अर्थः—लावण्यरूपी अमृतसागरना मोजांओमां तरता कामदेवसरखो, तथा पुरुषोमां रत्नसमान जिनभक्तनामनो रत्नपुरनो राजा (त्यां आव्यो हतो.) ॥ ९१ ॥

**सुनेत्रानेत्रकुमुदोल्लासलीलाविशारदः । चन्द्रचारुमुखश्चन्द्रपुरेशश्चन्द्रवर्धनः ॥ ९२ ॥**

अन्वयः-सुनेत्रा नेत्र कुमुद उल्लास लीला विशारदः, चंद्र चारु मुखः, चंद्र पुर ईशः चंद्रवर्धनः. ॥ ९२ ॥

अर्थः-स्त्रीओनां नेत्रोरूपी चंद्रविकासी कमलोने विकस्वर करवानी कलामां चतुर, तथा चंद्रसरखा मनोहर मुखवाळो चंद्रपुरनो

चंद्रवर्धन नामे राजा ( त्यां आव्यो हतो. ) ॥ ९२ ॥

**प्रभापल्लवलावण्यपुष्परूपफलद्रुमः । जयसेनो जयत्सेनाराजी राजगृहेश्वरः ॥ ९३ ॥**

अन्वयः–प्रभा पल्लव लावण्य पुष्प रूप फल द्रुमः, जयत् सेना राजी, राजगृह ईश्वरः जयसेनः. ॥ ९३ ॥

अर्थः–कांतिरूपी पल्लवो, लावण्यरूपी पुष्पो, तथा रूपरूपी फलोना वृक्षसरखो, विजय पामतां सैन्यथी शोभतो जयसेननामे राजगृहीनो राजा ( त्यां आव्यो हतो. ) ॥ ९३ ॥

**वहन्पुण्यमहाम्भोधिजलमानुषरत्नताम् । चन्द्रमित्रयशाश्चन्द्रमित्रः काशीपुरीश्वरः ॥ ९४ ॥**

अन्वयः—पुण्य महांभोधि जल मानुष रत्नतां वहन्, चंद्र मित्र यशाः चंद्र मित्रः काशी पुरी ईश्वरः. ॥ ९४ ॥

अर्थः—पुण्यरूपी महासागरमां जलमनुष्यरूपी रत्नपणाने धारण करतो, तथा चंद्र अने सूर्यसरखा यशवाळो चंद्रमित्रनामे काशीपुरीनो राजा पण (त्यां आव्यो हतो.) ॥ ९४ ॥

**अन्येऽपि सुरसंदेहकरदेहद्युतो नृपाः । प्रपञ्चात्पञ्चबाणस्यालंचक्रुर्मञ्चसंचयम् ॥ ९५ ॥**

अन्वयः—सुर संदेह कर देह द्युतः अन्ये अपि नृपाः, पंच बाणस्य प्रपंचात् मंच संचयं अलंचक्रुः. ॥ ९५ ॥ सप्तभिः कुलकं ॥

अर्थः—देवनो संशय उपजावनारी शरीरनी कांतिवाळा बीजा राजाओ पण कामदेवना प्रपंचथी (त्यां) खुरशीओना समूहने शोभावता हता. ॥ ९५ ॥

कुरुजाङ्गलदेशालंकारनागपुरेश्वरः । सूनुः श्रीवीतशोकस्याशोको विद्युत्प्रभाङ्गभूः ॥ ९६ ॥
जगद्दृगिन्द्रियोन्निद्रभोगकर्ममहाफलम् । अलंचकार मञ्चं सोऽप्युदञ्चद्गुणगौरवः ॥ ९७ ॥ युग्मम् ॥

अन्वयः-कुरु जांगल देश अलंकार नागपुर ईश्वरः, श्रीवीतशोकस्य सूनुः, विद्युत्प्रभा अंगभूः, उदंचत् गुण गौरवः, जगत् दृग् इंद्रिय उन्निद्र भोग कर्म महाफलं, सः अशोकः अपि मंचं अलंचकार. ॥ ९६ ॥ ९७ ॥ युग्मं ॥

अर्थः—कुरुजांगल देशना आभूषण सरखा नागपुरनो स्वामी, वीतशोकराजा तथा विद्युत्प्रभाराणीनो पुत्र, प्रगट थता गुणोना गौरववाळो, तथा जगतनी नयनेंद्रियना विशाल भोगकर्मोना महान् फलवाळो ते अशोक राजा पण (त्यां) खुरशीने शोभावतो हतो.

शृङ्गारयन्ती शृङ्गारमप्यङ्गगुणगौरवैः । मदयन्ती मदनमप्यमन्दैर्भावसंमदैः ॥ ९८ ॥
अङ्गनिःस्यन्दिलावण्यमस्याः सर्वाङ्गमेतु माम् । इत्याश्रितेव रत्याधो रत्नोर्व्यां प्रतिमामिषात् ॥ ९९ ॥
रोहिणीयमियं वेति मोहयन्ती निरीक्षकान् । वयस्याभिर्वृता प्राप भूपकन्याथ मण्डपम् १००० त्रिभिर्विशेषकम्

अन्वयः-अंग गुण गौरवैः शृंगारं अपि शृंगारयंती, अमंदैः भाव संमदैः मदनं अपि मदयंती, ।९८। अस्याः अंगनिः स्यंदि लावण्यं सर्वांगं मां एतु, इति रत्न उर्व्यां प्रतिमा मिषात् अधः रत्या आश्रिता इव, ॥ ९९ ॥ इयं रोहिणी, वा इयं, इति निरीक्षकान् मोहयंती, वयस्याभिः वृता नृप कन्या अथ मंडपं प्राप. ॥ १००० ॥ त्रिभिर्विशेषकं ॥

अर्थः–शरीरना गुणोना गौरवथी (पेहेरेला) शृंगरने पण शोभावती, मानसिक उमदा हर्षथी कामदेवने पण उन्मत्त करती, ९८ आना शरीरमांथी झरतुं लावण्य संपूर्णपणे मारामां आवी जाओ, जाणे एवा हेतुथी रत्नोना भूमितलपर पडेलां प्रतिबिंबना मिषथी नीचे चालती रतिवडे आश्रित थएली, ॥ ९९ ॥ आ रोहिणी छे? के आ रोहिणी छे? एम जोनाराओने मूढ करती, अने सखीओथी वींटायेली ते राजपुत्री पण मंडपमां आवी ॥ १००० ॥ त्रिभिर्विशेषकं ॥

**राज्ञामथ गुणग्रामकुलनामनिवेदिनी । दक्षा पुरोऽभवत्तस्या वयस्या मञ्जुभाषिणी ॥ १ ॥**

अन्वयः—अथ राज्ञां गुण ग्राम कुल नाम निवेदिनी, मंजु भाषिणी दक्षा वयस्या तस्याः पुरः अभवत्. ॥ १ ॥

अर्थः—पछी राजाओना गुणोना समूह, कुल, तथा नामो जणावती, मधुर वचनो बोलनारी दक्षा नामनी सखी तेणीनी आगळ (चालवा) लागी. ॥ १ ॥

**पिबन्ती च वमन्ती च लोचनान्तेन भूभुजः । सखीमन्वचलन्मञ्चमध्यवर्त्मनि कन्यका ॥ २ ॥**

अन्वयः—लोचन अंतेन भूभुजः पिबंती च वमंती कन्यका मंच मध्य वर्त्मनि सखीं अन्वचलत्. ॥ २ ॥

अर्थः–चक्षुओना छेडाथी राजाओने पीती तथा वमती एवी ते कन्या खुरशीओनी वच्चेना मार्गमांथी ते सखीनी पाछळ चालती हती.

**नृपेषु ताड्यमानेषु तेषु पञ्चेषुपत्त्रिभिः । स स वीररसाविष्टो हृष्टो यं यं ददर्श सा ॥ ३ ॥**

अन्वयः–पंचेषु पत्रिभिः तेषु नृपेषु ताड्यमानेषु यं यं सा ददर्श, सः सः वीर रस आविष्टः हृष्टः. ॥ ३ ॥

अर्थः—कामदेवना बाणोथी ते राजाओ हणाते छते जे जे राजाने ते जोती हती, ते ते राजा वीररसना आवेशमां आवीने खुशी थतो हतो. ॥ ३ ॥

**यं यमैक्षिष्ट सा श्याममुखापार्श्वनृपद्वयः । अदिनद्वयमध्यस्थदिनवद्दिद्युते स सः ॥ ४ ॥**

अन्वयः—यं यं सा ऐक्षिष्ट, सः सः श्याम मुख पार्श्व नृप द्वयः अदिन द्वय मध्यस्थ दिनवत् दिद्युते. ॥ ४ ॥

अर्थः—जे जे राजाने ते जोती हती, ते ते राजाना, बन्ने पडखाना बन्ने राजाओ श्याम मुखवाळा थयेला होवाथी, बन्ने संध्या काळनी वच्चे रहेला दिवसनीपेठे ते तेजस्वी देखातो हतो. ॥ ४ ॥

**उत्कण्ठाविस्मयप्रीतिदुःखभाजो महीभुजः । तत्र श्रीरिव कुर्वाणा साचलत्क्वचिदस्थिरा ॥ ५ ॥**

अन्वयः—तत्र श्रीः इव मही भुजः उत्कंठा विस्मय प्रीति दुःख भाजः कुर्वाणा क्वचित् अपि अस्थिरा सा अचलत्. ॥ ५ ॥

अर्थः—(ए रीते) त्यां लक्ष्मीनीपेठे (ते) राजाओने, उत्कंठा, आश्चर्य, प्रेम, तथा दुःखवाळा करतीथकी क्यांयें पण थोभ्याविना ते चालवा लागी. ॥ ५ ॥

**स्पृष्ट्वा स्पृष्ट्वा मुमोचाशु तद्दृष्टिरवनीभृतः । रोचमानानपश्यन्ती पुष्पाणीव मधुव्रता ॥ ६ ॥**

अन्वयः—मधुव्रता पुष्पाणि इव, रोचमानान् अवनीभृतः अपश्यंती तद् दृष्टिः स्पृष्ट्वा स्पृष्ट्वा आशु मुमोच. ॥ ६ ॥

अर्थः—भमरी जेम पुष्पोने, तेम (तेणीने) चाहता राजाओने न जोती एवी तेनी दृष्टि, फक्त तेओने स्पर्शी स्पर्शीने तुरत छोडी देवा लागी.

**अशोकं वीतशोकस्य सुतं तस्यै प्रदर्श्य सा । प्रीता सखी समाचख्यौ व्याचख्यौ च गुणोर्मिभिः । ७ ।**

अन्वयः—वीतशोकस्य सुतं अशोकं तस्यै प्रदर्श्य प्रीता सा सखी समाचख्यौ, च गुण ऊर्मिभिः व्याचख्यौ. ॥ ७ ॥

अर्थः-(पछी) वीतशोकराजाना पुत्र अशोकराजाने तेणीने देखाडीने आनंदित थयेली ते सखी बोली, तथा तेना गुणोनुं वर्णन करवा लागी.

**अथास्मिन्दृशमात्मानमानन्दे विस्मये मनः । वपुः सात्विकभावे च मज्जयामास रोहिणी ॥ ८ ॥**

अन्वयः—अथ रोहिणी अस्मिन् दृशं, आनंदे आत्मानं, विस्मये मनः, च सात्विक भावे वपुः मज्जयामास. ॥ ८ ॥

अर्थः—त्यारे रोहिणी तेनापते पोतानी दृष्टिने, आनंदमां आत्माने, आश्चर्यमां मनने, अने सात्विकभावमां शरीरने जोडवा लागी.

**तद्रूपेण तदाकृष्टिमन्त्रज्ञेनेव सत्वरं । आकृष्टा वरमालां सा तत्कण्ठे क्षिपति स्म ताम् ॥ ९ ॥**

अन्वयः—तदा आकृष्टि मंत्रज्ञेन इव तत् रूपेण आकृष्टा सा सत्वरं तत् कंठे तां वरमालां क्षिपतिस्म. ॥ ९ ॥

अर्थः—ते वखते आकर्षणमंत्रनुं जाणे जाणकार होय नही! एवां तेना रूपथी खेंचायेली ते रोहिणीए तुरत तेना कंठमां ते वरमाला धारण करी. ॥ ९ ॥

**तूर्णमर्धासने तस्य कलाबहुलतेजमः । रोहिणी रोहिणीवेन्दोरुपाविक्षन्मुदा ततः ॥ १० ॥**

अन्वयः—ततः कला बहुल तेजसः इंदोः अर्धासने रोहिणी इव (सा) रोहिणी तूर्णं मुदा तस्य उपाविक्षत् . ॥ १० ॥

अर्थः—पछी घणी कळाओ तथा तेजवाळा चंद्रना अर्ध आसनपर रोहिणीनी पेठे ते रोहिणी तुर्त हर्षपूर्वक (ते राजाना अर्धासन पर, बेठी ॥ १० ॥

**तत्कालप्रस्फुरत्तूर्यगीतनृत्यसमाकुलः । पठद्बन्दिगणः प्रीतिमयोऽयं समयोऽभवत् ॥ ११ ॥**

अन्वयः—तत्काल स्फुरत् तूर्य गीत नृत्य समाकुलः, पठत् बंदि गणः, प्रीतिमयः अयं समयः अभवत् .

अर्थः—तत्काळ प्रगट थयेलां वाजित्रो, गीतो, तथा नृत्योथी भरेलो, तथा बिरुदावली बोलता चारणोना समूहवाळो, आनंदमय ते समय थइ पड्यो. ॥ ११ ॥

**भव्यमासीद् गुणज्ञेयमवृणोदुचितं पतिम् । इति स्वयंवरे सर्वैर्भूप्रियैरपि पिप्रिये ॥ १२ ॥**

अन्वयः—भव्यं आसीत्, गुणज्ञा इयं उचितं पतिं अवृणोत्, इति स्वयंवरे सर्वैः भूप्रियैः अपि पिप्रिये. ॥ १२ ॥

अर्थः—सारुं थयुं, के गुणोने जाणनारी आ रोहिणी लायक पतिने वरी छे, एम (कही) स्वयंवरमां आवेला सर्व राजाओ पण हर्षित थया.

**मघवापि मुदात्मीयनामोचितमहोत्सवैः । तयोररचयत्प्रीतः पाणिग्रहणमङ्गलम् ॥ १३ ॥**

अन्वयः—मघवा अपि आत्मीय नाम उचित महोत्सवैः प्रीतः तयोः पाणिग्रहण मंगलं अरचयत् ॥ १३ ॥

अर्थः—पछी ते मघवा राजाए पण पोताना नामने लायक महोत्सवोपूर्वक आनंदित थइने ते बन्नेना विवाहनुं मांगलीक कार्य कर्युं.

**रोहिण्याः पुण्यमाहात्म्यादशेषान्हर्षितान्नृपान् । आवर्ज्य दानसंमानैर्मघवा विससर्ज च ॥ १४ ॥**

अन्वयः-च रोहिण्याः पुण्य माहात्म्यात् हर्षितान् अशेषान् नृपान् दान संमानैः आवर्ज्य मघवा विससर्ज. ॥ १४ ॥

अर्थः-पछी ते रोहिणीना पुण्यना प्रभावथी आनंदित थयेला ते सर्व राजाओने दान तथा सन्मानथी खुशी करीने मघवाराजाए विसर्जन कर्या. ॥ १४ ॥

**वाग्भिर्धर्मैकधुर्याभिर्जिनधर्मानुरक्तया । रोहिण्या जिनधर्मानुरक्तः कान्तोऽपि निर्ममे ॥ १५ ॥**

अन्वयः—जिनधर्मे अनुरक्तया रोहिण्या धर्म एक धुर्याभिः वाग्भिः कांतः अपि जिन धर्म अनुरक्तः निर्ममे. ॥ १५ ॥

अर्थः-पछी जिनधर्ममां रक्त थयेली ते रोहिणीए मनोहर धार्मिक वचनोवडे पोताना ते स्वामिने पण जिनधर्ममां रक्त कर्यो.

**तत्रैव भोगान्भुञ्जानो भूजानिसुतया सह । कुमारः स सुखं तस्थौ दोगुन्दक इवामरः ॥ १६ ॥**

अन्वयः-सः कुमारः दोगुंदकः अमरः इव, भूजानि सुतया सह भोगान् भुंजानः तत्र एव सुखं तस्थौ. ॥ १६ ॥

अर्थः-ते अशोक कुमार पण दोगुंदक देवनी पेठे ते राजकुमारी रोहिणीनी साथे भोगो भोगवतोथको त्यांज सुखेथी रहेवा लाग्यो.

**एत्य क्रमेलकैरब्धिलहरीचक्रमेलकैः । अशोकं वीतशोकस्य पुमांसोऽन्येद्युराह्वयन् ॥ १७ ॥**

अन्वयः-अन्येद्युः अब्धि लहरी चक्र मेलकैः क्रमेलकैः वीतशोकस्य पुमांसः एत्य अशोकं आह्वयन्. ॥ १७ ॥

अर्थः—पछी एक दिवसे महासागरना मोजांओना समूहसरखा उंटोमारफते वीतशोकराजाना माणसोए आवीने अशोक कुमारने बोलाव्यो. ॥ १७ ॥

अशोकोऽपि तदुत्कण्ठो रोहिणीसहितस्ततः । मघवन्तं समापृच्छ्य त्वरितत्वरितं ययौ ॥ १८ ॥

अन्वयः–तत् उत्कंठः अशोकः अपि मघवंतं समापृच्छ्य रोहिणी सहितः ततः त्वरित त्वरितं ययौ. ॥ १८ ॥

अर्थः–माता पिताने मळवाने उत्कंठित थयेलो अशोककुमार पण मघवाराजानी रजा लेइने रोहिणी सहित त्यांथी उतावळो चालतो थयो.

स्नातः स पौरीशृङ्गारसागरोर्मिभिरक्षिभिः । दधौ कुसुमवन्मूर्ध्नि पितृपादनखत्विषः ॥ १९ ॥

अन्वयः–पौरी शृंगार सागर ऊर्मिभिः अक्षिभिः स्नातः सः कुसुमवत् पितृ पाद नख त्विषः मुर्ध्नि दधौ. ॥ १९ ॥

अर्थः–नगरनी स्त्रीओनां शृंगारसागरना मोजांओ सरखा चक्षुओवडे स्नान करेला ते अशोककुमारे पुष्पोनी पेठे पिताजीना चरणोना नखोनी कांतिने ( त्यां पोताना ) मस्तकपर धारण करी. ॥ १९ ॥

राज्ञाप्युत्थाप्य पाणिभ्यामालिङ्ग्योत्थाय च स्वयम् । न्यस्य सिंहासने हर्षाश्रुभिरेवाभ्यषेचि सः । २० ।

अन्वयः—राज्ञा अपि स्वयं उत्थाय सः उत्थाप्य, च पाणिम्यां आलिंग्य सिंहासने न्यस्य हर्ष अश्रुभिः एव अभ्यषेचि. ॥२०॥

अर्थः–राजए पण पोते उभा थइ तेने उठाडीने, तथा बन्ने हाथोवडे भेटीने, अने सिंहासनपर बेसाडीने हर्षना आंसुओथीज तेनो अभिषेक कर्यो. ॥ २० ॥

कारयित्वा कुमारस्य राज्यलब्धिमहोत्सवम् । श्रीसंयमधरोपान्ते प्रवव्राज प्रजापतिः ॥ २१ ॥

अन्वयः—प्रजापतिः कुमारस्य राज्यलब्धि महोत्सवं कारयित्वा श्रीसंयमधर उपांते प्रवव्राज ॥ २१ ॥

अर्थः—(पछी) ते राजाए ते अशोककुमारनो राज्य प्राप्तिनो महोत्सव करावीने श्रीसंयमधरनामना आचार्यपासे दीक्षा लीधी. ॥

**मन्त्रिन्यस्तमहीभारः स रोहिण्या समं नृपः । धर्मशृङ्गारयोरेव सेवयाहर्निशं बभौ ॥ २२ ॥**

अन्वयः—मंत्रि न्यस्त मही भारः सः नृपः अहर्निशं रोहिण्या समं धर्म शृंगारयोः एव सेवया बभौ. ॥ २२ ॥

अर्थः—मंत्रीने पृथ्वीनो भार सोंपीने ते राजा हमेशां रोहिणीराणीनी साथे धर्म अने शृंगाररसनीज सेवाथी शोभवा लाग्यो. ॥

**रसादशोकरोहिण्योः सहेलं खेलतोर्ययुः । ऋतुचक्रेण दधतोर्मुदं कत्यपि वत्सराः ॥ २३ ॥**

अन्वयः—रसात् सहेलं खेलतोः, ऋतु चक्रेण मुदं दधतोः अशोक रोहिण्योः कत्यपि वत्सराः ययुः. ॥ २३ ॥

अर्थः-रसथी आनंदपूर्वक क्रीडा करता, तथा ऋतुओना समूहथी ( आवागमनथी ) आनंद पामता, एवा ते अशोकराजा तथा रोहिणीराणीना केटलांक वर्षो व्यतीत थयां. ॥ २३ ॥

**गुणपालप्रभृतयः सविस्तारगुणास्तयोः । सूनवोऽष्टावभूवन्दिग्भागा भूनभसोरिव ॥ २४ ॥**

अन्वयः-भूनभसोः दिग् भागाः इव, तयोः सविस्तार गुणाः गुणपाल प्रभृतयः अष्टौ सूनवः अभूवन्. ॥ २४ ॥

अर्थः-पृथ्वी अने आकाशनी दिशाओना भागो सरखा तेओने, विस्तारयुक्त गुणोवाळा गुणपाल आदिक आठ पुत्रो थया. ॥

**पुत्र्यश्च गुणमालाद्याश्चतस्रो निश्चितश्रियः । अभूवन्कामभूपालचतुरङ्गचमूसमाः ॥ २५ ॥**

अन्वयः-च काम भूपाल चतुरंग चमू समाः, निचित श्रियः गुणमाला आद्याः चतस्रः पुत्र्यः अभूवन्. ॥ २५ ॥

अर्थः-वळी कामराजानी चतुरंगी सेना सरखी, तथा अति शोभावाळी गुणमाला आदिक चार पुत्रिओ तेओने थइ. ॥ २५ ॥

**धिष्ण्ये राज्ञा सहारूढा गवाक्षे सप्तमे क्षणे । वसन्ततिलकां धात्रीमन्यदा रोहिणी जगौ ॥ २६ ॥**

अन्वयः-अन्यदा धिष्ण्ये सप्तमे क्षणे गवाक्षे राज्ञा सह आरूढा रोहिणी वसंततिलकां धात्रीं जगौ. ॥ २६ ॥

अर्थः—( पछी ) एक दिवसे मनोहर सातमा माळपर झरुखामां राजानी साथे बेठेली ते रोहिणीराणीए वसंततिलकानामनी धावमाताने कह्युं के, ॥ २६ ॥

**अक्षि निक्षिप रथ्यायां मातः किमिदमीक्ष्यते । आमुक्तकेशं स्त्रीवृन्दं करुणस्वरगीतभृत् ॥ २७ ॥**

अन्वयः-(हे) मातः! रथ्यायां अक्षि निक्षिप? आमुक्त केशं, करुण स्वर गीत भृत् इदं स्त्री वृंदं किं ईक्ष्यते? ॥ २७ ॥

अर्थः-हे माताजी! तमो ( नीचे ) रस्तापर नजर करो? के ज्यां छूटा मूकेला केशोवाळो, अने करुणस्वरथी गायन गातो आ स्त्रीओनो समूह केवो देखाय छे! ॥ २७ ॥

**रीत्यन्तरस्फुरत्तूर्यनादप्रमितनर्तनम् । सुव्यक्तस्वस्तिकाकारभुजास्फालनहस्तकम् ॥ २८ ॥**

अन्वयः-रीति अंतर स्फुरत् तूर्य नाद प्रमित नर्तनं, सु व्यक्त स्वस्तिक आकार भुजा आस्फालन हस्तकं, ॥ २८ ॥

अर्थः-(वळी ते स्त्रीओ) कोइक नवीन प्रकारनाज वाजित्रना नादने अनुसरनारुं नृत्य करी रही छे, तथा प्रगटपणे स्वस्तिक

सरखो आकार करीने भुजाओपर पोताना हाथो पछाडी रही छे. ॥ २८ ॥

**भरतादिषु शास्त्रेषु न श्रुतं नेक्षितं क्वचित् । अत्याश्चर्यकरं कुर्वन्त्यमूः किं नाम नाटकम् ॥ २९ ॥ त्रि.**

अन्वयः-भरत आदिषु शास्त्रेषु क्वचित् न श्रुतं, न ईक्षितं, अति आश्चर्यकरं किं नाम नाटकं अमूः कुर्वंति?॥ २९ ॥ त्रिभिर्विशेषकं

अर्थः—वळी भरत आदिकना नाट्यशास्त्रोमां जे क्यांये सांभळ्युं नथी, अने जोयुं पण नथी, एवुं अति आश्चर्यकारक केवा प्रकारनुं नाटक आ स्त्रीओ करी रही छे? ॥ २९ ॥ त्रिभिर्विशेषकं ॥

**तां क्रोधादभ्यधाद्धात्री रूपगर्वः किमेष ते । श्रीगर्वः पतिगर्वो वा यदिहोपहसस्यमूः ॥ ३० ॥**

अन्वयः—धात्री तां क्रोधात् अभ्यधात्, किं एषः ते रूप गर्वः? श्रीगर्वः? वा पति गर्वः? यत् इह अमूः उपहससि. ॥ ३० ॥

अर्थः—(त्यारे) ते धावमाताए क्रोधथी तेणीने कह्युं के, शुं आ तारो रूपनो गर्व छे? के लक्ष्मीनो गर्व छे? अथवा पतिनो गर्व छे? के जेथी अहीं आ स्त्रीओनी तुं हांसी करी रही छे. ॥ ३० ॥

**रोहिण्यथाह मा कुप्य मातः कोऽपि न मे मदः । अदृष्टपूर्वमाश्चर्यादिदं पृच्छामि तत्वतः ॥ ३१ ॥**

अन्वयः-अथ रोहिणी आह, (हे) मातः? मा कुप्य? मे कः अपि मदः न, इदं आश्चर्यं अदृष्ट पूर्वं, तत् तत्वतः पृच्छामि. ३१

अर्थः-त्यारे रोहिणीए कह्युं के, हे माताजी! तमो गुस्सो न करो? मने कोइ पण जातनो मद नथी, आवुं आश्चर्य में पूर्वे कोइ पण दिवसे जोयुं नथी, माटे तमोने हुं खरेखरुं पूछुं छुं. ॥ ३१ ॥

ततो धात्री जगौ पुत्रि यासौ स्त्रीवृन्दमध्यगा । मृतस्तस्याः सुतस्तस्य जलदानदिनं ह्यदः ॥ ३२ ॥

अन्वयः-ततः धात्री जगौ, हे पुत्रि ! या असौ स्त्री वृंद मध्यगा, तस्याः सुतः मृतः, तस्य हि अदः जलदान दिनं. ॥ ३२ ॥

अर्थः-त्यारे ते धावमाताए कह्युं के, हे पुत्रि! जे आ स्त्रीओना टोळांना मध्यभागमां उभेली छे, तेणीनो पुत्र मरण पाम्यो छे, अने तेनो खरेखर आजे आ जलांजलि आपवानो दिवस छे. ॥ ३२ ॥

ग्राहं ग्राहं गुणान्सूनोरित्यसौ बत रोदिति । तवापूर्वं भवेऽमुष्मिन्नेतत्संसारनाटकम् ॥ ३३ ॥

अन्वयः-बत सूनोः गुणान् ग्राहं ग्राहं असौ इति रोदिति, तव अमुष्मिन् भवे एतत् संसार नाटकं अपूर्वं ! ॥ ३३ ॥

अर्थः-अरेरे ! ते बिचारी ते पुत्रना गुणो याद करी करीने एरीते विलाप करी रही छे, अने तने आ जन्ममां आ संसारनाटक अपूर्व लागे छे. ॥ ३३ ॥

चेन्मृतः सूनुरस्यास्तदित्थं रोदित्यसौ कथम् । कानया रोदनं ज्ञातमिति धात्रीमथाह सा ॥ ३४ ॥

अन्वयः-अथ सा धात्रीं इति आह, चेत् अस्याः सूनुः मृतः, तत् असौ इत्थं कथं रोदिति? अनया रोदनं क ज्ञातं? ॥ ३४ ॥

अर्थः—त्यारे ते रोहिणीए धावमाताने एम कह्युं के जो आनो पुत्र मरण पाम्यो छे, तो ते आवीरीते केम रडे छे? तेणीए आ रडवानुं क्यांथी जाण्युं? ॥ ३४ ॥

रोदनं ज्ञापयामि त्वामिति हास्यं वदन्नृपः । तदङ्कास्लोकपालाख्यमग्रहीच्चरमं सुतम् ॥ ३५ ॥

अन्वयः-त्वां रोदनं ज्ञापयामि, इति हास्यं वदन् नृपः तत् अंकात् लोकपाल आख्यं चरमं सुतं अग्रहीत्. ॥ ३५ ॥

अर्थः-तने रडवानुं (हमणा) शिखावुं छुं, एम हांसीथी बोलता राजाए तेणीना खोळामांथी लोकपालनामना छेल्ला पुत्रने ग्रहण कर्यो.

**क्ष्मायां क्षिपामि ते पुत्रमिति जल्पन्प्रियां प्रति । करस्थं तं बहिर्भित्तेर्बालमान्दोलयन्नृपः ॥ ३६ ॥**

अन्वयः-ते पुत्रं क्ष्मायां क्षिपामि, इति प्रियांप्रति जल्पन्, नृपः करस्थं तं बालं भित्तेः बहिः आंदोलयत्. ॥ ३६ ॥

अर्थः—तारा (आ) पुत्रने पृथ्वीपर फेंकी देउं छुं, एम राणीने कहेतो राजा हाथमां पकडेला ते बाळकने भिंतनी बहार झुलाववा लाग्यो.

**दैवादथ च्युतो बालः स महीपालपाणितः । वातात्फलमिवोच्चाद्रिशृङ्गशाखिशिखाग्रतः ॥ ३७ ॥**

अन्वयः-अथ उच्च अद्रि शृंग शाखि शिखा अग्रतः वातात् फलं इव स बालः दैवात् महीपाल पाणितः च्युतः. ॥ ३७ ॥

अर्थः—एवामां उंचा पर्वतना शिखरपर उगेला वृक्षनी डाळीनी टोंचपरथी वायुवडे जेम फल पडी जाय, तेम ते बाळक दैवयोगे राजाना हाथमांथी सरी पड्यो, ॥ ३७ ॥

**पुरीजने परिजनेऽप्यथोद्घुष्टहहारवे । किंकिंवचसि रोहिण्यामनुकम्पोन्मुखे नृपे ॥ ३८ ॥**

**अस्पृष्टभूतलं बालं तत्कालं पुरदेवता । तं नरेन्द्रासनेऽमुञ्चत्पुष्पचन्दनचर्चितम् ॥ ३९ ॥ युग्मम् ॥**

अन्वयः-अथ पुरीजने, परिजने अपि उद्घुष्ट हहारवे, किंकिं वचसि रोहिण्यां अनुकंपा उन्मुखे नृपे, ॥ ३८ ॥ अस्पृष्ट भूतलं

तं बालं, तत्कालं पुर देवता पुष्प चंदन चर्चितं नरेंद्र आसने अमुंचत्. ॥ ३९ ॥ युग्मं ॥

अर्थः—त्यारे नगरना लोको, तथा परिवार पण हाहाकार करवा लाग्यो, शुं थयुं? शुं थयुं? एम बोलती रोहिणीप्रते राजा अनुकंपा धरवा लाग्यो, ॥ ३८ ॥ एवामां पृथ्वीतलने स्पर्श पण न थवा देतां (अधरथीज) ते बाळकने तेज वखते नगरदेवीए (लेइने) पुष्प चंदनथी पूजीने राजाना सिंहासनपर मूक्यो. ॥ ३९ ॥ युग्मं ॥

**स्वस्य पुत्रस्य पत्न्याश्च शृण्वन्पुण्यस्तुतिं जनात् । भूवरोऽकारयत्तत्र पुत्रामृत्यूत्सवं ततः ॥ ४० ॥**

अन्वयः–ततः स्वस्य पुत्रस्य च पत्न्याः जनात् पुण्य स्तुतिं शृण्वन् भूवरः तत्र पुत्र अमृत्यु उत्सवं अकारयत्. ॥ ४० ॥

अर्थः—पछी पोतानी, पुत्रनी तथा राणीनी लोकोना मुखथी थती पुण्यनी प्रशंसा सांभळता ते राजाए त्यां पुत्रना जीवननो महोत्सव कर्यो. ॥ ४० ॥

**तदोद्याने चतुर्ज्ञानो मणिकुम्भाद्यसंयुतः । आगात्क्षमासुधाकुम्भो रूपकुम्भो महामुनिः ॥ ४१ ॥**

अन्वयः—तदा उद्याने चतुर्ज्ञानः, मणिकुंभ आद्य संयुतः, क्षमा सुधा कुंभः रूपकुंभः महामुनिः आगात् . ॥ ४१ ॥

अर्थः—ते वखते उद्यानमां चार ज्ञानवाळा, मणिकुंभ आदिक मुनिओसहित, क्षमारूपी अमृतना कुंभसरखा रूपकुंभनामना महान् मुनिराज पधार्या. ॥ ४१ ॥

**तत्रागात्क्षितिसुत्रामा पुत्रामात्यकलत्रवान् । मुनिं नत्वाशृणोज्जीवविचारां धर्मदेशनाम् ॥ ४२ ॥**

अन्वयः—पुत्र अमात्य कलत्रवान् क्षिति सुत्रामा तत्र आगात्, मुनिं नत्वा जीव विचारां धर्म देशनां अशृणोत्. ॥ ४२ ॥
अर्थः—(त्यारे) पुत्र, मंत्री तथा राणीसहित राजा त्यां आव्यो, तथा मुनिराजने नमीने जीवसंबंधी विचारवाळी धर्मदेशना तेणे सांभळी.

**अथ पप्रच्छ पृथ्वीन्दुः पृथ्वीं भक्तिं वहन्हृदि। रोहिणीभाग्यसौभाग्यचमत्कृतमना मुनिम् ॥ ४३ ॥**

अन्वयः—अथ हृदि पृथ्वीं भक्तिं वहन्, रोहिणी भाग्य सौभाग्य चमत्कृत मनाः पृथ्वी इंदुः मुनिं पप्रच्छ. ॥ ४३ ॥
अर्थः—पछी हृदयमां विशाल भक्ति धारण करता, तथा रोहिणीना भाग्य अने सौभाग्यथी आश्चर्य युक्त मनवाळा ते राजाए मुनिराजने पूछयुं के, ॥ ४३ ॥

**प्रभो किं मघवत्पुत्र्या प्राग्भवे सुकृतं कृतम्। यदेनां शोकलेशोऽपि पस्पर्श न कदाचन ॥ ४४ ॥**

अन्वयः—(हे) प्रभो! मघवत् पुत्र्या प्राग्भवे किं सुकृतं कृतं? यत् एनां कदाचन शोक लेशः अपि न पस्पर्श. ॥ ४४ ॥
अर्थः—हे प्रभु! आ मघवाराजानी पुत्री रोहिणीए पूर्वभवमां शुं पुण्य कर्युं छे? के जेथी तेणीने कोइ पण दिवसे शोकना लेशे पण स्पर्श कर्यो नथी. ॥ ४४ ॥

**किं वा निरवधिः प्रीतिर्ममैतस्याः परस्परम्। किं वापत्यान्यमून्यस्याः शुभान्येवाखिलान्यपि ॥ ४५ ॥**

अन्वयः—वा मम एतस्याः परस्परं निरवधिः प्रीतिः किं? वा अस्याः अमूनि अखिलानि अपि अपत्यानि शुभानि एव किं? ॥

अर्थः-वळी मारी अने आ रोहिणीवच्चेनी परस्पर अस्खलित प्रीति केम छे? तेमज तेणीना आ सघळां संतानो मनोहरज केम छे?

**ततः सर्वसभालोकचकोरानन्दचन्द्रिकाम् । शस्तां विस्तारयामास मुनीन्दुर्विशदां गिरम् ॥ ४६ ॥**

अन्वयः—ततः सर्व सभालोक चकोर आनंद चंद्रिकां, शस्तां, विशदां गिरं मुनि इंदुः विस्तारयामास. ॥ ४६ ॥

अर्थः—पछी सर्व सभाना लोकोरूपी चकोरोने आनंद आपवामां चांदनी सरखी, मनोहर तथा निर्मल वाणी ते मुनिराज कहेवा लाग्या के, ॥ ४६ ॥

**धरित्रीश तवात्रैव पुरे नागपुरे पुरा । राजासीद्वसुपालाख्यस्तत्प्रिया वसुमत्यभूत् ॥ ४७ ॥**

अन्वयः-हे! धरित्री ईश! अत्र एव तव नागपुरे पुरे पुरा वसुपाल आख्यः राजा आसीत्, वसुमती तत् प्रिया अभूत्. ॥४७॥

अर्थः-हे राजन्! अहींज तमारा आ नागपुर नामना नगरमां पूर्वे वसुपालनामनो राजा हतो, अने तेने वसुमतीनामनी स्त्री हती

**मित्रं धात्रीपतेस्तस्य समभूद्भूरिवैभवः । धनमित्राभिधः श्रेष्ठी धनमित्रा च तत्प्रिया ॥ ४८ ॥**

अन्वयः—तस्य धात्री पतेः भूरि वैभवः धनमित्र अभिधः श्रेष्ठी मित्रं समभूत्, च तत् प्रिया धनमित्रा. ॥ ४८ ॥

अर्थः-ते राजानो घणी समृद्धिवाळो धनमित्र नामे शेठ मित्र हतो, अने तेनी धनमित्रानामनी स्त्री हती. ॥ ४८ ॥

**अनयोस्तनया जज्ञे वैरूप्यैकनिकेतनम् । उग्रदुर्गन्धदेहत्वाद्दुर्गन्धेत्यभिधानतः ॥ ॥ ४९ ॥**

अन्वयः-अनयोः वैरूप्य एक निकेतनं तनया जज्ञे, उग्र दुर्गंध हेतुत्वात् दुर्गंधा इति अभिधानतः. ॥ ४९ ॥

अर्थः-तेओने बेडोळ रूपना एक स्थानसरखी पुत्री हती, तेणीनुं शरीर अत्यंत दुर्गंधवाळुं होवाथी, ते दुर्गंधानामथी (प्रसिद्ध हती).

**जनेष्वनिष्टां बीभत्सरसस्येवाधिदेवताम् । न तां पर्यणयत्कोऽपि यौवनेऽप्यतिदुर्भगाम् ॥ ५० ॥**

अन्वयः—जनेषु अनिष्टां, बीभत्स रसस्य अधिदेवतां इव अति दुर्भगां तां यौवने अपि कः अपि न पर्यणयत्. ॥ ५० ॥

अर्थः—लोकोने अणगमती, तथा बीभत्सरसनी अधिष्टात्री देवीनीपेठे अत्यंत दुर्भागी, एवी ते कन्याने यौवनवयमां पण कोइ परण्युं नही. ॥ ५० ॥

**संख्यातीतवसुश्चेह वसुमित्रोऽभवद्वणिक् । वसुकान्ता च तत्कान्ता श्रीषेणश्च तदङ्गजः ॥ ५१ ॥**

अन्वयः-च इह संख्या अतीत वसुः वसुमित्रः वणिक् अभवत्, च तत्कांता वसुकान्ता, च तत् अंगजः श्रीषेणः. ॥ ५१ ॥

अर्थः-वळी त्यां असंख्यातां धनवाळो वसुमित्र नामे (एक) वणिक् वसतो हतो, तेने वसुकांतानामे स्त्री हती, तथा श्रीषेणनामे पुत्र हतो.

**स सप्तव्यसनव्यग्रः श्रीषेणः क्वापि चौर्यकृत् । वध्योर्वीं नेतुमारेभे वधाय पुररक्षकैः ॥ ५२ ॥**

अन्वयः-सप्त व्यसन व्यग्रः सः श्रीषेणः क्व अपि चौर्यकृत्, पुररक्षकैः वधाय वध्य उर्वीं नेतुं आरेभे. ॥ ५२ ॥

अर्थः—साते व्यसनोमां आसक्त थयेला ते श्रीषेणे क्यांक चोरी करी, त्यारे नगरना रक्षको तेने मारवामाटे वध्यभूमिप्रते लेइ जवा लाग्या. ॥ ५२ ॥

**राज्ञो विज्ञतिमारच्य धनमित्रो विमोच्य तम् । वसुभिर्वाग्भिरावर्ज्य दुर्गन्धां पर्यणाययत् ॥ ५३ ॥**

अन्वयः—राज्ञः विसप्तिं आरच्य धनमित्रः तं विमोच्य, वसुभिः वाग्भिः आवर्ज्य दुर्गंधां पर्यणाययत्. ॥ ५३ ॥

अर्थः—त्यारे राजाने विनति करीने धनमित्रे तेने मूकावीने, तथा धन अने वचनथी तेने खुशी करीने ते दुर्गंधापुत्रीने तेनी साथे परणावी. ॥ ५३ ॥

**अपि शोचन्वधोन्मुक्तिं स तद्दुर्गन्धबाधया । कथंचिद्गमयित्वाहर्निशि निःसृत्य यातवान् ॥ ५४ ॥**

अन्वयः—वध उन्मुक्तिं अपि शोचन् सः तत् दुर्गंध बाधया कथंचित् अहः गमयित्वा निशि निःसृत्य यातवान्. ॥ ५४ ॥

अर्थः—मरणथी थएली मुक्तिने पण शोचतो एवो ते श्रीषेण ते दुर्गंधानी पीडाथी केटलीक मुश्केलीए दिवस वीताडीने रात्रिए त्यांथी निकळीने चालतो थयो. ॥ ५४ ॥

**दानं दातुं नियुक्ताथ पित्रा भिक्षाचरेष्वसौ । भिक्षामपि न तत्पाणिगृहीतां कश्चिदग्रहीत् ॥ ५५ ॥**

अन्वयः— अथ भिक्षाचरेषु दानं दातुं पित्रा असौ नियुक्ता, तत् पाणि गृहीतां भिक्षां अपि कश्चित् न अग्रहीत्. ॥ ५५ ॥

अर्थः—पछी भिक्षाचरोने दान आपवामाटे पिताए तेणीने नियुक्त करी, परंतु तेणीए हाथमां पकडेली भिक्षा पण कोइये ग्रहण करी नही. ॥ ५५ ॥

**श्रुत्वाथ धर्मं साधुभ्यस्तन्निष्ठा गृह एव सा । अनातुरेव शान्तात्मा मातुरेव तटेऽचरत् ॥ ५६ ॥**

अन्वयः—अथ साधुभ्यः धर्मं श्रुत्वा तत् निष्ठा सा गृहे एव अनातुरा इव शांत आत्मा मातुः एव तटे अचरत्. ॥ ५६ ॥

अर्थः-पछी साधुओपासेथी धर्म सांभळीने, ते धर्ममांज श्रद्धा राखीने ते दुर्गंधा घरमांज निश्चिंतनीपेठे शांत थइने मातापासेज रहेवा लागी. ॥ ५६ ॥

**राजन्नन्येद्युरुद्यानेऽत्रैव ज्ञानामृतार्णवः । अमृतासव इत्यागान्नित्यागाधमहो मुनिः ॥ ५७ ॥**

अन्वयः—(हे) राजन्! अन्येद्युः अत्र एव उद्याने ज्ञान अमृत अर्णवः, नित्य अगाधमहः अमृतासवः इति मुनिः आगात्. ॥ ५७ ॥

अर्थः-हे राजन्! एवामां एक दिवसे आज उद्यानमां ज्ञानरूप अमृतना महासागर, तथा शाश्वता अगाधतेजवाळा अमृतासवनामना मुनि आव्या. ॥ ५७ ॥

**विज्ञाय धनमित्रोक्त्या तमत्र नृपतिर्यतिम् । आययौ मुदितस्वान्तः सान्तःपुरपुरव्रजः ॥ ५८ ॥**

अन्वयः—धनमित्र उक्त्या नृपतिः तं यतिं अत्र विज्ञाय मुदित स्वांतः स अंतःपुरपुरव्रजः आययौ. ॥ ५८ ॥

अर्थः-धनमित्रना कहेवाथी राजा ते मुनिने अहीं (आवेला) जाणीने हर्षित हृदयवाळो थयोथको राणीओसहित आव्यो. ॥ ५८ ॥

**नत्वा नृपे निविष्टेऽथ युक्तिव्यक्तक्रमं मुनिः । जगौ विचारं जीवानां धर्माधर्मगतीश्च ताः ॥ ५९ ॥**

अन्वयः—अथ नत्वा नृपे निविष्टे मुनिः युक्ति व्यक्तक्रमं जीवानां विचारं, च ताः धर्म अधर्म गतीः जगौ. ॥ ५९ ॥

अर्थः—पछी वंदन करीने राजा बेठाबाद ते मुनिराज युक्तिथी प्रगट अनुक्रमे जीवोनो विचार तथा ते धर्म अने अधर्मनुं स्वरूप कहेवा लाग्या. ॥ ५९ ॥

**प्रमोदविशदस्तूपे भूपे दुर्गन्धया मुनिः । दुर्गन्धकारणं स्वस्य पृष्टः स्पष्टं जगाद सः ॥ ६० ॥**

अन्वयः—भूपे प्रमोद विशद स्तूपे, दुर्गंधया स्वस्य दुर्गंध कारणं पृष्टः सः मुनिः स्पष्टं जगाद. ॥ ६० ॥

अर्थः—पछी राजा हर्षना निर्मल स्थानरूप थये छते ते दुर्गंधाए पोतानी दुर्गंधनुं कारण पूछेला ते मुनि स्पष्ट रीते कहेवा लाग्या के,

**जम्बूद्वीपस्य भरते क्षेत्रे पात्रं शुभश्रियाम् । सुराष्ट्रो नाम देशोऽस्ति देशानां मौलिमण्डनम् ॥ ६१ ॥**

अन्वयः—जंबूद्वीपस्य भरते क्षेत्रे शुभ श्रियां पात्रं, देशानां मौलि मंडनं सुराष्ट्रः नाम देशः अस्ति. ॥ ६१ ॥

अर्थः—जंबूद्वीपना भरत क्षेत्रमां मनोहर लक्ष्मीना भाजन सरखो, अने सर्व देशोमां मुकुटसमान सुराष्ट्रनामनो देश छे. ॥ ६१ ॥

**स्वसौन्दर्यसमाकृष्टदैवतस्तत्र रैवतः । पर्वतो विद्यते हृद्यांह्रिपराजिविराजितः ॥ ६२ ॥**

अन्वयः—तत्र स्वसौंदर्य समाकृष्ट दैवतः, हृद्य अंह्रिप राजि विराजितः रैवतः पर्वतः विद्यते. ॥ ६२ ॥

अर्थः—ते देशमां पोतानी सुंदरताथी देवोने पण खेंचनारो, ताथा मनोहर वृक्षोनी श्रेणिथी शोभितो रैवताचलनामे पर्वत छे. ६२

**तस्याद्रेः पश्चिमे भागे भागधेयमिव श्रियाम् । नाम्नास्ते गिरिनगरं गीर्वाणनगरोपमम् ॥ ६३ ॥**

अन्वयः–तस्य अद्रेः पश्चिमे भागे श्रियां भागधेयं इव, गीर्वाण नगर उपमं गिरिनगरं नाम्ना आस्ते. ॥ ६३ ॥

अर्थः–ते रैवताचल पर्वतना पश्चिम भागमां लक्ष्मीना भाग्यसरखुं, अने देवनगरीजेवुं गिरिनारनामनुं नगर छे. ॥ ६३ ॥

**तत्रासीत्पृथिवीपालः पृथिवीपालसंज्ञया । जिनधर्ममतारामममतारामपालकः ॥ ६४ ॥**

अन्वयः–तत्र जिन धर्ममत आराम ममता आराम पालकः पृथिवीपाल संज्ञया पृथिवीपालः आसीत्.॥ ६४ ॥

अर्थः–ते नगरमां जैनधर्मरूपी बगीचानुं ममत्वभावथी रक्षण करवामां माली सरखो पृथिवीपालनामनो राजा हतो. ॥ ६४ ॥

**तस्य सिद्धमतिः प्रेमरससिद्धिरभूत्प्रिया । दधौ प्रियप्रियत्वेन जिनधर्मेऽपि सा धियम् ॥ ६५ ॥**

अन्वयः—तस्य प्रेमरस सिद्धिः सिद्धिमतिः प्रिया अभूत्. प्रिय प्रियत्वेन सा अपि जिन धर्मे धियं दधौ. ॥ ६५ ॥

अर्थः–ते राजाने प्रेमरसनी सिद्धि सरखी सिद्धमति नामनी राणी हती, अने (पोताना) स्वामिने प्रिय होवाथी ते पण जैनधर्ममां बुद्धिने धारण करती हती. ॥ ६५ ॥

**उद्यानिकायामन्येद्युर्व्रजन्सान्तःपुरो नृपः । गिरेर्यान्तं पुरेऽपश्यन्महर्षिं गुणसागरम् ॥ ६६ ॥**

अन्वयः—अन्येद्युः सांतः पुरः उद्यानिकायां व्रजन् नृपः गिरेः पुरे यांतं गुणसागरं महर्षिं अपश्यत्. ॥ ६६ ॥

अर्थः–एक दिवसे राणीओ सहित उज्जाणीमां जता एवा ते राजाए पर्वतपरथी नगरमां जता गुणसागर नामना महामुनिने जोया.

**सोऽथ प्राह प्रियां मासोपवासिनममुं मुनिम् । विधाप्य पारणं तूर्णमेहि यामः शनैर्वयम् ॥ ६७ ॥**

अन्वयः—अथ सः प्रियां प्राह, अमुं मास उपवासिनं मुनिं पारणं विधाप्य तूर्णं एहि ? शनैः वयं यामः. ॥ ६७ ॥

अर्थः—त्यारे तेणे राणीने कह्युं के, आ एक मासना उपवासी मुनिराजने पारणुं करावीने तुं तुरत आवजे ? अमो धीमे धीमे जइये छीये.

**क्रुधा स्वेच्छागतिच्छेदादाज्ञालोपाच्च बिभ्यती । ततः सिद्धमतिः साधुं पारणायालयेऽनयत् ॥ ६८ ॥**

अन्वयः—स्व इच्छा गति च्छेदात् क्रुधा, च आज्ञा लोपात् बिभ्यती सिद्धमतिः ततः साधुं पारणाय आलये अनयत्. ॥ ६८ ॥

अर्थः—पोतानी मरजीमुजबना गमनमां विघ्न पडवाथी क्रोध पूर्वक तथा (राजानी) आज्ञाना लोपथी डरती एवी ते सिद्धमति, पछी ते साधुने पारणुं करावना माटे घेर तेडी गइ. ॥ ६८ ॥

**कटुतुम्बीफलं साथ हयेभ्यः परिपाचितम् । जनेन वार्यमाणापि तस्मै खाद्ययुतं ददौ ॥ ६९ ॥**

अन्वयः—अथ जनेन वार्यमाणा आपि सा हयेभ्यः परिपाचितं कटु तुंबी फलं खाद्य युतं तस्मै ददौ. ॥ ६९ ॥

अर्थः—पछी लोकोए मना कर्या छतां पण ते राणीए घोडाओमाटे पकावेलुं कडवी तुंबडीनुं फल भोजनसहित ते साधुने आप्युं.

**तदाहृत्य मुनिर्दह्यमानकुक्षिः श्रिताश्रयः । आहारादिपरीहारहृद्यः सद्यो दिवं ययौ ॥ ७० ॥**

अन्वयः—तत् आहृत्य दह्यमान कुक्षिः श्रित आश्रयः मुनिः, आहार आदि परिहार हृद्यः सद्यः दिवं ययौ. ॥ ७० ॥

अर्थः—तेनुं भोजन करवाथी उदरमां दाह उत्पन्न थवाथी अनशन लेइने ते मुनिराज आहार आदिकनां प्रत्याख्यान करी तुरत देवलोके गया. ॥ ७० ॥

तत्परिज्ञाय राज्ञाथ सर्वमादाय सा रुषा । शरावमालामालम्ब्य गले निर्गमिता पुरात् ॥ ७१ ॥

अन्वयः—अथ राज्ञा तत् परिज्ञाय, सर्वं आदाय सा रुषा गले शराव मालां आलंब्य पुरात् निर्गमिता. ॥ ७१ ॥

अर्थः—पछी राजाए ते हकीकत जाण्यावाद, सर्व कंइं लेइ लेइने तेणीने गुस्साथी गलामां शरावलांओनी माला पहेरावीने नगरमांथी कहाडीमेली. ॥ ७१ ॥

अथोडुम्बरकुष्ठेन गलिता सप्तमेऽहनि । विशीर्णकर्णनासोष्ठा मृत्वागात्षष्ठदुर्गतौ ॥ ७२ ॥

अन्वयः—अथ उडुंबर कुष्ठेन गलिता, विशीर्ण कर्ण नासा ओष्ठा (सा) सप्तमे अहनि मृत्वा षष्ठ दुर्गतौ अगात्. ॥ ७२ ॥

अर्थः—पछी तेणीने उडुंबरनामनो कुष्टनो रोग थवाथी तेणीना कर्ण, नासिका तथा होठो सडी गया, अने तेथी ते सातमे दिवसे मृत्यु पामीने छठ्ठी नरकमां गइ. ॥ ७२ ॥

उद्वृत्ता दुर्गतेः सा तु नरकेष्वपि सप्तसु । असंख्यदुःखदुष्टात्मतिर्यग्जन्मान्तरास्वगात् ॥ ७३ ॥

अन्वयः—तु दुर्गतेः उद्वृत्ता सा, असंख्य दुःख दुष्ट आत्म तिर्यग् जन्म अंतरासु सप्तसु अपि नरकेषु अगात्. ॥ ७३ ॥

अर्थः—पछी ते दुर्गतिमांथी उद्धरीने ते असंख्य दुःखोवाळां तथा विकाळ तिर्यंचोमां वच्चे वच्चे जन्म लेइने साते नरकोमां गइ.

सर्पिण्युष्ट्री शुनी क्रोष्ट्री वराहा गृहगोधिका । मूषी जलौका काक्योतुख्री खरी साथ गौरभूत् ॥ ७४ ॥

अन्वयः—अथ सा सर्पिणी उष्ट्री, शुनी, क्रोष्ट्री, वराही, गृह गोधिका, मूषी, जलौका, काकी, ओतु स्त्री, खरी, गौः अभूत्.

अर्थः—पछी ते सापण, उंटडी, कुतरी, शीयाळणी, डुक्करी, घीलोडी, उंदरडी, जळो, कागडी बिलाडी, गधेडी, तथा गायरूपे उत्पन्न थइ. ॥ ७४ ॥

**सा तु गौर्जीवितस्यान्ते पीडया पतिता पथि । शुश्राव मुनिभिर्दत्तां परमेष्ठिनमस्क्रियाम् ॥ ७५ ॥**

अन्वयः—तु सा गौः जीवितस्य अंते पीडया पथि पतिता मुनिभिः दत्तां परमेष्ठि नमस्क्रियां शुश्राव. ॥ ७५ ॥

अर्थः—पछी ते गाय मरणांत समये पीडाथी रस्तामां पडी हती, एवामां कोइ मुनिओए संभळावेला नवकार मंत्रने तेणीए सांभळ्यो.

**तत्प्रभावात्समाधिस्था मृत्वास्य श्रेष्ठिनः सुता । जाता त्वं पापशेषेण महादुर्गन्धदूषिता ॥ ७६ ॥**

अन्वयः—तत् प्रभावात् समाधिस्था मृत्वा अस्य श्रेष्ठिनः सुता त्वं जाता, पाप शेषेण महा दुर्गंध दूषिता. ॥ ७६ ॥

अर्थः—तेना प्रभावथी समतापूर्वक मरण पामीने आ शेठनी तुं पुत्री थयेली छे, अने बाकी रहेलां पापथी तुं अतिदुर्गंधथी दूषित थयेली छे ॥ ७६ ॥

**जातजातिस्मृतिस्तास्ता नरकादिव्यथास्ततः । साक्षादनुभवन्तीवाखर्वसर्वाङ्गवेपथुः ॥ ७७ ॥**

**शुष्कोष्ठी दीनवदना लोलकातरलोचना । मूर्धबद्धाञ्जलिः साश्रुः सा दुर्गन्धाभ्यधाद्गुरुम् । ७८ । युग्मम् ।**

अन्वयः—ततः जात जातिस्मृतिः ताः ताः नरक आदि व्यथाः साक्षात् अनुभवंती इव, अखर्व सर्व अंग वेपथुः, ॥ ७७ ॥ शुष्क ओष्ठी, दीन वदना, लोल कातर लोचना मूर्ध बद्ध अंजलिः सा दुर्गंधा साश्रुः गुरुं अभ्यधात्. ॥ ७८ ॥ युग्मं ॥

अर्थः—पछी जातिस्मरण ज्ञान थवाथी, तेते नरक आदिकनी पीडाने जाणे साक्षात् अनुभवती होय नही! तेम सर्व शरीरे अत्यंत कंपती, ॥ ७७ ॥ सूकाइ गयेला होठोवाळी, दीन मुखवाळी, चपल अने भयभीत चक्षुओवाळी ते दुर्गंधा मस्तके हाथ जोडीने आंसुओ लावी गुरु महाराजने कहेवा लागी के, ॥ ७८ ॥ युग्मं ॥

**हहा भीतास्मि भीतास्मि स्वामिन्मां कर्ष दुःखतः । न व्यथासु पुनस्तासु यथा यामि तथा कुरु ।७९।**

अन्वयः-(हे) स्वामिन! हहा! भीता अस्मि, भीता अस्मि, मां दु खतः कर्ष? पुनः यथा तासु व्यथासु, न यामि, तथा कुरु?

अर्थः-हे स्वामी! अरेरे! हुं डरुं छुं डरुं छुं! मने आ दु खमांथी छोडावो? तथा फरीने जेम ते दु खोमां न पडुं, तेम करो? ७९

**ततः कृपाब्जिनीकेलिनवहेलिर्महामुनिः । तमःसमुदयच्छेदकलां कलयतिस्म गाम् ॥ ८० ॥**

अन्वयः—ततः कृपा अब्जिनी केलि नव हेलिः महामुनिः तमः समुदय च्छेद कलां गां कलयतिस्म, ॥ ८० ॥

अर्थः-पछी दयारूपी कमलिनीने विकस्वर करवामां नवा सूर्यसरखा ते महामुनिराज अज्ञानरूपी अंधकारना समूहनो नाश करवामां समर्थ, एवी वाणी बोलवा लाग्याके, ॥ ८० ॥

**वासरे रोहिणीनाम्ना नक्षत्रेण पवित्रिते । उपवासस्त्वया कार्यः सप्तवर्षीं निरन्तरम् ॥ ८१ ॥**

अन्वयः–रोहिणी नाम्ना नक्षत्रेण पवित्रिते वासरे त्वया सप्तवर्षी निरंतरं उपवासः कार्यः. ॥ ८१ ॥

अर्थः–रोहिणीनामना नक्षत्रथी पवित्र थयेला दिवसे तारे सात वर्षोसुधी निरंतर उपवास करवा ॥ ८१ ॥

**व्रतादस्मादशोकस्य राज्ञस्त्वं रोहिणी प्रिया । शचीपतेरिव शची भविष्यसि भवान्तरे ॥ ८२ ॥**

अन्वयः–अस्मात् व्रतात् त्वं भवांतरे शचीपतेः शची इव, अशोकस्य राज्ञः प्रिया भविष्यसि. ॥ ८२ ॥

अर्थः–आ व्रतथी तुं आवता भवमां इंद्रनी इंद्राणीसरखी अशोक राजानी राणी थइश. ॥ ८२ ॥

**चिरमप्राप्तशोकैव भुक्त्वा भोगान्प्रियान्विता । सिद्धिं यास्यसि विहरद्वासुपूज्यांह्रिसेवया ॥ ८३ ॥**

अन्वयः–चिरं अप्राप्त शोका एव भोगान् भुक्त्वा प्रिय अन्विता विहरत् वासुपूज्य अंह्रि सेवया सिद्धिं यास्यसि, ॥ ८३ ॥

अर्थः–वळी घणा काळसुधी बिलकुल शोक पाम्या विनाज भोगो भोगवीने, (तारा) स्वामिसहित तुं विचरता एवा श्रीवासुपूज्य-प्रभुना चरणोनी सेवाथी मोक्षे जइश. ॥ ८३ ॥

**अशोकरोहिणीयुक्तामशोकतरुसंश्रयाम् । ततः श्रीवासुपूज्यस्य कारयेर्मूर्तिमद्भुताम् ॥ ८४ ॥**

अन्वयः–ततः अशोक रोहिणी युक्तां, अशोक तरु संश्रयां श्रीवासुपूज्यस्य अद्भुतां मूर्तिं कारयेः. ॥ ८४ ॥

अर्थः–माटे अशोक तथा रोहिणी सहित, अशोक वृक्षना आश्रयवाळी श्रीवासुपूज्य प्रभुनी अद्भुत मूर्ति तुं करावजे ? ॥ ८४ ॥

**तत्पुरस्तस्य तपसः कार्य उद्यापनोत्सवः । तत्राभयप्रदानस्योद्घोषोऽवश्यं विधीयते ॥ ८५ ॥**

अन्वयः—तत्पुरः तस्य तपस उद्यापन उत्सवः कार्यः, तत्र अभय प्रदानस्य उद्घोषः अवश्यं विधीयते. ॥ ८५ ॥
अर्थः—वळी ते मूर्तिनी पासे ते रोहिणीतपना उजमणानो महोत्सव करवो, अने ते महोत्सवमां अभयदाननो पटह अवश्य वगडाववो.

**स्नात्रं श्रीवासुपूज्यस्य चर्चा सुरभिवस्तुभिः । पूजा मौक्तिककल्याणमाणिक्यकुसुमांशुकैः ॥ ८६ ॥**

अन्वयः—श्रीवासुपूज्यस्य स्नात्रं, सुरभि वस्तुभिः चर्चा, मौक्तिक कल्याण माणिक्य कुसुम अंशुकैः पूजा. ॥ ८६ ॥
अर्थः—(वळी) श्रीवासुपूज्य प्रभुनुं स्नात्र, सुगंधि वस्तुओवडे विलेपन, तथा मोती, सुवर्ण, माणिक्य, पुष्पो तथा वस्त्रोवडे पूजन (करवुं) ॥ ८६ ॥

**तत्पुरः प्राज्यपक्वान्नफलतन्दुलढौकनम् । क्रियते रासकैर्नृत्यैः संगीतैश्च प्रभावना ॥ ८७ ॥**

अन्वयः—तत्पुरः प्राज्य पक्वान्न फल तंदुल ढौकनं, रासकैः, नृत्यैः च संगीतैः प्रभावना क्रियते. ॥ ८७ ॥
अर्थः—(वळी) तेनी आगळ उत्तम पक्वान्न, फळो, तथा चावल मूकवा, अने रास, नृत्य तथा संगीतवडे प्रभावना कराय छे.

**साधर्मिकाणां वात्सल्यमशनांशुकभूषणैः । दीनेऽनुकम्पया दानं कारागाराङ्गिमोचनम् ॥ ८८ ॥**

अन्वयः—साधर्मिकाणां अशन अंशुक भूषणैः वात्सल्यं, दीने अनुकंपया दानं, कारागार अंगि मोचनं. ॥ ८८ ॥
अर्थः—साधर्मिकोनुं भोजन, वस्त्र तथा आभूषणोवडे वात्सल्य करवुं, दीनजनोने अनुकंपादान आपवुं, तथा केदखानामांथी केदीओने छोडाववा ॥ ८८ ॥

**चैत्यनिर्मापणं शक्त्या दानं पात्रेषु भक्तितः । लेखनं पुस्तकानां च विधेयं विधिना तदा ॥ ८९ ॥**

अन्वयः—तदा शक्त्या चैत्य निर्मापणं, पात्रेषु भक्तितः दानं, च विधिना पुस्तकानां लेखनं विधेयं. ॥ ८९ ॥

अर्थः–( वळी ) ते समये शक्तिमुजब जिनमंदिर बंधाववां, सुपात्रोने भक्तिथी दान आपवुं, तथा विधिपूर्वक ( जैनधर्मनां ) पुस्तको लखाववां. ॥ ८९ ॥

**इदं विदधती वत्से विकाशिसुकृतक्रमा । मुच्यसे दुःखबन्धेन सुगन्धो नृपतिर्यथा ॥ ९० ॥**

अन्वयः–(हे) वत्से ! इदं विदधती विकाशि सुकृत क्रमा, यथा सुगंधः नृपतिः, ( तथा ) दुःख बंधेन मुच्यसे. ॥ ९० ॥

अर्थः–हे वत्से ! एम करवाथी पुण्यनी परंपरा विकस्वर थवाथी सुगंधनामना राजानी पेठे ( तुं पण ) दुःखना बंधनथी मुक्त थइश. ॥ ९० ॥

**किं नाथ पूर्वमप्येतत्केनापि विदधे तपः । त्वया ज्ञानवतात्रैवं दर्शितं यन्निदर्शनम् ॥ ९१ ॥**

अन्वयः–(हे) नाथ ! पूर्वं अपि एतत् तपः किं केन अपि विदधे ? यत् ज्ञानवता त्वया अत्र एवं निदर्शनं दर्शितं. ॥ ९१ ॥

अर्थः—हे भगवन् ! पूर्वे पण आ तप शुं कोइये करेलो छे ! के जेथी आपे ज्ञानीए अहीं आवुं दृष्टांत देखाडयुं छे. ॥ ९१ ॥

**इति दुर्गन्धया पृष्टो मुनीन्दुः पापतापहृत् । ववर्ष वाक्सुधां बोधिबीजदुर्भिक्षभेदिनीम् । ९२ । युग्मम् ।**

अन्वय।—इति दुर्गंधया पृष्टः पाप ताप हृत् मुनि इंदुः, बोधि बीज दुर्भिक्ष भेदिनीं वाक् सुधां ववर्ष. ॥ ९२ ॥ युग्मं ॥

अर्थः–ए रीते दुर्गंधाए पूछवाथी पापोरूपी तापने हरनारा ते मुनिचंद्र बोधिबीजना दुष्काळने भेदनारी वचनरूपी अमृतनी वृष्टि वरसवा लाग्या. ॥ ९२ ॥

**विषये शकटालाख्ये भरतस्यास्य भूषणे । अस्ति चापलखिन्नश्रीशय्या सिंहपुरं पुरम् ॥ ९३ ॥**

अन्वयः–अस्य भरतस्य भूषणे शकटाल आख्ये विषये चापल खिन्न श्री शय्या सिंहपुरं पुरं अस्ति. ॥ ९३ ॥

अर्थः–आ भरतखंडना अलंकारसरखा शकटाल नामना देशमां, चंचलपणाथी थाकी गयेली लक्ष्मीनी शय्यासरखुं सिंहपुरनामनुं नगर छे. ॥ ९३ ॥

**तत्र चित्रतनूबन्धो नानामणिगणैरिव । रराज राजमुकुटः सिंहसेन इति श्रुतः ॥ ९४ ॥**

अन्वयः–तत्र नाना मणि गणैः इव चित्र तनूबंधः, राजमुकुटः सिंहसेनः इति श्रुतः ( नृपः ) रराज. ॥ ९४ ॥

अर्थः—ते नगरमां विविध प्रकारनां मणिओना समूहोथी जेम राजाओनो मुकुट, तेम आश्चर्यकारक शरीरना बांधावाळो, अने ( राजाओमां मुकुटसमान ) सिंहसेन नामनो प्रख्यात राजा शोभतो हतो. ॥ ९४ ॥

**तत्प्रिया धूतकनकप्रभाभूत्कनकप्रभा । यन्मुखं लाञ्छनोद्वेगत्यक्तेन्दुः श्रीरशिश्रियत् ॥ ९५ ॥**

अन्वय –धूत कनक प्रभा कनकप्रभा तत् प्रिया अभूत्, यत्मुखं लांछन उद्वेग त्यक्त इंदुः श्रीः अशिश्रियत्. ॥ ९५ ॥

अर्थः—सुवर्णनी कांतिनो पण तिरस्कार करनारी कनकप्रभा नामनी तेनी राणी हती, के जेणीना मुखनो, लांछनथी कंटाळेली

लक्ष्मीए चंद्रने तजीने आश्रय लीधो हतो. ॥ ९५ ॥

सुतोऽभूच्चारुरूपोऽपि तयोर्दुर्गन्धदेहवान् । अतो दुर्गन्ध इत्येव पृथ्व्यां तन्नाम पप्रथे ॥ ९६ ॥

अन्वयः-तयोः चारु रूपः अपि दुर्गंध देहवान् सुतः अभूत्, अतः पृथ्व्यां दुर्गंधः इति एव तत् नाम पप्रथे. ॥ ९६ ॥

अर्थः—तेओने मनोहर रूपवाळो होवा छतां पण दुर्गंध शरीरवाळो पुत्र हतो, अने तेथी पृथ्वीमां " दुर्गंध " एवुं तेनुं नाम प्रसिद्ध थयुं. ॥ ९६ ॥

न राज्यदानलोभेऽपि तं भेजे भामिनीजनः । वालव्यजनवातेऽपि नामुञ्चन्मक्षिकाश्च तम् ॥ ९७ ॥

अन्वयः-राज्य दान लोभे अपि भामिनी जनः तं न भेजे, च वाल व्यजन वाते अपि तं मक्षिकाः न अमुंचन्. ॥ ९७ ॥

अर्थः-राज्य आपवानी लालच आप्या छतां पण कोइपण स्त्री तेने स्वीकारतो न्होतो, अने वाळोना पंखाओनो पवन वींझ्या छतां पण तेने माखो छोडती नही. ।' ९७ ॥

आस्यसंचारितश्वासैः गुप्ततूलाप्तनासिकैः । क्रमागतैरपि स्वान्तबलात्सोऽसेवि सेवकैः ॥ ९८ ॥

अन्वयः-आस्य संचारित श्वासैः, गुप्त तूल आप्त नासिकैः, क्रम आगतैः सेवकैः अपि स्वांत बलात् सः असेवि. ॥ ९८ ॥

अर्थः—मुखथी श्वास लेता, तथा नासिकामां रुना पुंबडां खोसेला, वाराफरती आवता नोकरो पण फक्त मनोबळथी तेनी सेवा करता हता. ॥ ९८ ॥

**इति मातृपितृक्लेशोत्कटकष्टोर्मिपातिनि । तस्मिन्मृत्युमपि श्लाघमाने भूजानिजन्मनि ॥ ९९ ॥**
**हर्षौत्सुक्यभृतो भूरिभूषाभासुरदिङ्मुखाः । चेरुर्गगनपद्यासु विद्याधरसुरासुराः ॥ ११०० ॥ युग्मम् ॥**

अन्वयः—इति मातृ पितृ क्लेश उत्कट कष्ट ऊर्मि पातिनि तस्मिन् भूजानि जन्मनि मृत्युं अपिश्लाघमाने, ॥ ९९ ॥ हर्ष औत्सुक्य भृतः, भूरि भूषा भासुर दिङ्मुखाः विद्याधर सुर असुराः गगन पद्यासु चेरुः ॥ ११०० ॥ युग्मं ॥

अर्थः—एरीते माता पिताने क्लेशना भयंकर संकटमां पाडनारा ते राजपुत्रना मरणने पण श्रेष्ठ गणते छते, ॥ ९९ ॥ हर्ष अने उत्कंठा धरनारा, घणा आभूषणोथी दिशाओने पण तेजस्वी करनारा, विद्याधरो, देवो तथा दानवो आकाश मार्गमां चालवा लाग्या.

**षष्ठं जिनेन्द्रं पद्माभं श्रीपद्मप्रभमागतम् । तेभ्यो मत्वा ययौ नन्तुं स सुतादियुतो नृपः ॥ १ ॥**

अन्वयः— पद्म आभं षष्ठं जिनेंद्रं श्रीपद्मप्रभं आगतं मत्वा तेभ्यः नंतुं सुत आदि युतः नृपः ययौ. ॥ १ ॥

अर्थः—पद्मसरखी कांतिवाळा छठ्ठा श्री पद्मप्रभनामना जिनेश्वरप्रभुने आवेला जाणीने, तेमने वांदवामाटे पुत्रआदिकथी युक्त थयेलो राजा गयो. ॥ १ ॥

**राजा समवसृत्यां स प्रविश्य विधिवत्ततः । पद्मप्रभप्रभुं नत्वा सपुत्रः समुपाविशत् ॥ २ ॥**

अन्वयः—ततः सः राजा विधिवत् समवसृत्यां प्रविश्य, पद्मप्रभ प्रभुं नत्वा सपुत्रः समुपाविशत्. ॥ ॥ २ ॥

अर्थः—पछी ते राजा विधिपुर्वक समवसरणमां दाखल थइने, तथा पद्मप्रभ ने वांदीने पुत्रसहित बेठो. ॥ २ ॥

**सुधाम्बुधिरिव स्वामो गम्भीरनिभृतध्वनिः । धर्मोक्तिशीकरैस्तापमपजह्ने शुभात्मनाम् ॥ ३ ॥**

अन्वयः—सुधा अंबुधिः इव गंभीर निभृत ध्वनिः स्वामी धर्म उक्ति शीकरैः शुभ आत्मनां तापं अपजह्रे. ॥ ३ ॥

अर्थः-अमृतना महासागरनीपेठे गांभिर्ययुक्त ध्वनिवाळा भगवान् धर्मनी देशनारूपी जलबिंदुओवडे भव्यजीवोनो ताप हरवा लाग्या. ॥ ३ ॥

**दुर्गन्धस्य ततः पृष्टे राज्ञा दौर्गन्ध्यकारणे । जज्ञे वाग्मधुभुग्वक्त्रपद्मः पद्मप्रभः प्रभुः ॥ ४ ॥**

अन्वयः—ततः राज्ञा दुर्गंधस्य दौर्गंध्य कारणे पृष्टे वाग् मधुभुक् वक्त्रपद्मः पद्मप्रभः प्रभुः जज्ञे. ॥ ४ ॥

अर्थः—पछी राजाए ते दुर्गंध कुमारनी दुर्गंधनुं कारण पूछवाथी सरस्वतीरूपी भ्रमरना मुखमाटे कमलसरखा ते श्रीपद्मप्रभ-प्रभु बोल्या के, ॥ ४ ॥

**अत्रास्ति भरतक्षेत्रे श्रीमन्नागपुरं पुरम् । ततो द्वादशयोजन्याः प्रान्ते नोलगिरिर्गिरिः ॥ ५ ॥**

अन्वयः-अत्र भरतक्षेत्रे श्रीमत् नागपुरं पुरं अस्ति, ततः द्वादश योजन्याः प्रांते निलगिरिः गिरिः. ॥ ५ ॥

अर्थः—आ भरतक्षेत्रमां श्रीमत् नागपुरनामनुं नगर छे, अने त्यांथी बार जोजन दूर निलगिरिनामनो पर्वतछे. ॥ ५ ॥

**तस्य प्रस्थोपले तस्थौ सोढुं सर्वानुपद्रवान् । शमो संयमराश्याख्यो मुनिर्मासोपवासवान् ॥ ६ ॥**

अन्वयः—तस्य प्रस्थ उपले मास उपवासवान् संयमराशि आख्यः शमी मुनिः सर्वान् उपद्रवान् सोढुं तस्थौ. ॥ ६ ॥

अर्थः—ते पर्वतना खडकना पत्थरपर एक मासना उपवासी संयमराशिनामना एक शांत मुनिराज सर्व उपद्रवो सहन करवाने स्थिर रह्या.

**तस्याद्रेर्मूर्ध्नि पापर्द्धिप्रवर्धितसदारसः । व्याधोऽभून्मृगमाराख्यः क्रौर्याक्रांतः कृतांतवत् ॥ ७ ॥**

अन्वयः—तस्य अद्रेः मूर्ध्नि पापर्द्धि प्रवर्धित सदारसः, कृतांतवत् क्रौर्य आक्रांतः मृगामार आख्यः व्याधः अभूत्. ॥ ७ ॥

अर्थः—ते पर्वतना शिखरपर हमेशां शिकार करवामां वृद्धि पामेला रसवाळो, तथा यमनीपेठे अत्यंत घातकी मृगमारनामनो पाराधि रहेतो हतो. ॥ ७ ॥

**भुरिलब्धिभृतस्तस्य प्रभावेण महामुनेः । नित्यनिःफलपापर्द्धिः सोऽभवन्मृगमारकः ॥ ८ ॥**

अन्वयः—भूरि लब्धि भृतः तस्य महामुनेः प्रभावेण सः मृगमारकः नित्य निःफल पापर्द्धिः अभवत्. ॥ ८ ॥

अर्थः—घणी लब्धिओवाळा ते महामुनिना प्रभावथी ते मृगमारक पाराधिनो शिकारनो प्रयास हमेशां निष्फल जतो हतो. ॥८॥

**व्याधस्य क्रोधलीनस्य तद्वधं ध्यायतस्ततः । उपत्यकापुरं साधुः पारणाय नगादगात् ॥ ९ ॥**

अन्वयः—ततः क्रोध लीनस्य व्याधस्य तत् वधं ध्यायतः, साधुः पारणाय नगात् उपत्यका पुरं अगात्. ॥ ९ ॥

अर्थः—तेथी क्रोधातुर थयेलो ते पाराधि ते साधुने मारीनाखवानो विचार करतो हतो, एवामां ते साधु पण पारणामाटे ते पर्वतपरथी उतरीने तलेटीमां रहेला नगरमां गया. ॥ ९ ॥

**इहांतरे दुरात्मासौ व्याधस्तत्रेन्धनैर्घनः । प्रज्वाल्याधः शिलां सर्वां व्यपनीयान्यतो गतः ॥ १० ॥**

अन्वयः–इह अंतरे असौ दुरात्मा व्याधः तत्र अधः घनैः इंधनैः सर्वां शिलां प्रज्वाल्य व्यपनीय अन्यतः गतः. ॥ १० ॥

अर्थः–एवामां ते दुष्ट पाराधि त्यां नीचेना भागमां घणां बळतणथी ते आखि शिलाने बाळीने, पोते नाशीने बीजी जगोए चाल्यो गयो.

**कृतकृत्यो मुनिस्तत्रावधेर्ज्ञात्वायुषः क्षयम् । कर्मान्तं कर्तुमारोहत्त्यक्ताहारोऽथ तां शिलाम् ॥ ११ ॥**

अन्वयः–अथ कृतकृत्यः तत्र मुनिः अवधेः आयुषः क्षयं ज्ञात्वा कर्म अंतं कर्तुं त्यक्त आहारः, तां शिलां आरोहत्. ॥ ११ ॥

अर्थः–पछी कृतार्थ थइ त्यां आवेला ते मुनिराज अवधिज्ञानथी ( पोतानां ) आयुनो अंत जाणीने, कर्मोनो नाश करवामाटे अनशन लेइने ते ( तपेली ) शिलापर चड्या. ॥ ११ ॥

**तस्य विषहमाणस्य तं तापमतिदारुणम् । शुक्लध्यानं वरज्ञानं निर्वाणं च मुनेरभूत् ॥ १२ ॥**

अन्वयः–तं अति दारुणं तापं विषहमाणस्य तस्य मुनेः शुक्ल ध्यानं, वर ज्ञानं च निर्वाणं अभूत्. ॥ १२ ॥

अर्थः–ते अति भयंकर तापने सहन करता एवा ते मुनिराजने शुक्ल ध्यान, उत्तम ज्ञान तथा मोक्ष प्राप्त थयां. ॥ १२ ॥

**व्याधोऽपि तेन पापेन कुष्ठेन विगलत्तनुः । जगाम दुर्गतिं तत्र सप्तमीमुग्रवेदनाम् ॥ १३ ॥**

अन्वयः—तेन पापेन कुष्ठेन विगलत् तनुः व्याधः अपि तत्र उग्र वेदनां सप्तमीं दुर्गतिं जगाम. ॥ १३ ॥

अर्थः–ते पापथी थयेला कोढवडे सडी गयेलां शरीरवाळो ते पाराधि पण त्यां भयंकर वेदना (सहन करीने) सातमी नरके गयो.

**स्वयंभूरमणे मत्स्यीभूयाथो भूरिपातकः । दीर्घदुःखमयीं प्राप षष्ठीं निरयभूमिकाम् ॥ १४ ॥**

अन्वयः—अथ भूरि पातकः स्वयंभूरमणे मत्स्यीभूय दीर्घदुःख मयीं षष्ठीं निरय भूमिकां प्राप. ॥ १४ ॥

अर्थ –पछी घणां पापोवाळो ते पाराधि स्वयंभूरमणनामना समुद्रमां मत्स्यरूपे थइने अतिदुःखवाळी छठ्ठी नरकभूमिमां गयो.

**सर्पीभूय च पापीयान्पञ्चमीं दुर्गतिं गतः । सिंहीभूय जगामैष चतुर्थीमथ भूमिकाम् ॥ १५ ॥**

अन्वयः–च पापीयान् सर्पीभूय पंचमीं दुर्गतिं गतः, अथ सिंहीभूय एषः चतुर्थीं भूमिकां जगाम. ॥ १५ ॥

अर्थः–वळी ते पापात्मा सर्प थइने पांचमी नरके गयो, तथा पछी सिंह थइने ते चोथी नरके गयो. ॥ १५ ॥

**पापी द्वीपी बभूवाथ तृतीयं नरकं ययौ । ओतुस्ततो द्वितीयं च बकोऽथ प्रथमं च सः ॥ १६ ॥**

अन्वयः–अथ पापी द्वीपी बभूव, तृतीयं नरकं ययौ, ततः ओतुः, च द्वितीयं, अथ बकः, च स. प्रथमं. ॥ १६ ॥

अर्थः—पछी ते पापी दीपडो थयो, तथा त्यांथी त्रीजी नरके गयो, पछी बीलाडो थइने बीजी नरके गयो, तथा पछी बगलो थइने ते पेहेली नरके गयो ॥ १६ ॥

**चण्डालादिभवेष्वेवं भ्रान्त्वा नागपुरेऽजनि । सूनुर्वृषभसेनाख्यो गन्धार्या गोपयोषितः ॥ १७ ॥**

अन्वयः–एवं चंडाल आदि भवेषु भ्रांत्वा नागपुरे गंधार्याः गोप योषितः वृषभसेन आख्यः सूनुः अजनि. ॥ १७ ॥

अर्थः–एरीते चंडाल आदिकोना भवोमां भमीने ते नागपुर नामना नगरमां गंधारी नामनी गोवाळनी स्त्रीनो वृषभसेननामे पुत्र थयो.

**चारयन्श्रावकाणां गाः सञ्जातेषां तु भद्रकः । सोऽगान्नीलगिरेस्तव्यां दैवाद्दावेन वेष्टितः ॥ १८ ॥**

अन्वयः–श्रावकाणां गाः चारयन् तु तेषां संगात् भद्रकः सः नीलगिरेः तव्यां अगात्, दैवात् दावेन वेष्टितः ॥ १८ ॥

अर्थः—श्रावकोनी गायोने चरावतो, तथा ते श्रावकोनी सोबतथी भद्रक थयेलो ते नीलगिरिनी तलेटीमां गयो, एवामां दैवयोगे ते दावानलथी वेराइ गयो. ॥ १८ ॥

**मयापि प्राग्भवे कोऽपि दग्ध इत्यनुतापभाक् । स्मरन्पञ्चनमस्कारमदह्यत दवेन सः ॥ १९ ॥**

अन्वयः–मया अपि प्राग्भवे कः अपि दग्धः, इति अनुतापभाक् सः पंचनमस्कारं स्मरन् दवेन अदह्यत. ॥ १९ ॥

अर्थः–में पण पूर्व भवमां कोइकने पण बाळयो छे, एम पश्चात्ताप करतो ते पंचपरमेष्ठिना नमस्कारनुं स्मरण करतोथको दावानलथी बळी गयो. ॥ १९ ॥

**सुकृतेन ततस्तेन तव भूप सुतोऽभवत् । सोऽयं शेषेण दोषेण महादुर्गन्धविग्रहः ॥ २० ॥**

अन्वयः–(हे) भूप ! ततः तेन सुकृतेन सः अयं तव सुतः अभवत्, शेषेण दोषेण महादुर्गंध विग्रहः ॥ १० ॥

अर्थः–(वळी) हे राजन् ! त्यारपछी ते पुण्यवडे करीने ते आ तारो पुत्र थयो छे, तथा बाकी रहेलां दुष्कर्मथी ते अति दुर्गंध शरीरवाळो थयो. ॥ २० ॥

**तयोक्त्या जिनराजस्य राजसूनुर्भयाकुलः । जातिस्मृतिवशाज्जातकम्पः प्राञ्जलिरालपत् ॥ २१ ॥**

अन्वयः—जिन राजस्य तया उक्त्या भय आकुलः राज सूनुः जाति स्मृति वशात् जात कंपः प्रांजलिः आलपत्. ॥ २१ ॥

अर्थः—जिनेश्वरप्रभुनी तेवीरीतनी वाणीथी भयभीत थयेलो ते राजकुमार जाति स्मरण ज्ञान थवाथी धुजतोथको हाथ जोडीने कहेवा लाग्यो के, ॥ २१ ॥

**नाथ नाथ भवाम्भोधेः समुद्धर समुद्धर । तैर्मोक्ष्येऽहं कथं पापैर्निवेदय निवेदय ॥ २२ ॥**

अन्वयः-(हे) नाथ! नाथ! भव अंभोधेः समुद्धर? समुद्धर? तैः पापैः अहं कथं मोक्ष्ये? निवेदय? निवेदय? ॥ २२ ॥

अर्थः-हे! स्वामी! हे स्वामी! आ संसार सागरमांथी मारो उद्धार करो? उद्धार करो? तथा ते पापोथी हुं केम मूकाइश? ते निवेदन करो? निवेदन करो? ॥ २२ ॥

**इदं वदति दीनेऽस्मिन्कृपाराशिर्नृपात्मजे । श्रीजिनो वृजिनद्रोही रोहिणीव्रतमादिशत् ॥ २३ ॥**

अन्वयः—अस्मिन् दीने नृप आत्मजे इदं वदति वृजिन द्रोही श्रीजिनः रोहिणी व्रतं आदिशत्. ॥ २३ ॥

अर्थः-ते दीन राजकुमारे एम कहेवाथी पापोनो नाश करनारा ते श्रीजिनेश्वरप्रभुए तेने रोहिणीव्रत करवानो उपदेश आप्यो.

**जिनं नत्वाथ सपरीवारः पुरमगान्नृपः । स चकार कुमारस्तु यथोक्तं रोहिणीव्रतम् ॥ २४ ॥**

अन्वयः—अथ जिनं नत्वा नृपः सपरीवारः पुरं अगात्, तु सः कुमारः यथोक्तं रोहिणी व्रतं चकार. ॥ २४ ॥

अर्थः-पछी जिनेश्वरप्रभुने वांदीने राजा परीवारसहित नगरमां गयो, अने ते राजकुमार पण कहेली विधिपूर्वक रोहिणीव्रतकरवा लाग्यो

**उद्भविष्यन्मुक्तिफलै रोहिणीव्रतवल्लिजैः । पुण्यपुष्पैरदुर्गन्धः सुगन्धश्च बभूव सः ॥ २५ ॥**

अन्वयः—च उद्भविष्यत् मुक्ति फलैः रोहिणी व्रत वल्लिजैः पुण्य पुष्पैः सः अदुर्गंधः सुगंधः बभूव. ॥ २५ ॥

अर्थः—जेमांथी मुक्तिरूपी फलो उत्पन्न थवानां छे, एवी रोहिणीव्रतरूपी वेलडीमांथी थयेलां पुण्यरूपी पुष्पोवडे ते राजकुमार दुर्गंध दूर थवाथी सुगंधवाळो थयो. ॥ २५ ॥

**प्रीतिपूरपरीतेन पुरि कारयतोत्सवम् । राज्ञास्य विदधे नाम सुगन्ध इति विश्रुतम् ॥ २६ ॥**

अन्वयः—प्रीति पूर परीतेन राज्ञा पुरि उत्सवं कारयता अस्य " सुगंधः " इति नाम विश्रुतं विदधे. ॥ २६ ॥

अर्थः—(पछी) हर्षना समूहथी भरेला ते राजाए नगरमां महोत्सव करावीने ते राजकुमारनुं "सुगंध" नाम प्रसिद्ध कर्युं. ॥ २६ ॥

**ततस्त्वमपि कल्याणि कुर्वाणा रोहिणीव्रतम् । तद्वद्भविष्यसि भृशं सौख्यसंभारभाजनम् ॥ २७ ॥**

अन्वयः—(हे) कल्याणि ! ततः त्वं अपि रोहिणी व्रतं कुर्वाणा तद्वत् भृशं सौख्य संभार भाजनं भविष्यसि. ॥ २७ ॥

अर्थः—हे कल्याणि ! तेथी तुं पण रोहिणीव्रत करवाथी ते सुगंधकुमारनीपेठे अति सुखना समूहना पात्ररूप थइश. ॥ २७ ॥

**इति श्रुत्वा च नत्वा च मुनीन्द्रममृतासवम् । निःशोका सह लोकेन दुर्गन्धापि पुरेऽविशत् ॥ २८ ॥**

अन्वयः—इति श्रुत्वा च अमृतासवं मुनींद्रं नत्वा च निःशोका दुर्गंधा अपि लोकेन सह पुरे अविशत्. ॥ २८ ॥

अर्थः—एम सांभळीने, तथा ते अमृतासव नामना मुनिराजने नमीने शोकरहित थयेली ते दुर्गंधा पण लोकोसहित नगरमां गइ.

**निर्वाणारोहिणीभूतरोहिणीव्रतरोहिणी । दुर्गन्धेनाथ दुर्गन्धामोचि दुःकर्मबन्धुना ॥ २९ ॥**

अन्वयः—अथ निर्वाण आरोहिणीभूत रोहिणी व्रत रोहिणी दुर्गंधा दुःकर्म बंधुना दुर्गंधेन अमोचि. ॥ २९ ॥

अर्थः–पछी मोक्षनी निःसरणी सरखां रोहिणीव्रत करनारी ते दुर्गंधा, दुष्कर्मना बांधव सरखा दुर्गंधथी मुक्त थइ. ॥ २९ ॥

**रूपं किमपि बिभ्राणा सा तेन तपसा सती । सुरस्त्रीणामहंकारमिव हन्तुमगाद्दिवम् ॥ ३० ॥**

अन्वयः–तेन तपसा किं अपि रूपं बिभ्राणा सा सती सुरस्त्रीणां अहंकारं हंतुं इव दिवं अगात्. ॥ ३० ॥

अर्थ।–ते तपथी कोइ उमदा प्रकारनां रूपने धारण करनारी ते सती, जाणे देवांगनाओना अहंकारने दूर करवा माटे देवलोकमां गइ.

**चिरं तत्र विचित्रान्सा भोगान्भुक्त्वा द्युतश्च्युता । चम्पायां मघवत्क्ष्मापलक्ष्मीदेव्योः सुताभवत् ३१**

अन्वयः—तत्र चिरं विचित्रान् भोगान् भुक्त्वा द्युतः च्युता सा चंपायां मघवत् क्ष्माप लक्ष्मी देव्योः सुता अभवत्. ॥ ३१ ॥

अर्थः—ते देवलोकमां घणा काळसुधी विविध प्रकारना भोगो भोगवीने त्यांथी चव्याबाद ते चंपानगरीमां मघवाराजा तथा लक्ष्मीराणीनी पुत्री थइ. ॥ ३१ ॥

**श्रीमन्नशोकलोकेश त्वत्प्रिया रोहिणी हि सा । रोहिणीव्रतमाहात्म्याददुःखा सौख्यभागभूत् ॥ ३२ ॥**

अन्वयः—(हे) श्रीमन् अशोक लोकेश ! हि सा त्वत् प्रिया रोहिणी, रोहिणीव्रत माहात्म्यात् अदुःखा सौख्यभाग् अभूत्.

अर्थः–हे श्रीमान् अशोक राजेंद्र ! खरेखर ते आ तारी राणी रोहिणी छे, अने रोहिणीव्रतना महिमाथी ते कष्टरहित सुख धारण करनारी थइ छे. ॥ ३२ ॥

**यस्तु षष्ठजिनादिष्टं सिषेवे रोहिणीव्रतम् । अथ तस्य सुगन्धस्य स्वरूपं शृणु भूपते ॥ ३३ ॥**

अन्वयः—(हे) भूपते ! तु यः षष्ठ जिन आदिष्टं रोहिणीव्रतं सिषेवे. तस्य सुगंधस्य स्वरूपं अथ शृणु ? ॥ ३३ ॥

अर्थः—हे राजन् ! वळी जेणे छठ्ठा जिनेश्वरप्रभुए उपदेशेलुं रोहिणीव्रत सेव्युं हतुं, ते सुगंधकुमारनुं वृत्तांत हवे (तमो सांभळो)

**नृपं सिंहपुरे कृत्वा तं सुगन्धं स्वनन्दनम् । परिव्रज्याटवीसिंहः सिंहसेनोऽजनि स्वयम् ॥ ३४ ॥**

अन्वयः–सिंहसेनः सिंहपुरे स्वनंदनं तं सुगंधं नृपं कृत्वा, स्वयं परिव्रज्य अटवी सिंहः अजनि. ।' ३४ ॥

अर्थः–(पछी) ते सिंहसेनराजा सिंहपुरमां पोताना पुत्र ते सुगंधकुमारने राजा करीने पोते परिव्राजकपणुं लइने वनमां सिंहरूपे उत्पन्न थयो ॥ ३४ ॥

**प्रत्यक्षं प्रत्ययं वीक्ष्य दुर्गन्धध्वंसतोऽद्भुतम् । शुद्धे धर्मेऽधिकां श्रद्धां सुगन्धो विदधे ध्रुवम् ॥ ३५ ॥**

अन्वयः–सुगंधः दुर्गंध ध्वंसतः प्रत्यक्षं अद्भुतं प्रत्ययं वीक्ष्य ध्रुवं शुध्धे धर्मे अधिकां श्रद्धां विदधे. ॥ ३५ ॥

अर्थः–पछी ते सुगंधराजा ( पोतानी ) दुर्गंधना नाशथी प्रत्यक्षपणे आश्चर्यकारक खातरी थयेली जोइने खरेखर शुद्ध धर्ममां अधिक श्रद्धा धरवा लाग्यो. ॥ ३५ ॥

**जयन्बलेन बाह्यारीनान्तरारींश्च सक्षमः । चिरं धरित्रीं धर्मं च श्रीवर्यः पर्यपालयत् ॥ ३६ ॥**

अन्वयः–सक्षमः श्रीवर्यः (सः) बलेन बाह्य अरीन, च आंतर अरीन् जयन् चिरं धरित्रीं च धर्मं पर्यपालयत्. ॥ ३६ ॥

अर्थः—हवे ते नंदिमित्रशेठे उत्तम गुणोथी प्रख्यात थयेली पोतानी [illegible] अने [illegible] नामे पुत्रीओने ते [illegible] परणावी हती. ॥ ४७ ॥

**अर्ककीर्तिकुमारस्ते मारकीर्तिश्रियाविव । सुहृदा मेघसेनेन [illegible] ॥ ४८ ॥**

अन्वयः-अर्ककीर्ति कुमारः रूप लोभात् मार कीर्तिश्रियौ इव ते मेघसेनेन सुहृदा अहारयत्. ॥ ४८ ॥

अर्थः—(परंतु) अर्ककीर्तिकुमारे (तेओना) रूपथी लोभाइने, कामदेवनी कीर्ति अने लक्ष्मी सरखी ते बन्ने कन्याओनुं (पोताना) मेघसेन नामना मित्र मारफते हरण कराव्युं. ॥ ४८ ॥

**राजा विमलकीर्तिस्तद्विज्ञाय श्रेष्ठिनो मुखात् । विमोच्य कन्यके लोकमशोकमकरोत्ततः ॥ ४९ ॥**

अन्वयः-ततः विमलकीर्तिः राजा श्रेष्ठिनः मुखात् तत् विज्ञाय, कन्यके विमोच्य लोकं अशोकं अकरोत्. ॥ ४९ ॥

अर्थः—पछी ते विमलकीर्तिराजाए शेठना मुखथी ते हकीकत जाणीने, ते कन्याओने छोडावीने लोकोने शोकरहित कर्या.

**यः प्रजां पीडयत्येवं किं तेनेति नृपो नयी । तदा तदागसा पुत्रं समित्रं निरकासयत् ॥ ५० ॥**

अन्वयः—यः एवं प्रजां पीडयति, तेन किं ? इति नयी नृपः तदा तत् आगसा समित्रं पुत्रं निरकासयत्. ॥ ५० ॥

अर्थः-जे आ रीते प्रजाने पीडे छे, तेनुं (अहीं) शुं प्रयोजन छे? एम विचारी ते न्यायी राजाए ते समये ते अपराधथी मित्र सहित पुत्रने कहाडी मेल्यो. ॥ ५० ॥

तस्य शस्यप्रथा पृथ्वीप्रियस्य हृदयप्रिया । मुखनिर्जितपद्मश्रीः पद्मश्रीः संज्ञयाजनि ॥ ४० ॥

अन्वयः—तस्य पृथ्वी प्रियस्य शस्यप्रथा, हृदय प्रिया, मुखनिर्जित पद्मश्रीः पद्मश्रीः संज्ञया अजनि. ॥ ४० ॥

अर्थः—ते राजाने विस्तीर्ण कीर्तिवाळी, हृदयने वल्लभ, तथा मुखनी शोभाथी कमळनी लक्ष्मीने पण जीतनारी पद्मश्रीनामनी राणी हती.

तत्कुक्षौ स्वर्गतो जीवः सुगन्धस्य धरेशितुः । चतुर्दशमहास्वप्नसूचितः समवातरत् ॥ ४१ ॥

अन्वयः—सुगंधस्य धरा ईशितुः जीवः स्वर्गतः च्युतः, चतुर्दश महास्वप्न सूचितः तत् कुक्षौ समवातरत्. ॥ ४१ ॥

अर्थः—हवे ते सुगंधराजानो जीव स्वर्गमांथी चवीने, चौद महा स्वप्नोवडे सूचित थयो थको ते पद्मश्रीराणीनी कुक्षिमां अवतर्यो.

महनोयं महैर्देवी सुपुत्रं सुषुवेऽथ सा । अर्ककीर्तिरिति क्ष्मापस्तस्य नाम विनिर्ममे ॥ ४२ ॥

अन्वयः—अथ सा देवी महैः महनीयं सुपुत्रं सुषुवे, तस्य क्ष्मापः अर्ककीर्तिः इति नाम विनिर्ममे. ॥ ४२ ॥

अर्थः—पछी ते राणीए महोत्सवोथी पूजवालायक उत्तम पुत्रने जन्म आप्यो, अने राजाए तेनुं अर्ककीर्ति नाम पाडयुं. ॥ ४२ ॥

स कीर्तिकौमुदीकीर्णनभाश्चन्द्र इव व्यभात् । यूना तेन समग्राहि समग्रा हि कलावलिः ॥ ४३ ॥

अन्वयः—कीर्ति कौमुदी कीर्ण नभाः सः चंद्रः इव व्यभात्, तेन यूना हि समग्रा कला आवलिः समग्राहि. ॥ ४३ ॥

अर्थः—कीर्तिरूपी चांदनीथी भरेल छे आकाश जेणे, एवो ते अर्ककीर्तिकुमार चंद्रनीपेठे शोभवा लाग्यो, तथा यौवनवय पामीने

तेणे खरेखर सर्व कलाओनी श्रेणिने ग्रहण करी. ॥ ४३ ॥

**सब्रह्मचारो विद्यासु सहचारी च केलिषु । आसीत्तस्य कुमारस्य मेघसेनाभिधः सुहृत् ॥ ४४ ॥**

अन्वयः-तस्य कुमारस्य विद्यासु सब्रह्मचारी, च केलिषु सहचारी, मेघसेन अभिधः सुहृत् आसीत्. ॥ ४४ ॥

अर्थः—ते कुमारनो विद्याभ्यासमां तथा क्रीडाओमां सहचारी मेघसेन नामे मित्र हतो. ॥ ४४ ॥

**इतश्च मथुरापुर्यामुत्तराभाजि मन्दरः । श्रेष्ठिसागरदत्तस्य लक्ष्मीवत्यां सुतोऽभवत् ॥ ४५ ॥**

अन्वयः-इतश्च उत्तराभाजि मथुरा पुर्यां श्रेष्ठि सागरदत्तस्य लक्ष्मीवत्यां मंदरः सुतः अभवत्. ॥ ४५ ॥

अर्थः—हवे उत्तर मथुरा नगरीमां सागरदत्तशेठनी लक्ष्मीवतीनामनी स्त्रीथी जन्मेलो मंदर नामे पुत्र हतो. ॥ ४५ ॥

**वणिग्दक्षिणदिग्भाजि मथुरायामभूत्पुनः । नन्दिमित्राभिधः श्रेष्ठी सुभद्राख्या च तत्प्रिया ॥ ४६ ॥**

अन्वयः-पुनः दक्षिण दिग् भाजि मथुरायां नंदिमित्र अभिधः वणिक् श्रेष्ठी अभूत्, च सुभद्रा आख्या तत्प्रिया. ॥ ४६ ॥

अर्थः—वळी दक्षिणमथुरामां नंदिमित्र नामनो वणिक् श्रेष्ठी हतो, अने सुभद्रानामनी तेनी स्त्री हती. ॥ ४६ ॥

**ददाते मन्दराय स्वे नन्दिमित्रेण कन्यके । विश्रुते कमलश्रीश्च गुणमाला च सद्गुणैः ॥ ४७ ॥**

अन्वयः-नंदिमित्रेण सद्गुणैः विश्रुते स्वे कमलश्रीः च गुणमाला कन्यके मंदराय ददाते. ॥ ४७ ॥

अर्थः–क्षमावाळो, तथा लक्ष्मीथी शोभतो ते सुगंधराजा पराक्रमथी बहारना अने अंतरंग शत्रुओने जीततोथको घणाकालसुधी पृथ्वीनुं अने धर्मनुं रक्षण करवा लाग्यो. ॥ ३६ ॥

**सद्बोधः श्राद्धधर्मैकध्यानाधानमहाधनः । समाधिमृत्युतः प्राप क्ष्मापतिः स्वर्गसंपदम् ॥ ३७ ॥**

अन्वयः—सद्बोधः, श्राद्ध धर्म एक ध्यान आधान महाधनः क्ष्मापतिः समाधि मृत्युतः स्वर्ग संपदं प्राप. ॥ ३७ ॥

अर्थः—उत्तम बोधवाळो, तथा श्रावक धर्मना एक ध्यानने धारण करवारूप महान धनवाळो ते राजा समाधिपूर्वक मरण पामीने स्वर्गलक्ष्मी पाम्यो. ॥ ३७ ॥

**इतः पूर्वविदेहेऽस्ति विजयः पुष्कलावती । तत्रास्ते नगरी विश्वमण्डनं पुण्डरीकिणी ॥ ३८ ॥**

अन्वयः–इतः पूर्व विदेहे पुष्कलावती विजयः अस्ति, तत्र विश्व मंडनं पुंडरीकिणी नगरी आस्ते. ॥ ३८ ॥

अर्थः—हवे पूर्वमहाविदेहमां पुष्कलावती नामे विजय छे, अने तेमां जगतना अलंकार सरखी पुंडरीकिणी नामनी नगरी छे.

**सा शक्रेणेव नाकश्रीकला विमलकीर्तिना । राज्ञापालि पुरा चन्द्रकलाविमलकीर्तिना ॥ ३९ ॥**

अन्वयः—शक्रेण इव चंद्रकला विमल कीर्तिना विमल कीर्तिना राज्ञा नाक श्रीकला सा पुरा अपालि. ॥ ३९ ॥

अर्थः—इंद्र सरखो तथा चंद्रनी कला सरखी निर्मल कीर्तिवाळो विमलकीर्ति नामनो राजा, देवलोकनी लक्ष्मीसरखी मनोहर एवी ते नगरीनुं पूर्वे पालन करतो हतो. ॥ ३९ ॥

जलस्थलद्युदेवीनामपि दृष्टीर्विलोभयन् । वीतशोकां पुरीमर्ककीर्तिर्मित्रयुतो ययौ ॥ ५१ ॥

अन्वयः-अर्ककीर्तिः मित्रयुतः जल स्थल द्यु देवीनां अपि दृष्टीः विलोभयन् वीतशोकां पुरीं ययौ. ॥ ५१ ॥

अर्थः-पछी ते अर्ककीर्तिकुमार ते मित्रसहित जलवासी, स्थलवासी, तथा देवलोकवासी देवीओनी पण आंखोने ललचावतो थको वीतशोकानगरीमां गयो. ॥ ५१ ॥

नृपालिमालितोद्यानामर्ककीर्तिर्विलोक्य ताम् । किमेतदिति पप्रच्छ नरं कंचिदुवाच सः ॥ ५२ ॥

अन्वयः-नृप आलि मालित उद्यानां तां विलोक्य अर्ककीर्तिः किं एतत् ? इति कंचित् नरं पप्रच्छ, सः उवाच. ॥ ५२ ॥

अर्थः-राजाओनी श्रेणिथी शोभितां उद्यानवाळी ते नगरीने जोइने अर्ककीर्तिए आ शुं छे ? एम कोइक पुरुषने पूछवाथी तेणे कह्युं के.

राजास्तीह श्रियामुत्साहनो विमलवाहनः । गुरुणा धीगुणेनासिर्यस्याहिंसाव्रती कृतः ॥ ५३ ॥

अन्वयः-इह श्रियां उत्साहनो विमलवाहनः राजा अस्ति, धीगुणेन गुरुणा यस्य असिः अहिंसाव्रती कृतः. ॥ ५३ ॥

अर्थः-आ नगरमां लक्ष्मीना उत्साहवाळो विमलवाहननामे राजा छे, के जेनी तलवारने धीगुणनामना (अथवा बुद्धिना गुणरूपी) गुरुए अहिंसाना व्रतवाळी करी छे. ॥ ५३ ॥

दिद्युते सुप्रभा नाम सत्प्रभाधाम तत्प्रिया । जाने यद्रूपनिष्पत्तौ विधातापि चमत्कृतः ॥ ५४ ॥

अन्वयः-सत्प्रभा धाम सुप्रभा नाम तत् प्रिया दिद्युते, जाने, यत् रूप निष्पत्तौ विधाता अपि चमत्कृतः. ॥ ५४ ॥

अर्थः-उत्तम कांतिना स्थानसरखी सुप्रभानामनी तेनी राणी शोभती हती, अने हुं एम मानुं छुं के, जेणीनुं रूप बनाव्याबाद विधाता पण आश्चर्य पाम्यो छे. ॥ ५४ ॥

**अनयोस्तनयास्ति श्रीरिव स्मरमहीभुजः । नाम्ना जयवती धाम्ना हेम्नामिव समुच्छ्रयः ॥ ५५ ॥**

अन्वयः-स्मर महीभुजः श्रीः इव अनयोः जयवती नाम्ना तनया अस्ति, धाम्ना हेम्नां समुच्छ्रयः इव. ॥ ५५ ॥

अर्थः-कामदेवरूपी राजानी लक्ष्मी सरखी तेओने जयवतीनामनी पुत्री छे, के जे कांतिवडे करीने सुवर्णना राशिसरखी देखाय छे.

**सत्यप्रत्ययदैवज्ञादिष्टज्ञानवशंवदः । नृपः प्रत्यशृणोद्दातुं तां राधावेधवेधसे ॥ ५६ ॥**

अन्वयः—सत्य प्रत्यय दैवज्ञ आदिष्ट ज्ञान वशंवदः नृपः तां राधावेध वेधसे दातुं प्रत्यशृणोत्, ॥ ५६ ॥

अर्थः-खरीखातरीवाळा ज्योतिषीए कहेलां ज्ञानने वश थयेला राजाए तेणीने राधवेध साधनारा वरने परणाववानी प्रतिज्ञा करी हती. ॥ ५६ ॥

**तद्भूभुजो भुजोद्दर्पाः कन्दर्पाज्ञावशंवदाः । के केऽत्र नागमन्नाम राधावेधविधायिनः ॥ ५७ ॥**

अन्वयः-तत् भुज उद्दर्पाः, कंदर्प आज्ञा वशंवदाः, राधावेध विधायिनः के के भूभुजः अत्र नाम न आगमन्? ॥ ५७ ॥

अर्थः-तेथी भुजबळना गर्ववाळा, तथा कामदेवनी आज्ञाने वश थयेला, अने राधावेध करनारा कया कया राजाओ अहीं नथी आव्या?

**इति मत्वा प्रमुदितः समित्रो नृपनन्दनः । ययौ तत्र द्रुतं राधायन्त्रं यत्र प्रपञ्चितम् ॥ ५८ ॥**

अन्वयः—इति मत्वा प्रमुदितः नृपनंदनः समित्रः, यत्र राधायंत्रं प्रपंचितं, तत्र द्रुतं ययौ. ॥ ५८ ॥

अर्थः—एम जाणीने खुशीथयेलो ते राजपुत्र हर्षित थइने मित्रसहित, ज्यां ते राधायंत्र रचेलुं हतुं, त्यां तुरत गयो. ॥ ५८ ॥

**तत्र यन्त्रं भ्रमिश्रान्तमिवातुलतृषाकुलम् । सर्वेषामपि भूपानां पपौ कीर्तिमयं पयः ॥ ५९ ॥**

अन्वयः—तत्र भ्रमि श्रांतं अतुल तृषा आकुलं इव यंत्रं सर्वेषां अपि भूपानां कीर्तिमयं पयः पपौ. ॥ ५९ ॥

अर्थः—त्यां भमवाथी जाणे थाकी गयुं होय नही ! तेम जाणे अतितृषाथी व्याकुल थयुं होय नही ! तेम ते यंत्र सर्व राजाओना कीर्तिरूपी जळने पी गयुं. ॥ ५९ ॥

**चमत्कारं हृदि म्लानिमानने भूभुजां सृजन् । उत्कीर्तिरर्ककीर्तिस्तु राधावेधविधिं व्यधात् ॥ ६० ॥**

अन्वयः—उत्कीर्तिः अर्ककीर्तिः तु भूभुजां हृदि चमत्कारं, आनने म्लानिं सृजन् राधावेध विधिं व्यधात्. ॥ ६० ॥

अर्थः—परंतु विस्तीर्ण कीर्तिवाळा ते अर्ककीर्तिकुमारे तो ते राजाओना हृदयमां चमत्कार, तथा मुखपर म्लानि फेलावतां थकां राधावेध साध्यो. ॥ ६० ॥

**पर्यणैषीज्जयवतीमसौ ससानुजान्विताम् । अर्ककीर्तिस्ततः प्राचीमिवार्कः सप्तदिग्युताम् ॥ ६१ ॥**

अन्वयः—ततः अर्कः सप्त दिग्युतां प्राचीं इव, असौ अर्ककीर्तिः सप्त अनुजा अन्वितां जयवतीं पर्यणैषीत्. ॥ ६१ ॥
अर्थः—पछी सूर्य सात दिशाओसहित जेम पूर्वदिशाने परणे, तेम ते अर्ककीर्ती सात व्हेनो सहित ते जयवतीने परण्यो ॥६१॥

**तत्र तस्थौ चिरं भोगभरादनुभवन्सुखम् । कलत्रैरष्टभिः सोऽब्जपत्रैरिव मधुव्रतः ॥ ६२ ॥**

अन्वयः—तत्र अब्ज पत्रैः मधुव्रतः इव, अष्टभिः कलत्रैः भोग भरात् सुखं अनुभवन् सः चिरं तस्थौ. ॥ ६२ ॥
अर्थः—( पछी ) त्यां कमलपत्रोसाथे जेम भमरो, तेम ते आठे स्त्रीओसाथे भोगोना समूहथी सुख भोगवतोथको ते कुमार घणा कालसुधी रह्यो. ॥ ६२ ॥

**विमलाद्रौ जिनं नन्तुं गतोऽन्येद्युर्वृतो जनैः । जिनार्चारचनैः श्रान्तो रात्रौ सुष्वाप तत्र सः ॥ ६३ ॥**

अन्वयः—अन्येद्युः जनैः वृतः सः जिनं नंतुं विमल अद्रौ गतः, तत्र जिन अर्चा रचनैः श्रांतः रात्रौ सुष्वाप. ॥ ६३ ॥
अर्थः—पछी एकदिवसे लोकोथी वींटायेलो ते कुमार जिनेश्वर प्रभुने वांदवा माटे विमलाचलपर गयो, तथा त्यां जिनपूजन करवाथी थाकीने रात्रिए सुइ रह्यो. ॥ ६३ ॥

**गिरावागतया तत्र खेचर्या चित्रलेखया । कुमारेन्द्रः सनिद्रस्तु हृतो रूपानुरक्तया ॥ ६४ ॥**

अन्वयः—तु तत्र गिरौ आगतया चित्रलेखया खेचर्या रूप अनुरक्तया सनिद्रः कुमार इंद्रः हृतः. ॥ ६४ ॥
अर्थः—एवामां ते पर्वतपर आवेली चित्रलेखानामनी विद्याधरीए, तेना रूपथी मोहित थइने ते कुमारनुं हरण कर्युं. ॥ ६४ ॥

**वैताढ्यमूर्ध्नि तं क्षीणनिद्रं वीक्ष्य रुषारुणम् । सा सिद्धायतने मुक्त्वापहारभयभाग्ययौ ॥ ६५ ॥**

अन्वयः—वैताढ्य मूर्ध्नि क्षीणनिद्रं तं रुषा अरुणं वीक्ष्य, अपहार भयभाग् सा सिद्ध आयतने मुक्त्वा ययौ. ॥ ६५ ॥

अर्थः—पछी वैताढ्यना शिखरपर जागी गयेला ते कुमारने क्रोधथी लाल थयेलो जोइने, तेना हरणथी डरेली ते विद्याधरी (तेने) सिद्धमंदिरमां मूकीने नाशीगइ. ॥ ६५ ॥

**द्राक्सिद्धायतने वज्रकपाटैरुदघट्यत । तस्मिन्दृष्टे स्वयं पद्मपत्रैरिव विवस्वति ॥ ६६ ॥**

अन्वयः—विवस्वति दृष्टे पद्म पत्रैः इव, तस्मिन् दृष्टे सिद्ध आयतने वज्र कपाटैः द्राक् उदघट्यत. ॥ ६६ ॥

अर्थः—सूर्यना देखावथी जेम कमलना पत्रो खुल्ली जाय, तेम ते कुमारनी दृष्टिथी ते सिद्धमंदिरना वज्रना कमाडो तुरत खुल्लां थइ गयां.

**हर्षसंदर्भनिर्भग्नदुरितो नृपनन्दनः । ततः प्रण्यपतत्सिद्धान्सिद्धायतनवर्तिनः ॥ ६७ ॥**

अन्वयः—ततः हर्ष संदर्भ निर्भग्न दुरितः नृप नंदनः सिद्ध आयतन वर्तिनः सिद्धान् प्रण्यपतत्. ॥ ६७ ॥

अर्थः—पछी हर्षना आवेशथी खेदने दूर करनारा ते राजकुमारे ते सिद्धमंदिरमां रहेला सिद्धभगवानोने वंदन कर्युं. ॥ ६७

**तत्र नत्वाथ तं प्राह पुमान्कश्चित्कृताञ्जलिः । अद्वैताढ्योल्लसल्लक्ष्मीर्वैताढ्योऽयं गिरिः प्रभो ॥ ६८ ॥**

अन्वयः—अथ तत्र तं नत्वा कश्चित् पुमान् कृत अंजलिः प्राह, (हे) प्रभो ! अद्वैत आढ्य उल्लसत् लक्ष्मीः अयं वैताढ्यःगिरिः

अर्थः—पछी त्यां तेने नमीने कोइक पुरुषे हाथ जोडीने कह्युं के, हे स्वामी! अनुपम अने विस्तीर्ण उल्लसायमान थती शोभावाळो आ वैताढ्य पर्वत छे. ॥ ६८ ॥

**इहाभयपुरं नाम पुरमास्ते रमास्पदम् । राजा पवनवेगोऽत्र वैरिगोत्रदवानलः ॥ ६९ ॥**

अन्वयः—इह रमा आस्पदं अभयपुरं नाम पुरं आस्ते, अत्र वैरि गोत्र दवानलः पवनवेगः राजा. ॥ ६९ ॥

अर्थः—अहीं लक्ष्मीना स्थानरूप अभयपुरनामनुं नगर छे, तथा त्यां वैरीओना गोत्रने दावानल सरखो पवनवेग नामे राजा छे.

**तस्य चित्तप्रिया चित्तवेगाख्यास्ति स्मरायुधम् । तत्सुता गतशोका च रूपे वाचामगोचरः ॥ ७० ॥**

अन्वयः—तस्य स्मर आयुधं चित्तवेगा आख्या चित्त प्रिया अस्ति, च रूपे वाचां अगोचरः गतशोका तत्सुता. ॥ ७० ॥

अर्थः—ते राजाने कामदेवना आयुध सरखी चित्तवेगानामनी हृदयवल्लभ राणी छे, तथा वचनथी न वर्णवी शकाय, एवां रूपवाळी गतशोकानामनी तेनी पुत्री छे. ॥ ७० ॥

**को भविष्यति भर्तास्याः सुताया इति भूभुजा । पृष्टः प्राह त्रिकालज्ञः पुरापि प्रत्ययप्रदः ॥ ७१ ॥**

अन्वयः—अस्याः सुतायाः भर्ता कः भविष्यति? इति भूभुजा पृष्टः, पुरा अपि प्रत्यय प्रदः त्रिकालज्ञः प्राह. ॥ ७१ ॥

अर्थः—आ पुत्रीनो भर्तार कोण थशे? एम राजाए पूछवाथी, पूर्वे पण जेनी खातरी थयेली छे, एवा निमित्तियाए कह्युं के, ७१

**रूपानुरक्तया दूराद्विद्याधर्या हृतः प्रभो । भविष्यच्चक्रवर्तीति पुत्र्या भर्ता भविष्यति ॥ ७२ ॥**

अन्वयः—(हे) प्रभो! रूप अनुरक्तया विद्याधर्या दूरात् हृतः भविष्यत् चक्रवर्ती इति पुत्र्याः भर्ता भविष्यति. ॥ ७२ ॥

अर्थः—हे स्वामी! रूपथी मोहित थयेली विद्याधरीए दूरथी हरी लावेलो, तथा भविष्यकाळमां चक्रवर्ती थनारो (तारी) पुत्रीनो भर्तार थशे.

**ज्ञातव्यः स त्रिकालज्ञ कथं नरशिरोमणिः । इति मौहूर्तिकं भूपः पप्रच्छातुच्छसंमदः ॥ ७३ ॥**

अन्वयः—(हे) त्रिकालज्ञ ! सः नर शिरोमणिः कथं ज्ञातव्यः? इति अतुच्छ संमदः भूपः मौहूर्तिकं पप्रच्छ. ॥ ७३ ॥

अर्थः—हे नैमित्तिक ! ते नरशिरोमणिने शी रीते ओळखवो? एम अति आनंद पामेला ते राजाए ते निमित्तिआने पूछयुं. ७३

**सिद्धकूटे कपाटाभ्यां प्राप्ते यत्रोद्धटिष्यते । अस्याः पतिः स चक्रीति राज्ञे दैवज्ञकोऽदिशत् ॥ ७४ ॥**

अन्वयः—यत्र प्राप्ते सिद्धकूटे कपाटाभ्यां उद्घटिष्यते, सः चक्री अस्याः पतिः इति दैवज्ञकः राज्ञे अदिशत्. ॥ ७४ ॥

अर्थः—जेना आववाथी सिद्धमंदिरनां बन्ने कमाडो उघडी जशे, तेने चक्रवर्ती तथा आ (तारी) पुत्रीनो पति जाणवो, एम ते निमित्तिआए ते राजाने जणाव्युं. ॥ ७४ ॥

**तं ज्ञातुमिह राज्ञाहं दिष्टो दृष्टोऽसि तच्चिरात् । तदेहि गेहिनी तेऽस्तु स्मराज्ञा देहिनीव सा ॥ ७५ ॥**

अन्वयः—तं ज्ञातुं राज्ञा अहं इह दिष्टः, तत् चिरात् दृष्टः असि, तत् एहि? देहिनी स्मर आज्ञा इव, सा ते गेहिनी अस्तु.

अर्थः—ते पुरुषने ओळखवामाटे राजाए अहीं मने हुकम करेलो छे, अने तेथी बहुसमये तने में जोयो छे, माटे चाल? के जेथी शरीरधारी कामदेवनी आज्ञा सरखी ते राजकुमारी तारी राणी थाय. ॥ ७५ ॥

**इत्याकर्ण्य कुमारेन्दुः समं तेनैव सोऽचलत् । तेन विज्ञापितश्चागात्संमुखं खेचरेश्वरः ॥ ७६ ॥**

अन्वयः-इति आकर्ण्य सः कुमार इंदुः तेन एव समं अचलत्, च तेन विज्ञापितः खेचर ईश्वरः संमुखं आगात्. ॥ ७६ ॥

अर्थः—ते सांभळीने ते कुमारेंद्र तेनी साथेज चालतो थयो, अने तेणे खबर करवाथी ते विद्याधरपति पण सामो आव्यो. ७६

**उत्सवेन प्रवेश्याथ कुमारं पुरि खेचरः । प्रीतो विवाहयामास सुतया गतशोकया ॥ ७७ ॥**

अन्वयः—अथ खेचरः उत्सवेन कुमारं पुरि प्रवेश्य प्रीतः गतशोकया सुतया विवाहयामास ॥ ७७ ॥

अर्थः-पछी ते विद्याधरे महोत्सवपूर्वक ते कुमारने नगरमां प्रवेश करावीने ( पोतानी ) ते गतशोकानामनी पुत्रीसाथे परणाव्यो.

**हृष्टेन तेन जामात्रा काममात्राधिकश्रिया । प्राप प्रीतेः परां कोटिमखिलः खेचरान्वयः ॥ ७८ ॥**

अन्वयः—हृष्टेन काम मात्र अधिक श्रिया तेन जामात्रा अखिलः खेचर अन्वयः प्रीतेः परां कोटिं प्राप. ॥ ७८ ॥

अर्थः-आनंदित थयेला, तथा कामदेवथी पण अधिक शोभावाळा ते जमाइथी ते विद्याधरनुं समस्त कुटुंब अत्यंत हर्ष पाम्युं. ७८

**दत्तास्त्रित्रिशतं कन्याः खेचरैरपरैरपि । स व्युवाह स्मरक्ष्मापनृलक्षणकला इव ॥ ७९ ॥**

अन्वयः-स्मर क्ष्मापनृलक्षण कलाः इव, अपरैः खेचरैः अपि दत्ताः त्रित्रिशतं कन्याः सः व्युवाह. ॥ ७९ ॥

अर्थः-कामराजानी मनुष्यनां लक्षणोनी कलाओ सरखी, तथा बीजा विद्याधरोए पण आपेली, त्रणसो त्रणसो कन्याओने ते परण्यो.

पञ्चवर्षीमसौ हर्षी तत्र स्थित्वोपभोगभाक् । विद्याधरेन्द्रमापृच्छय लब्धविद्याचयोऽचलत् ॥ ८० ॥

अन्वयः-हर्षी असौ उपभोग भाक् पंच वर्षी तत्र स्थित्वा, लब्ध विद्या चयः विद्याधर इन्द्रं आपृच्छय अचलत्. ॥ ८० ॥

अर्थः—एरीते हर्ष पामेलो ते राजकुमार भोगो भोगवतोथको पांच वर्षोसुधी त्यां रहीने, विद्याओनो समूह मेळव्याबाद ते विद्याधरपतिनी आज्ञा लेइने (त्यांथी) चाली निकळ्यो. ॥ ८० ॥

कमलाकरमाकाशं कुर्वन्कान्तामुखैरसौ । ययौ रथविमानाश्वद्विपस्थैः खेचरैर्वृतः ॥ ८१ ॥

अन्वयः-कांता मुखैः आकाशं कमल आकरं कुर्वन् असौ, रथ विमान अश्व द्विपस्थैः खेचरैः वृतः ययौ. ॥ ८१ ॥

अर्थः-(पोतानी) स्त्रीओना मुखोवडे आकाशने पण कमलोना समूहवाळुं करतोथको ते राजकुमार, रथो, विमानो, घोडा तथा हाथीओपर बेठेला विद्याधरोथी वींटायोथको चालवा लाग्यो. ॥ ८१ ॥

भग्नस्तम्भेन मदिना पार्श्वेऽञ्जनगिरेर्जनम् । दुर्दमेन द्विपेन्द्रेण दम्यमानं ददर्श सः ॥ ८२ ॥

अन्वयः—अंजन गिरेः पार्श्वे भग्न स्तंभेन, मदिना, दुर्दमेन द्वीप इन्द्रेण दम्यमानं जनं सः ददर्श. ॥ ८२ ॥

अर्थः-( एवामां ) अंजनगिरिनी पासे, भांगी नाखेल आलानस्तंभवाळा, मदोन्मत्त, अने दुर्दांत एवा कोइ गजेंद्रवडे व्याकुल थयेला लोकोने तेणे जोया. ॥ ८२ ॥

अथोत्तीर्याम्बरादर्ककीर्तिरर्क इव द्रुतम् । ध्वान्ताधिदैवतमिव द्विपाधीशं वशं व्यधात् ॥ ८३ ॥

अन्वयः–अथ अर्कः इव अर्ककीर्तिः अबरात् उत्तीर्य, द्रुतं ध्वांत अधिदैवतं इव द्विप अधीशं वशं व्यधात्. ॥ ८३ ॥

अर्थः–पछी सूर्यनीपेठे ते अर्ककीर्तिए आकाशमांथी उतरीने तुरत अंधकारना अधिष्ठायक देवसरखा ते गजेंद्रने वश करी लीधो.

**प्रभञ्जनोऽञ्जनगिरिस्वामी ज्ञानीवचःस्मृतेः । ददौ तदास्मै मदनावल्याद्या अष्ट कन्यकाः ॥ ८४ ॥**

अन्वयः–तदा अंजन गिरि स्वामी प्रभंजनः ज्ञानि वचः स्मृतेः अस्मै मदनावलि आद्याः अष्ट कन्यकाः ददौ. ॥ ८४ ॥

अर्थः–ते वखते ते अंजनगिरिना प्रभंजननामना राजाए ज्ञानीनुं वचन याद लावीने ते कुमारने मदनावलिआदिक आठ कन्याओ आपी.

**प्रभञ्जनमुदे तत्र स्थित्वाल्पं वैरिभञ्जनः । वीतशोकां पुरीं लोकदृक्कृताभ्युत्थितिर्ययौ ॥ ८५ ॥**

अन्वयः–वैरि भंजनः (स) प्रभंजनमुदे तत्र अल्पं स्थित्वा. लोक दृक् कृत अभ्युत्थितिः वीतशोकां पुरीं ययौ. ॥ ८५ ॥

अर्थः–वैरिओनो नाश करनारो ते अर्ककीर्ति ते प्रभंजनराजाने खुशी करवामाटे त्यां थोडो समय रहीने, लोकोनां नेत्रोने विकस्वर करतो थको वीतशोका नगरीमां गयो. ॥ ८५ ॥

**अथात्तजयवत्यादिपरीवारः पुरीमगात् । स पुण्डरीकिणीं तातकीर्तिभिः पुण्डरीकिणीम् ॥ ८६ ॥**

अन्वयः–अथ आत्त जयवती आदि परीवारः सः तात कीर्तिभिः पुंडरीकिणीं पुंडरीकिणीं पुरीं अगात्. ॥ ८६ ॥

अर्थः–पछी जयवती आदिक परिवारने साथे लेइने ते अर्ककीर्ति पितानी कीर्तिथी विकस्वर थयेली पुंडरीकिणी नगरी पासे गयो.

**अल्पानल्पस्फुरच्चक्रयुगैर्धुर्योष्ट्रगर्दभैः । शकटैरेकदृक्कुब्जखञ्जतुन्दिलखेटकैः ॥ ८७ ॥**

कर्पूरखटिकानीलीकस्तूरीहेमपित्तलैः । भाण्डैरन्यैरपि भृतैः संमिश्ररुत्तमाधमैः ॥ ८८ ॥

स पञ्चवर्णपञ्चाङ्गः पञ्चवर्णशिरोरुहः । कौतुकादर्ककोर्तिस्तां वणिग्भूयाविशत्पुरीम् । ८९ । त्रिभिर्विशेषकम् ।

अन्वयः-अल्प अनल्प स्फुरत् चक्र युगैः, धुर्यै उष्ट्र गर्दभैः शकटैः, एक दृक् कुब्ज खंज तुन्दिल खेटकैः, ॥ ८७ ॥ कर्पूर खटिका, नीली कस्तूरी, हेम पित्तलैः, अन्यैः अपि उत्तम अधमैः संमिश्रैः भृतैः भांडैः ॥ ८८ ॥ पंच वर्ण पंच अंगः, पंच वर्ण शिरोरुहः सः अर्ककीर्तिः वणिक् भूय तां पुरीं कौतुकात् अविशत्. ॥ ८९ ॥ त्रिभिर्विशेषकं ॥

अर्थः—न्हानां मोहटां फरतां बन्ने चक्रोवाळां, तथा उंट अने गर्दभ जोडेलां गाडांओ सहित, एक आंखवाळा, कुबडा, लंगडा, तथा म्होटां पेटोवाळा गाडीवानो सहित, ॥ ८७ ॥ कपूर अने खडी, गळी तथा कस्तूरी, सुवर्ण तथा पित्तल, अने बीजां पण सारां नरसां मिश्र करीने भरेलां करीयाणां सहित, ॥ ८८ ॥ पचरंगी पांचे अंगोवाळो, अने पचरंगी केशोवाळो ते अर्ककीर्ति वणिक्रूप थइने ते नगरीमां आश्चर्य करावतोथको दाखल थयो. ॥ ८९ ॥ त्रिभिर्विशेषकं ॥

तेन तेन स्वरूपेण भाण्डैस्तैस्तैश्च ढौकितैः । आराजरङ्कं स पुरं चक्रे सोत्प्रासविस्मयम् ॥ ९० ॥

अन्वयः-तेन तेन स्वरूपेण, च ढौकितैः तैः तैः भांडैः सः आराज रंकं पुरं सोत्प्रास विस्मयं चक्रे. ॥ ९० ॥

अर्थः-ते ते स्वरूपथी तथा उतारेलां ते ते करियाणाओथी तेणे राजाथी मांडीने रंकसुधी समस्त शेहेरने आश्चर्यमां गरकाव करी दीधुं

ततस्तस्कररूपेण हृत्वा नगरगोधनम् । अयं व्यधान्मृधाधिक्यै भूधनेनानुधाविना ॥ ९१ ॥

अन्वयः—ततः तस्कर रूपेण नगर गोधनं हृत्वा, अनुधाविना भूधनेन अयं मृधाधिक्यं व्यधात्. ॥ ९१ ॥

अर्थः—पछी चोर तरीके नगरनी गायोना धणनुं हरण करीने, तथा तेथी तेनी पाछळ पडता राजावडे करीने, ते अर्ककीर्तिए रणसंग्राममथी पण अधिक खळभळाट मचावी मूक्यो. ॥ ९१ ॥

**हयोर्मिभिर्महीपालसैन्यसिन्धोः प्रसर्पतः । अर्ककीर्तिशरा भेजुर्मर्यादावल्लितुल्यताम् ॥ ९२ ॥**

अन्वयः-हय ऊर्मिभिः प्रसर्पतः महीपाल सैन्य सिंधोः, अर्ककीर्ति शराः मर्यादा वल्लि तुल्यतां भेजुः ॥ ९२ ॥

अर्थः—घोडाओरूपी मोजांओवडे आगळ धसता राजाना सैन्यरूपी महासागरने ( अटकाववाने ) ते अर्ककीर्तिना बाणो किनारानी दिवाल सरखां थइ पड्यां ॥ ९२ ॥

**जयिनो बहवस्तेन स्वहस्तेन निवारिताः । एकेन ते विवेकेन दूरं दोषगणा इव ॥ ९३ ॥**

अन्वयः-विवेकेन दोष गणाः इव, तेन एकेन स्वहस्तेन ते बहवः जयिनः दूरं निवारिताः, ॥ ९३ ॥

अर्थः—विवेक जेम दोषोना समूहने अटकावे, तेम तेणे एकलाए पोताना हाथथी ते घणा योद्धाओने दूर अटकावी राख्या.

**एकोऽप्ययं मया भूरिसैन्येनापि न जीयते । धिग्धिग्मत्पौरुषमिति ध्यायन्नथ धराधवः ॥ ९४ ॥**

अन्वयः-अयं एकः अपि भूरि सैन्येन अपि मया न जीयते, मत् पौरुषं धिक् धिक् इति अथ धराधवः ध्यायन्, ॥ ९४ ॥

अर्थः—आ एकलाने पण घणा सैन्यवाळो एवो पण हुं जीती शकतो नथी, माटे मारां पराक्रमने धिकार छे! धिकार छे! एम

हवे ते राजा विचारतो हतो, ॥ ९४ ॥

**विज्ञप्तो मेघसेनेन स्वामिन्मोदस्व मा शुचः । अयं स्वं ज्ञापयत्यर्ककीर्तिर्विक्रमढौकनः ॥ ९५ ॥ त्रिभि०**

अन्वयः-मेघसेनेन विज्ञप्तः, ( हे ) स्वामिन्! मोदस्व? मा शुचः? अयं अर्ककीर्तिः विक्रम ढौकनः स्वं ज्ञापयति. ॥ ९५ ॥

अर्थः—( एवामां ) मेघसेने आवीने ( राजाने ) कह्युं के, हे स्वामी! आप खुशी थाओ? अने शोच करो नही? केमके आ अर्ककीर्ति पराक्रमनी भेट पूर्वक ( आपने ) पोतानुं ( आगमन ) सूचवे छे. ॥ ९५ ॥ त्रिभिर्विशेषकम् ॥

**इति श्रुत्वा प्रमोदाब्धिशीकरायितदृग्जलः । उपेत्य सुतमालिङ्गन्निजरूपस्थमानतम् ॥ ९६ ॥**

अन्वयः-इति श्रुत्वा प्रमोद अब्धि शीकारायित दृग् जलः ( नृपः ) उपेत्य निज रूपस्थं आनतं सुतं आलिंगत्. ॥ ९६ ॥

अर्थः—ते सांभळीने हर्षना महासागरना बिंदुओरूप थयेल छे आंखोनां अश्रुओ जेनां, एवा ते राजाए पासे आवीने पोताना मूळरूपे उभेला, तथा नमन करता ते पुत्रने आलिंगन कर्युं. ॥ ९६ ॥

**पुरप्रवेशपूर्वं स राज्यमेवाथ सूनवे । राजा चिरागमप्रीतिप्रदातव्यपदे ददौ ॥ ९७ ॥**

अन्वयः-अथ सः राजा पुर प्रवेश पूर्वं चिर आगम प्रीति प्रदातव्य पदे सूनवे राज्यं एव ददौ. ॥ ९७ ॥

अर्थः—पछी ते राजाए नगरमां प्रवेश करावत्रा पूर्वक, घणे समये आववाथी उत्पन्न थयेली प्रीतिमाटेना दानना बदलामां पुत्रने राज्यज सोंपी दीधुं. ॥ ९७ ॥

श्रीचारुगुप्तपादान्ते स सामन्तसहस्रभाक् । व्रतमादाय भूजानिर्मुक्तिजानिरजायत ॥ ९८ ॥

अन्वयः—सः भूजानिः सामंत सहस्र भाक् श्रीचारुगुप्त पादांते व्रतं आदाय मुक्ति जानिः अजायत. ॥ ९८ ॥

अर्थः—पछी ते राजा एक हजार सामंतो सहित श्रीचारुगुप्तनामना गुरुनी पासे दीक्षा लेइने मुक्तिनो स्वामी थयो. ॥ ९८ ॥

एताः प्रजा न मोदन्ते विना विमलकीर्तिना । इतीवासौ बभारार्ककीर्तिर्विमलकीर्तिताम् ॥ ९९ ॥

अन्वयः-विमलकीर्तिना विना एताः प्रजाः न मोदंते, इति इव असौ अर्ककीर्तिः विमल कीर्तितां बभार. ॥ ९९ ॥

अर्थः—विमलकीर्ति विना ( पिताजीविना ) आ प्रजा आनंद पामती नथी, जाणे एवा हेतुथीज ते अर्ककीर्ति विमल (निर्मल) कीर्तिपणुं धरवा लाग्यो. ॥ ९९ ॥

निशास्वपि प्रतापार्को दिनेष्वपि यशःशशी । अक्रीडतां जगत्क्रोडे यस्य विश्वैकविस्मयः ॥ १२०० ॥

अन्वयः-विश्व एक विस्मयः यस्य प्रताप अर्कः निशासु अपि, यशः शशी दिनेषु अपि जगत् क्रोडे अक्रीडतां. ॥ १२०० ॥

अर्थः—जगतने एक आश्चर्य उपजावनारो जेनो प्रतापरूपी सूर्य रात्रिए पण, तथा यशरूपी चंद्र दिवसे पण जगतनी अंदर क्रीडा करता हता. ॥ १२०० ॥

कृतं लक्षैरिवाग्नीनां कोटीभिरिव भास्वताम् । दीप्तमायुधशालायां चक्रमस्योदपद्यत ॥ १ ॥

अन्वयः—अग्नीनां लक्षैः इव, भास्वतां कोटीभिः इव कृतं, दीप्तं चक्रं अस्य आयुध शालायां उदपद्यत. ॥ १ ॥

अर्थः—जाणे लाखोगमे अग्निओवडे, तथा क्रोडोगमे सूर्योवडे बनाव्युं होय नही! एवुं जाज्वल्यमान चक्र तेनी आयुधशालामां उत्पन्न थयुं. ॥ १ ॥

**अथाधाय रथाङ्गस्य महिमानं महोत्सवैः । उत्पन्नसर्वरत्नश्रीरुद्वर्धिष्णुचमूचयः ॥ २ ॥**

**जिनार्चावसरैर्लुम्पन्प्रयाणावसराशुभम् । क्रमाज्जिगाय षट्खण्डमवनीमण्डलं नृपः ॥ ३ ॥ युग्मम् ॥**

अन्वयः—अथ महोत्सवैः रथांगस्य महिमानं आधाय, उत्पन्न सर्व रत्न श्रीः, उद्वर्धिष्णु चमू चयः, ॥ २ ॥ प्रयाण अवसर अशुभं जिन अर्चा अवसरैः लुंपन् नृपः क्रमात् षट् खंडं अवनी मंडलं जिगाय ॥ ३ ॥ युग्मं ॥

अर्थः—पछी महोत्सवपूर्वक ते चक्ररत्ननो महिमा करीने, बीजां सर्व रत्नोनी समृद्धि उत्पन्न थयाबाद वृद्धि पामता लश्करना विस्तारवाळो ॥ २ ॥ तथा प्रयाण समये थतां अपशुकनोने जिनपूजाना अवसरथी दूर करतो ते अर्ककीर्ति राजा अनुक्रमे छखंड पृथ्वीमंडलने जीतवा लाग्यो. ॥ ३ ॥ युग्मं ॥

**ततः पुरीं स्फुरज्जैनालयमण्डलमण्डनाम् । स पुण्डरीकिणीं चक्रे नवद्वादशयोजनाम् ॥ ४ ॥**

अन्वयः—ततः सः नव द्वादश योजनां पुंडरिकिणीं पुरीं स्फुरत् जैन आलय मंडल मंडनं चक्रे. ॥ ४ ॥

अर्थः—पछी ते राजाए नव योजन पहोळी तथा बार योजन लांबी पुंडरिकीणी नगरीने विस्तार पामता जिनमंदिरोना समूहोथी

शोभिती करी. ॥ ४ ॥

सोऽजीजनज्जिनगृहान्ग्रामे ग्रामे पुरे पुरे । मार्गानिव सतां मुक्तिगमनेच्छाभृतां नृपः ॥ ५ ॥

अन्वयः—सः नृपः मुक्ति गमन इच्छा भृतां सतां मार्गान् इव, ग्रामे ग्रामे पुरे पुरे जिनगृहान् अजीजनत्. ॥ ५ ॥

अर्थः—वळी ते राजाए मोक्षमां जवानी इच्छावाळा सज्जनोमाटे मार्गो सरखां गामेगामे तथा नगरे नगरे जिनमंदिरो बंधाव्यां. ॥

स मदोन्मुदितामुर्वीमेवं निर्माय निर्मदः । कृतकृत्यमिवात्मानममन्यत महामतिः ॥ ६ ॥

अन्वयः—एवं सः निर्मदः महामतिः उर्वी मद उन्मुदितां निर्माय आत्मानं कृतकृत्यं इव अमन्यत. ॥ ६ ॥

अर्थः—एरीते ते मदरहित अने महाबुद्धिवान राजा पृथ्वीने आनंदथी उभराती बनावीने पोताने कृतार्थ थयेलानीपेठे मानवा लाग्यो.

श्रामण्यं सोऽन्यदा श्रुत्वा जितशत्रुमुनेर्मुखात् । सुकृतेभ्यः कृती पूर्वकृतेभ्यो बह्वमन्यत ॥ ७ ॥

अन्वयः—अन्यदा सः कृती जितशत्रु मुनेः मुखात् श्रामण्यं श्रुत्वा पूर्व कृतेभ्यः सुकृतेभ्यः बहु अमन्यत. ॥ ७ ॥

अर्थः—पछी एक वखते ते चतुर राजाए जितशत्रुमुनिना मुखथी मुनिपणानुं स्वरूप सांभळीने (पोताना) पूर्वपुण्योनी घणी अनुमोदना करी ॥ ७ ॥

बलात्पृष्ट्वा कलत्राणि पुत्रान्मित्राणि मन्त्रिणः । पुत्रं धवलकीर्तिं स राज्ये न्यस्यादित व्रतम् ॥ ८ ॥

अन्वयः—सः बलात् कलत्राणि, पुत्रान्, मित्राणि, मंत्रिणः पृष्ट्वा धवलकीर्तिं पुत्रं राज्ये न्यस्य व्रतं आदित. ॥ ८ ॥

अर्थः—(पछी) तेणे बलात्कारे स्त्रीओ, पुत्रो, मित्रो तथा मंत्रीओनी रजा लेइने, तथा धवलकीर्तिनामना पुत्रने राज्यपर स्थापन करीने चारित्र लीधुं. ॥ ८ ॥

**अर्ककीर्तिस्तपस्तैक्ष्ण्यादर्ककीर्तिमवाप्य सः । ययौ मृत्वाच्युते कल्पे शक्रकल्पेन तेजसा ॥ ९ ॥**

अन्वयः—सः अर्ककीर्तिः तपः तैक्ष्ण्यात्, शक्र कल्पेन तेजसा अर्ककीर्तिं अवाप्य मृत्वा अच्युते कल्पे ययौ. ॥ ९ ॥

अर्थः—पछी ते अर्ककीर्ति राजर्षि आकरा तपथी, तथा इंद्रसरखा तेजथी सूर्य सरखी कीर्ति मेळवीने मृत्युबाद अच्युत देवलोकमां गया.

**भुक्तभोगभरः श्रीमानच्युतप्रच्युतः स च । राजन्नशोक निःशोकभावभूमिर्भवानभूत् ॥ १० ॥**

अन्वयः—हे अशोक राजन्! च सः श्रीमान् भुक्त भोग भरः अच्युत प्रच्युतः निःशोक भाव भूमिः भवान् अभूत्. ॥ १० ॥

अर्थः—हे अशोक राजन्! पछी ते श्रीमान् देव (त्यां) भोगोनो समूह भोगवीने, ते अच्युत देवलोकथी चवीने शोकरहित भावना स्थान सरखो तुं थयेल छे. ॥ १० ॥

**एकेन रोहिणीसंज्ञतपसार्जितपुण्ययोः । दम्पत्योर्युवयोः प्रेमबन्धो निरवधिस्ततः ॥ ११ ॥**

अन्वयः—ततः एकेन रोहिणी संज्ञ तपसा अर्जित पुण्ययोः युवयोः दंपत्योः निरवधिः प्रेम बंधः. ॥ ११ ॥

अर्थः—माटे एकज रोहिणीनामना तपथी उपार्जन करेल छे पुण्य जेओए, एवा तमो बन्ने स्त्रीभर्तारनो अस्खलित प्रेमबंध थयेलो छे.

रोहिणीतपसस्तस्य प्रभावाद्भवतोरभूत् । एवं सौभाग्यभाग्यश्रीर्भुवनाभोगभास्वरा ॥ १२ ॥

अन्वयः—तस्य रोहिणी तपसः प्रभावात् भवतोः एवं भुवन आभोग भास्वरा सौभाग्य श्रीः अभूत्. ॥ १२ ॥

अर्थ —ते रोहिणीतपना प्रभावथी तमोने आवी रीतनी त्रणे जगतमां देदीप्यमान सौभाग्य लक्ष्मी प्राप्त थयेली छे. ॥ १२ ॥

एवं प्रभावमुद्भाव्य भव्यैः सेव्यमिदं व्रतम् । निर्दुःखसुखसिद्धयर्थमुपवासैर्यथाविधि ॥ १३ ॥

अन्वयः—एवं प्रभावं उद्भाव्य भव्यैः निर्दुःख सुख सिद्धि अर्थं यथाविधि उपवासैः इदं व्रतं सेव्यं. ॥ १३ ॥

अर्थः—एवीरीतनो प्रभाव जाणीने भव्यलोकोए दुःखरहित सुखनी सिद्धिमाटे विधिपूर्वक उपवासोवडे आ व्रत आराधवुं. । १३ ।

आचाम्लैर्निर्विकृतिकैरपीदं रोहिणीव्रतम् । उपवासाक्षमैः सेव्यं हृद्योद्यापनमात्मभिः ॥ १४ ॥

अन्वयः—उपवास अक्षमैः आत्मभिः इदं रोहिणी व्रतं हृद्य उद्यापनं आचाम्लैः निर्विकृतिकैः अपि सेव्यं. ॥ १४ ॥

अर्थः—वळी उपवास करवाने असमर्थ जीवोए आ रोहिणीव्रत मनोहर उद्यापन पूर्वक आयंबिल अथवा नीवीइ तपथी पण आराधवुं.

इत्यकथ्यत वां भूप भवान्तरकथा पृथुः । इदानीं त्वदपत्यानां वदामि प्राग्भवं भवम् ॥ १५ ॥

अन्वयः—हे भूप! इति वां पृथुः भवांतर कथा अकथ्यत, इदानीं त्वत् अपत्यानां प्राग्भवं भवं वदामि. ॥ १५ ॥

अर्थः—हे राजेंद्र ! एरीते तमो बन्नेनी विस्तारवाळी पूर्व जन्मोनी कथा (में) कही, हवे तमारां संतानोना पूर्व जन्मनो वृत्तांत कहुं छुं.

आस्ते पृथिव्या नेपथ्यं प्रथिता मथुरेति पूः । सिञ्चन्वीररसेनोर्वीं वीरसेनो ररक्ष ताम् ॥ १६ ॥

अन्वयः—पृथिव्याः नेपथ्यं मथुरा इति पूः आस्ते, वीर रसेन उर्वीं सिंचन् वीरसेनः तां ररक्ष ॥ १६ ॥

अर्थः—पृथ्वीना शणगारभूत मथुरानामनी नगरी छे, तथा वीररसथी पृथ्वीने सिंचतो वीरसेननामे राजा ते नगरीनुं रक्षण करतो हतो.

विप्रोऽग्निशर्मा तत्राभूत्सावित्रीति च तत्प्रिया । अभूवन्सूनवः सप्त शिवशर्मादयस्तयोः ॥ १७ ॥

अन्वयः—तत्र अग्निशर्मा विप्रः अभूत्, च सावित्री इति तत् प्रिया, तयोः शिवशर्म आदयः सप्त सूनवः अभूवन्. ॥ १७ ॥

अर्थः—ते नगरमां अग्निशर्मानामे ब्राह्मण ( वसतो ) हतो, अने सावित्रीनामनी तेनी स्त्री हता, तथा तेओने शिवशर्मा आदिक सात पुत्रो हता. ॥ १७ ॥

ययुर्भद्रकभावास्ते दूना दारिद्र्यमुद्रया । धनार्जनार्थं सप्तापि पाटलीपुत्रपत्तनम् ॥ १८ ॥

अन्वयः—भद्रक भावाः ते सप्त अपि दारिद्य मुद्रया दूनाः धन अर्जनार्थं पाटलीपुत्र पत्तनं ययुः. ॥ १८ ॥

अर्थः—भद्रक परिणामवाळा ते साते पुत्रो (पोतानी) गरीबाइथी दूभायाथका द्रव्य कमावा माटे पाटलीपुत्र नगरमां गया. ॥१८॥

श्रीसिंहवाहनो नाम तत्र प्रभुरभूत्तदा । कलमश्रीतनूजस्तु तत्पुत्रो हरिवाहनः ॥ १९ ॥

अन्वयः—तदा तत्र श्रीसिंहवाहनो नाम प्रभुः अभूत्, तु कमलश्री तनूजः हरिवाहनः तत् पुत्रः. ॥ १९ ॥

अर्थः—ते वखते त्यां श्रीसिंहवाहननामे राजा हतो, अने ( तेनी ) कमलश्रीनामनी राणीना शरीरथी उत्पन्न थयेलो हरिवाहन-नामे तेनो पुत्र हतो. ॥ १९ ॥

**कन्यां कनकमालाख्यां वसुमित्रमहीपतेः । तदा पर्यणयत्तत्र महर्द्ध्या हरिवाहनः ॥ २० ॥**

अन्वयः—तदा तत्र हरिवाहनः वसुमित्र महीपतेः कनकमाला आख्यां कन्यां महर्द्ध्या पर्यणयत्. ॥ २० ॥

अर्थः—ते वखते त्यां ते हरिवाहनकुमार वसुमित्रनामना राजानी कनकमालानामनी कन्याने महोटी समृद्धिथी परण्यो. ॥ २० ॥

**तां महर्द्धिमिहालोक्य निजदौःस्थ्येन दुःखिताः । कनिष्ठाः षट् तदा ज्येष्ठं शिवशर्माणमूचिरे ॥ २१ ॥**

अन्वयः—तदा इह तां महर्द्धिं आलोक्य निज दौःस्थ्येन दुःखिताः षट् कनिष्ठाः ज्येष्ठं शिवशर्माणं ऊचिरे. ॥ २१ ॥

अर्थः—ते वखते अहीं ते महान् समृद्धि जोइने पोतानी गरीबाइथी दुःखी थयेला ते छ ए न्हाना भाइओ ( पोताना ) म्होटा भाइ शिवशर्माने कहेवा लाग्या के, ॥ २१ ॥

**आर्य पश्य विरिञ्चस्य केयं केलिविचित्रता । सामान्येऽपि मनुष्यत्वे करोति कियदन्तरम् ॥ २२ ॥**

अन्वयः—( हे ) आर्य! पश्य! विरिंचस्य का इयं केलि विचित्रता! सामान्येऽपि मनुष्यत्वे कियत् अंतरं करोति! ॥ २२ ॥

अर्थः—हे आर्य! तुं जो? के विधातानी क्रीडानी आ केवी विचित्रता छे! सर्वसामान्य मनुष्यपणामाटे पण ते केटलो अंतर करे छे?

विवाहेऽस्मिन्नमी लोका महाहस्तिहयाश्रयाः । निःपादुकौ तु नः पादौ दूयेते पट्टुकण्टकैः ॥ २३ ॥

अन्वयः—अस्मिन् विवाहे अमी लोकाः महाहस्ति हय आश्रयाः, तु निःपादुकौ नः पादौ पट्टु कंटकैः दूयेते. ॥ २३ ॥

अर्थः—आ विवाहमां आ लोको महोटा हाथीओ तथा घोडाओपर बेठा छे, अने आपणा पगरखाविनाना पग तीक्ष्ण कांटाओथी पीडाय छे. ॥ २३ ॥

प्रत्येकमेषां यावन्तो भूषामुक्ताकणास्तनौ । तावन्तो भोक्तुमस्माकं न जोनालकणा अपि ॥ २४ ॥

अन्वयः—एषां प्रत्येकं तनौ यावंतः भूषा मुक्ता कणाः, तावंतः जोनाल कणाः अपि अस्माकं भोक्तुं न. ॥ २४ ॥

अर्थः—आमाना दरेक माणसना शरीरपर अभूषणोना मोतीओना जेटला दाणा छे, तेटला बंटीधान्यना कणो पण आपणने खावा मळता नथी. ॥ २४ ॥

एषां वस्त्रैकतन्तोर्यन्मूल्यं तन्न लगिष्यति । यावज्जीवितमस्माभिर्धार्याणां वाससामपि ॥ २५ ॥

अन्वयः—एषां वस्त्र एक तंतोः यत् मूल्यं, तत् अस्माभिः यावत् जीवितं धार्याणां वाससां अपि न लगिष्यति. ॥ २५ ॥

अर्थः—आ लोकोना वस्त्रोना एक तांतणानी पण जे किम्मत थाय, ते किम्मत आपणा जीवन पर्यंत पहेरवानां वस्त्रोने पण पहोंची शकशे नही. ॥ २५ ॥

तत्किं दास्यन्ति महिषीममी तस्मै विरिञ्चये । ईदृग्ददौ यदेतेषामस्माकं तु न किंचन ॥ २६ ॥

अन्वयः-तत् अमी तस्मै विरिंचये किं महिषीं दास्यंति? यत् एतेषां ईदृग् ददौ, तु अस्माकं किंचन न. ॥ २६ ॥

अर्थः—माटे आ लोको ते विधाताने शुं कंइं भेंस आपशे? के जेथी तेओने तेणे आटलुंबधुं दीधुं छे, अने आपणने तो कंइं पण आप्युं नथी. ॥ २६ ॥

**तानूचे शिवशर्माथ किमुपालभ्यते विधिः। उपालभ्योऽयमात्मैव यः प्राग्धर्मं न निर्ममे ॥ २७ ॥**

अन्वयः—अथ शिवशर्मा तान् ऊचे, विधिः किं उपालभ्यते? अयं आत्मा एव उपालभ्यः, यः प्राग् धर्मं न निर्ममे. ॥ २७ ॥

अर्थः—त्यारे शिवशर्माए तेओने कह्युं के, विधाताने शामाटे ठपको आपो छो? (आपणा) आ आत्मानेज ठपको आपवो, के जेणे पूर्वे धर्मकार्य कर्युं नही. ॥ २७ ॥

**प्रागनिर्मितधर्माणां श्रीर्नास्माकमिहाभवत्। नेहापि कुर्महे धर्मं सा नाग्रेऽपि भविष्यति ॥ २८ ॥**

अन्वयः-प्राक् अनिर्मित धर्माणां अस्माकं इह श्रीः न अभवत्, इह अपि धर्मं न कुर्महे. अग्रे अपि सा न भविष्यति. ॥ २८ ॥

अर्थः—पूर्व भवमां धर्मकार्य नही करवाथी आपणने अहीं लक्ष्मी मळी नथी, अने अहीं पण आपणे धर्म करता नथी, तो आगामिभवमां पण ते मळशे नही. ॥ २८ ॥

**उपशान्तहृदस्तेऽपि तद्गिरा स्मोद्गिरन्ति गाम्। आर्य कार्यस्तदस्माभिर्धर्मस्तत्कर्म कथ्यताम् ॥ २९ ॥**

अन्वयः-तत् गिरा उपशांत हृदः ते अपि गां उद्गिरंतिस्म, (हे) आर्य! तत् अस्माभिः धर्मः कार्यः, तत् कर्म कथ्यतां? ॥२९॥

अर्थः—तेना वचनथी शांत थयेल हृदयवाळा तेओ पण (एम) बोल्या के, हे आर्य! त्यारे आपणे धर्म करवो जोइए, माटे ते संबंधि कार्य कहो? ॥ २९ ॥

**शिवशर्मा पुनर्मायाविमुक्तं वाक्यमुक्तवान् । कुतोऽपि सद्गुरोर्ज्ञेयो धर्मः सोऽमेयशर्मकृत् ॥ ३० ॥**

अन्वयः—पुनः शिवशर्मा माया विमुक्तं वाक्यं उक्तवान्, सः अमेय शर्मकृत् धर्मः कुतः अपि सद्गुरोः ज्ञेयः. ॥ ३० ॥

अर्थः—त्यारे शिवशर्माए फरीने कपटरहित वचन कह्युं के, ते अत्यंत सुख आपनारो धर्म (आपणे) कोइक सद्गुरुपासेथी जाणवो जोइये.

**तद्यामः क्वचिदारामगिरिगह्वरभूमिषु । सामान्यजनमान्यासु क्ष्मासु दृश्यो न सद्गुरुः ॥ ३१ ॥**

अन्वयः—तत् क्वचित् आराम गिरि गह्वर भूमिषु यामः, सामान्य जन मान्यासु क्ष्मासु सद्गुरुः न दृश्यः. ॥ ३१ ॥

अर्थः—माटे कोइक बगीचामां अथवा पर्वतनी गुफाओनी भूमिमां आपणे जइये, केमके सामान्य लोकोनी वसतिवाळी भूमिमां तेवा सद्गुरु नजरे पडवाना नथी. ॥ ३१ ॥

**इत्यमी निर्ययुः पुर्या ददृशुश्च वने मुनिम् । मनोरथोऽपि धर्मस्य कल्पते कल्पपादपः ॥ ३२ ॥**

अन्वयः—इति अमी पुर्याः निर्ययुः, च वने मुनिं ददृशुः. धर्मस्य मनोरथः अपि कल्पपादपः कल्पते. ॥ ३२ ॥

अर्थः—एम विचारी तेओ नगरनी बहार गया, एवामां (तेओए) वनमां (कोइक) मुनिराजने जोया. केमके धर्मनो मनोरथ पण कल्पवृक्ष समान थइ पडेछे. ॥ ३२ ॥

तं दिशन्तं दशविधव्रतधर्मविधीन्सुधीः । शिवशर्माथ सहसोपानमत्सह सोदरैः ॥ ३३ ॥

अन्वयः—अथ दशविध व्रतधर्म विधीन् दिशंतं तं सुधीः शिवशर्मा सोदरैः सह सहसा उपानमत्. ॥ ३३ ॥

अर्थः—(त्यां) दश प्रकारना व्रतधर्मनी विधिनो उपदेश देता ते मुनिराजने उत्तम बुद्धिवान ते शिवशर्माए भाइयो सहित तुरत नमस्कार कर्यो. ॥ ३३ ॥

श्रुतधर्मा व्रतं प्राप्य शिवशर्मादयस्ततः । तपस्तापेन सौधर्मं भेजुः सुखसुधासरः ॥ ३४ ॥

अन्वयः-ततः शिवशर्मादयः श्रुतधर्माः व्रतं प्राप्य तपस्तापेन सुख सुधा सरः सौधर्मं भेजुः. ॥ ३४ ॥

अर्थः—पछी ते शिवशर्माआदिको धर्म सांभळीने, चारित्र लेइ, तप तपीने सुखरूपी अमृतना सरोवर सरखा सौधर्म देवलोके गया.

भल्लक्षुल्लकनामा च वैताढयेऽत्रैव भारते । खेचरोऽजनि जैनेन्द्रधर्मारामैकषट्पदः ॥ ३५ ॥

अन्वयः-च अत्र एव भारते वैताढये जैनेंद्र धर्म आराम एक षट्पदः भल्लक्षुल्लकनामा खेचरः अजनि. ॥ ३५ ॥

अर्थः—हवे आज भरतक्षेत्रना वैताढ्य पर्वत पर जैन धर्मरूपी बगीचामां एक भ्रमरसमान भल्लक्षुल्लकनामे विद्याधर हतो. ।३५।

व्यदधादन्वहं स्तोकीकृतकर्ममहाभरः । जिनयात्रोत्सवं पञ्चदशकर्ममहीषु सः ॥ ३६ ॥

अन्वयः-स्तोकीकृत कर्म महाभरः सः अन्वहं पंचदश कर्म महीषु जिन यात्रा उत्सवं व्यदधात्. ॥ ३६ ॥

अर्थः—स्वल्प करेल छे कर्मोनो महान् भार जेणे, एवो ते विद्याधर हमेशां पंदरे कर्मभूमिओमां तीर्थंकर प्रभुओनी यात्रानो

महोत्सव करतो हतो. ॥ ३६ ॥

**स धर्मरतिरुत्कण्ठाकुण्ठविघ्नकदम्बकः । यत्र यत्राशकद् गन्तुं तत्र तत्रानमज्जिनान् ॥ ३७ ॥**

अन्वयः—धर्म रतिः सः उत्कंठा कुंठ विघ्न कदंबकः यत्र यत्र गंतुं अशकत्, तत्र तत्र जिनान् अनमत्. ॥ ३७ ॥

अर्थः—धर्मना प्रेमवाळो ते विद्याधर होंसथी विघ्नोना समूहने दूर करीने ज्यां ज्यां जइ शकतो हतो त्यां त्यां ते जिनेश्वरोने वंदन करतो हतो. ॥ ३७ ॥

**शुद्धश्राद्धव्रताम्भोजखण्डमार्तंडमंण्डलः । खेचरः सोऽपि सौधर्मकल्पस्याकल्पतां गतः ॥ ३८ ॥**

अन्वयः—शुद्ध श्राद्ध व्रत अंभोज खंड मार्तंड मंडलः सः खेचरः अपि सौधर्मकल्पस्य आकल्पतां गतः. ॥ ३८ ॥

अर्थः—श्रावकोनां निर्मल व्रतोरूपी कमलवनमां सूर्यमंडल सरखो ते विद्याधर पण सौधर्म देवलोकना शणगाररूप थयो. ॥ ३८ ॥

**इतश्च जम्बूद्वीपे प्राग्विदेहे दक्षिणादिशि । अभूद्गरुडवेगाख्यो वैताढ्ये खेचरेश्वरः ॥ ३९ ॥**

अन्वयः—इतश्च जंबूद्वीपे प्राग् विदेहे दक्षिणा दिशि वैताढ्ये गरुडवेग आख्यः खेचर ईश्वरः अभूत्. ॥ ३९ ॥

अर्थः—हवे जंबूद्वीपमां पूर्वमहाविदेहमां दक्षिण दिशामां आवेला वैताढ्यपर्वतपर गरुडवेगनामनो खेचरेंद्र (वसतो) हतो. ॥ ३९ ॥

**कमलश्रीमुखी तस्य कमलश्रीः प्रियाजनि । पद्मश्रीप्रमुखाः पुत्र्यश्चतस्रो जज्ञिरे तयोः ॥ ४० ॥**

अन्वयः—तस्य कमल श्रीमुखी कमलश्रीः प्रिया अजनि, तयोः पद्मश्री प्रमुखाः चतस्रः पुत्र्यः जज्ञिरे. ॥ ४० ॥

अर्थः–ते विद्याधरेंद्रनी कमलनी शोभा सरखा मुखवाळी कमलश्रीनामनी स्त्री हती, अने तेओने पद्मश्री आदिक चार पुत्रीओ हती.

**वनावनिगतास्तत्र चतस्रोऽपि निरीक्ष्य ताः । समाधिगुप्तनामानमानमन्मुनिमुन्मुदः ॥ ४१ ॥**

अन्वयः—वन अवनि गताः ताः चतस्रः अपि तत्र समाधिगुप्त नामानं मुनिं निरीक्ष्य उन्मुदः आनमन्. ॥ ४१ ॥

अर्थः–( एक समये ) वनभूमिमां गयेली एवी ते चारे कन्याओए त्यां रहेला समाधिगुप्तनामना मुनिराजने जोइने आनंदना उभराथी नमस्कार कर्यो. ॥ ४१ ॥

**अल्पायुष्कं मुनिस्तासां मत्वा तत्तारणैकधीः । तत्पञ्चमीतिथिदिनं ज्ञात्वा चेदमवोचत ॥ ४२ ॥**

अन्वयः–मुनिः तासां अल्पायुष्कं मत्वा तत् तारण एक धीः, च तत् पंचमी तिथि दिनं ज्ञात्वा इदं अवोचत. ॥ ४२ ॥

अर्थः–(त्यारे) ते मुनिराजे तेओनुं स्वल्प आयु जाणीने, तेओने तारवानी बुद्धिथी ते दिवसे पांचमनी तिथिनो दिवस जाणीने कह्युं के,

**ज्ञानप्रपञ्चात्पञ्चम्यामुपवासः क्रियेत यः । भवन्त्यनन्यसामान्या भोगास्तत्फलमुज्ज्वलम् ॥ ४३ ॥**

अन्वयः–पंचम्यां ज्ञान प्रपंचात् यः उपवासः क्रियेत, तत् उज्ज्वलं फलं अनन्य सामान्याः भोगाः भवंति. ॥ ४३ ॥

अर्थः–पांचमने दिवसे ज्ञाननी पूजा पूर्वक जे उपवास कराय छे, तेना निर्मल फलरूप बीजाओने न मळी शके, एवा भोगो प्राप्त थाय छे.

**उपवासः स एवोच्चैः कृतकर्मशमः क्रमात् । याति स्वर्गापवर्गश्रीसुखदाननिदानताम् ॥ ४४ ॥**

अन्वयः–सः एव उपवासः उच्चैः कृत कर्मशमः क्रमात् स्वर्ग अपवर्ग श्री सुख दान निदानतां याति. ॥ ४४ ॥

अर्थः—वळी तेज उपवास उपेप्रकारे कर्मोनी शांति करीने अनुक्रमे स्वर्ग तथा मोक्षलक्ष्मीनुं सुख देवाना कारणरूप थाय छे. ४४

**इति श्रुत्वा चतस्रस्ता गृहीत्वा पञ्चमीव्रतम् । कृतकृत्यमिवात्मानं मन्वानाः सद्मनेऽचलन् ॥ ४५ ॥**

अन्वयः—इति श्रुत्वा चतस्रः ताः पंचमी व्रतं गृहीत्वा, आत्मानं कृत कृत्यं इव मन्वानाः सद्मने अचलन्. ॥ ४५ ॥

अर्थः—ते सांभळीने ते चारे बहेनो पांचमनुं व्रत लेइने, तथा पोताना आत्माने कृतार्थ थयेला मानतीथकी घेर जवामाटे चालवा लागी.

**विद्युत्पातेन पथि ता मथितास्त्रिदिवं ययुः । ततश्च्युत्वा नृपश्रेष्ठ भवद्दुहितरोऽभवन् ॥ ४६ ॥**

अन्वयः—पथि विद्युत् पातेन मथिताः ताः त्रिदिवं ययुः. ततः च्युत्वा (हे) नृपश्रेष्ठ! भवत् दुहितरः अभवन्. ॥ ४६ ॥

अर्थः—एवामां मार्गमां विजळी पडवाथी मरण पामीने तेओ देवलोकमां गइ, अने त्यांथी चवीने हे राजेंद्र! ते तमारी पुत्रीओ थइ छे.

**शिवशर्मादयः स्वर्गच्युतास्ते सूनवस्तव । बभूवुः स च पुण्यात्मा खेचरश्चरमः सुतः ॥ ४७ ॥**

अन्वयः—ते शिवशर्म आदयः स्वर्ग च्युताः तव सूनवः बभूवुः, च सः पुण्य आत्मा खेचरः चरमः सुतः. ॥ ४७ ॥

अर्थः—हवे ते शिवशर्मा आदिक स्वर्गथी चवीने तारा पुत्रो थया छे, अने ते पुण्यशाली विद्याधर तारो छेल्लो पुत्र थयो छे. ॥४७॥

**इति पूर्वभवश्रुत्या जातिस्मृतिमवाप्य ते । श्रावकं धर्ममासाद्याशोकाद्याः स्वाश्रये ययुः ॥ ४८ ॥**

अन्वयः—इति पूर्व भव श्रुत्या जाति स्मृतिं अवाप्य ते अशोकआद्याः श्रावकं धर्मं आसाद्य स्व आश्रये ययुः. ॥ ४८ ॥

अर्थः—एरीते पूर्वनो भव सांभळवाथी जातिस्मरण ज्ञान पामीने ते अशोकराजा आदिक श्रावकधर्म स्वीकारीने पोताने घेर गया.

**भूपेऽन्यदा सभाभाजि धर्मेभाद्भुतगर्जिवत् । ध्वानयन्वियदध्वानं दिव्यो दध्वान् दुन्दुभिः ॥ ४९ ॥**

अन्वयः-अन्यदा भूपे सभाभाजि धर्म इभ अद्भुत गर्जिवत् वियत् अध्वानं ध्वानयन् दिव्यः दुंदुभिः दध्वान. ॥ ४९ ॥

अर्थः—हवे एक दिवसे राजा ज्यारे सभामां बेठा हता, त्यारे धर्मरूपी हाथीना अद्भुत गर्जारव सरखी, तथा आकाश मार्गने गजावती दिव्य दुंदुभि वागवा लागी. ॥ ४९ ॥

**नृपस्तद्ध्वनये वासुपूज्यागमनशंसिने । दूरोच्छ्वासाङ्गनुन्नानि भूषणानि ददाविव ॥ ५० ॥**

अन्वयः-नृपः तत् ध्वनये वासुपूज्य आगमन शंशिने दूर उच्छ्वास अंग नुन्नानि इव भूषणानि ददौ, ५० ॥

अर्थः—पछी राजाए ते ध्वनिना संबंधमां श्री वासुपूज्यप्रभुनी पधरामणीनी वधामणी आपनारने अति आनंदित थयेलां शरीरे जाणे प्रेरणा करी होय नही! तेम (पोताना) आभूषणो आपी दीधां. ॥ ५० ॥

**हित्वा सिंहासनं दत्वा पञ्चषाणि पदान्यथ । ननाम भूपः ककुभं प्रभुपादपवित्रिताम् ॥ ५१ ॥**

अन्वयः—अथ सिंहासनं हित्वा, पंचषाणि पदानि दत्वा भूपः प्रभु पाद पवित्रितां ककुभं ननाम. ॥ ५१ ॥

अर्थः—पछी सिंहासन तजीने, तथा पांच छ पगलां आगळ जइने, राजाए प्रभुना चरणोथी पवित्र थयेली दिशाने नमस्कार कर्यो.

**उद्भास्वदुत्सवोत्साहं कृत्वा नागपुरं पुरम् । पुत्रमित्रकलत्राणि समाहूय ससंमदः ॥ ५२ ॥**

शृङ्गारसारमातङ्गतुरङ्गारूढसज्जनः । भूपः प्रभुं ययौ गायन्नृत्यद्भव्यौघमध्यगः ॥ ५३ ॥ युग्मम् ॥

अन्वयः-नागपुरं पुरं उद्भास्वत् उत्सव उत्साहं कृत्वा, ससंमदः पुत्र मित्र कलत्राणि समाहूय, ॥ ५२ ॥ शृंगार सार मातंग तुरंग आरूढ सज्जनः, गायत् नृत्यत् भव्य ओघ मध्यगः भूपः प्रभुं ययौ. ॥ ५३ ॥ युग्मं ॥

अर्थः-पछी ते नागपुर नगरने विस्तीर्ण महोत्सवना उत्साहवाळु करीने हर्ष पामेलो ते, पुत्रो मित्रो तथा स्त्रीओने एकठां करीने, ॥ ५२ ॥ शृगारथी मनोहर थयेला हाथीओ तथा घोडाओपर बेठेला छे सज्जनो जेना, तथा गाता अने नाचता भव्यलोकोना समूहनी वच्चे रहेलो ते राजा प्रभुपासे गयो. ॥ ५३ ॥ युग्मं ॥

भूपः पुण्यार्णवावर्तमध्यवर्तीव स भ्रमन् । प्रभुं प्रदक्षिणीकृत्य प्रणम्योपाविशत्पुरः ॥ ५४ ॥

अन्वयः-पुण्य अर्णव आवर्त मध्यवर्ती इव भ्रमन् सः भूपः प्रभुं प्रदक्षिणीकृत्य प्रणम्य पुरः उपाविशत्. ॥ ५४ ॥

अर्थः—पुण्यरूपी महासागरनी घूमरीमां जाणे आवी गयो होय नही! तेम भमतोथको ते राजा प्रभुने प्रदक्षिणा करीने तथा वांदीने (तेमनी) पासे बेठो. ॥ ५४ ॥

कर्णपेयां सुधां वर्षत्यथ तीर्थेशतोयदे । कर्णेन्द्रियत्वं नो केन लोकेनाङ्गेषु काङ्क्षितम् ॥ ५५ ॥

अन्वयः-अथ तीर्थेश तोयदे कर्ण पेयां सुधां वर्षति केन लोकेन अंगेषु कर्ण इंद्रियत्वं नो कांक्षितं? ॥ ५५ ॥

अर्थः—पछी तीर्थंकर प्रभुरूप मेघे कर्णोवडे पीवालायक अमृतनो वरसाद वरसावते छते कया माणसे (पोताना सर्व) अंगोमां

कर्णरूपीज इंद्रियनी इच्छा न करी? ॥ ५५ ॥

**वहन्मध्येऽधिकं रागं नीरागोऽन्तेऽपि नैव यः । न नरो रोचते मुक्त्यै सकुसुम्भमिवांशुकम् ॥ ५६ ॥**

अन्वयः–मध्ये अधिकं रागं वहन्, अंते अपि यः नीरागः न, (सः) नरः सकुसुंभं अंशुकं इव मुक्त्यै न रोचते. ॥ ५६ ॥

अर्थः—हृदयमां अति रागने धारण करनारो, अने छेवटे पण जे रागरहित नथी थतो, ते पुरुष कसुंबाथी रंगेलां वस्त्रनीपेठे मुक्तिरूपी स्त्रीने रुचिकर थइ शकतो नथी. ॥ ५६ ॥

**चला इति चलाक्षीभ्यश्चित्तं कर्षन्नमर्षतः । आलिङ्ग्यते नरो मुक्त्या जराजीर्णोऽप्यनीर्ष्यया ॥ ५७ ॥**

अन्वयः–चलाः इति चलाक्षीभ्यः अमर्षतः चित्तं कर्षन् जरा जीर्णः अपि नरः अनीर्ष्यया मुक्त्या आलिंग्यते. ॥ ५७ ॥

अर्थः–आ तो चपल छे, एम विचारीने स्त्रीओप्रते अणगमो धरावी, तेआमांथी हृदयने खेंची लेनारा, तथा वृद्धपणाथी जीर्ण थयेला पुरुषने पण बिलकुल इर्षा लाव्याविना मुक्तिस्त्री आलिंगन आपे छे. ॥ ५७ ॥

**इत्यादिभिर्जगद्भर्तुरुपदेशैः प्रशान्तधीः । राज्ये न्यस्य सुतं राजा भेजे भार्यान्वितो व्रतम् ॥ ५८ ॥**

अन्वयः–इत्यादिभिः जगत् गुरोः उपदेशैः प्रशांतधीः राजा सुतं राज्ये न्यस्य भार्या अन्वितः व्रतं भेजे. ॥ ५८ ॥

अर्थः–इत्यादिक प्रभुना उपदेशथी शांत थयेली बुद्धिवाळा ते राजाए पुत्रने राज्यपर स्थापन करीने स्त्रीसहित दीक्षा लीधी ॥ ६८ ॥

**विहरन्विभुना साकमशोकाख्यो मुनिर्महीम् । सापत्यया समं पत्न्या मुक्तिं भुक्तपा ययौ ॥ ५९ ॥**

अन्वयः-अशोक आख्यः मुनिः विभुना साकं महीं विहरन्, भुक्त तपाः सापत्यया पत्न्या मुक्तिं ययौ. ॥ ५९ ॥
अर्थः-(एरीते ते) अशोकनामना राजर्षि प्रभुसाथे पृथ्वीपर विहार करताथका तप तपीने संतानो सहित राणीसाथे मोक्षे गया.
॥ एरीते रोहिणीनी कथा समाप्त थइ. ॥

**प्रथितां वीरनाथेन श्रेणिकस्य पुरः पुरा । यामकार्षीदुमास्वातिः कथा सेत्थमिहोदिता ॥ ६० ॥**

अन्वयः—पुरा वीरनाथेन श्रेणिकस्य पुरः प्रथितां, यां उमास्वातिः अकार्षीत्, सा इत्थं इह उदिता. ॥ ६० ॥
अर्थः—पूर्वे श्रीवीरप्रभुए श्रेणिकराजानीपासे कही संभळावेली, तथा श्रीउमास्वातिआचार्यजीए रचेली छे, ते आ रोहिणीनी कथा उपर वर्णव्यामुजब अहीं कहेली छे. ॥ ६० ॥

**ततोऽवसर्पिणीतापविपुलव्यापदो भुवः । कुर्वन्शैत्यौषधमिव क्रमसंचारिवारिजैः ॥ ६१ ॥**

अन्वयः—ततः अवसर्पिणी ताप विपुल व्यापदः भुवः, क्रम संचारि वारिजैः शैत्य औषधं इव कुर्वन्, ॥ ६१ ॥
अर्थः-पछी अवसर्पिणीना तापथी विस्तीर्ण विपत्तिवाळी पृथ्वीनुं पगनीचे संचरतां कमलोवडे जाणे शीतल औषध करता होय नहि ! एवा,

**प्रसुप्तमान्तरं चक्षुर्जनानां मोहनिद्रया । समुज्जागरयन्दिव्यदुन्दुभिध्वनिडम्बरैः ॥ ६२ ॥**

अन्वयः—मोह निद्रया प्रसुप्तं जनानां आंतरं चक्षुः दिव्य दुंदुभि ध्वनि डंबरैः समुज्जागरयन्, ॥ ६२ ॥
अर्थः-मोहनिद्राथी मीचाइ गयेलां लोकोनां हृदयचक्षुने दिव्य दुंदुभिना नादना आडंबरथी जगाडता, ॥ ६२ ॥

**योमां श्रयति तं दुःखाद्रक्षामीत्यग्रगामिना । धर्मध्वजोर्ध्वदोष्णेव धर्मेणोद्यत्प्रभावनः ॥ ६३ ॥**

अन्वयः—यः मां श्रयति, तं दुःखात् रक्षामि, इति अग्रगामिना, धर्म ध्वज ऊर्ध्व दोष्णा इव धर्मेण उद्यत्प्रभावनः, ॥ ६३ ॥

अर्थः—जे कोइ मारो आश्रय करे छे, तेने दुःखमांथी छोडावुं छुं, एम कही जाणे आगळ चालता अने जाणे धर्मध्वजरूपी उंचा करेला हाथवाळा धर्मवडे करीने विस्तार पामती प्रभावनावाळा, ॥ ६३ ॥

**ज्ञानस्य केवलाख्यस्य ज्ञानेषु सकलेष्वपि । सर्पता धर्मचक्रेण स्पष्टयंश्चक्रवर्तिताम् ॥ ६४ ॥**

अन्वयः—सर्पता धर्म चक्रेण सकलेषु अपि ज्ञानेषु केवल आख्यस्य ज्ञानस्य चक्रवर्तितां स्पष्टयन्, ॥ ६४ ॥

अर्थः—आगळ चालता धर्मचक्रवडे करीने सर्व ज्ञानोमां केवलनामना ज्ञाननुं चक्रवर्तिपणुं प्रगट करता, ॥ ६४ ॥

**त्रिलोकीदुरितध्वान्तभिदे तुल्योदयस्पृशाम् । छत्रत्रयेन्दुबिम्बानां जङ्गमः पूर्वपर्वतः ॥ ६५ ॥**

अन्वयः—त्रिलोकी दुरित ध्वांत भिदे तुल्य उदय स्पृशां छत्र त्रय इंदु बिंबानां जंगमः पूर्व पर्वतः. ॥ ६५ ॥

अर्थः—त्रणे लोकोना पापोरूपी अंधकारनो नाश करवामाटे सरखा उदयवाळा त्रण छत्रोरूपी त्रण चंद्रोनां बिंबोना उदय माटे जंगम पूर्वाचल सरखा, ॥ ६५ ॥

**ज्ञानध्यानविभूतिभ्यां चामरद्वयकैतवात् । कीर्तिपुण्यपटप्रान्तदशाभ्यामिव वीजितः ॥ ६६ ॥**

अन्वयः—चामर द्वय कैतवात्, कीर्ति पुण्य पट प्रांत दशाभ्यां इव, ज्ञान ध्यान विभूतिभ्यां वीजितः इव, ॥ ६६ ॥

अर्थः—वळी बन्ने चामरोना मिषथी, कीर्ति अने पुण्यरूपी वस्त्रोना छेडाओनी झालरवाळी ज्ञान अने ध्याननी समृद्धिथी जाणे वीजायेला

**अमी एव सहन्तेंऽह्रिभारं विश्वगुरोरिति । द्युपुष्पवृष्टया हृद्येषु सर्वदेशेषु संचरन् ॥ ६७ ॥**

अन्वयः—अमी एव विश्वगुरोः अंह्रिभारं सहंते, इति द्यु पुष्प वृष्टया हृद्येषु सर्व देशेषु संचरन्. ॥ ६७ ॥

अर्थः—आ पुष्पोज जगत्गुरुना चरणोना भारने सहन करी शके एम छे, ( जाणे एवा हेतुथी थयेली ) दिव्य पुष्पोनी वृष्टिथी मनोहर थयेला सर्व देशोमां विचरता, ॥ ६७ ॥

**शुद्धश्रद्धारसैः पौरैर्ग्राम्यैरुद्दामकौतुकैः । विमुक्तान्योन्यपैशून्यैः पशूनामपि राशिभिः ॥ ६८ ॥**

अन्वयः—शुद्ध श्रद्धा रसैः पौरैः, उद्दाम कौतुकैः ग्राम्यैः,विमुक्त अन्योन्य पैशून्यैः पशूनां राशिभिः अपि, ॥ ६८ ॥

अर्थः—निर्मल श्रद्धारसवाळा नागरीकोथी, अति आश्चर्य पामता ग्राम्यजनोथी, परस्पर वैरभावथी रहित थयेला पशुओना समूहोथी,

**मूकीकृतनदीवृन्दैः शैलारण्याधिदेवतैः । पारावाराधिदेवीभिर्निरुद्धध्वनदूर्मिभिः ॥ ६९ ॥**

अन्वयः—मूकीकृत नदी वृंदैः शैल अरण्य अधिदैवतैः, निरुद्ध ध्वनत् ऊर्मिभिः पारावार अधिदेवीभिः, ॥ ६९ ॥

अर्थः—मुंगा करेल छे नदीओना समूहो जेओए, एवा पर्वतो अने वनोना अधिष्ठायक देवोथी, तथा अटकावेल छे गर्जना करता मोजाओ जेओए एवा महासागरोना अधिष्ठायक देवोथी,

**स्थानस्थानोद्यदाश्चर्यैरमरैः सहचारिभिः । स्वाद्यमानं प्रभुर्धर्मोपदेशं रचयन्क्रमात् ॥ ७० ॥**

अन्वयः-स्थान स्थान उद्यत् आश्चर्यैः, सहचारिभिः अमरैः स्वाद्यमानं धर्मोपदेशं क्रमात् रचयन् प्रभुः, ॥ ७० ॥

अर्थः-तथा जगो जगोए आश्चर्य पमाडता सहचारी (साथे चालता) देवोथी स्वाद लेवाता धर्मना उपदेशने अनुक्रमे रचता, एवा ते प्रभु,

**पुरः पुरः स्फुरद्भक्तिक्रियमाणमहोत्सवः । देशानार्याननार्यांश्च विहारेण व्यभूषयत् ॥ ७१ ॥**

अन्वयः-पुरः पुरः स्फुरत् भक्ति क्रियमाण महोत्सवः, विहारेण आर्यान् च अनार्यान् देशान् व्यभूषयत्. ॥ ७१ ॥ एकादशभिः कुलकं

अर्थः-आगळ आगळ स्फुरायमान थती भक्तिथी कराता महोत्सववाळा थयाथका विहारवडे करीने आर्य तथा अनार्य देशोने शोभाववा लाग्या. ॥ ७१ ॥ एकादशभिः कुलकं ॥

**अथ यत्र महातीर्थराजभाजि पदे पदे । अमुद्रोऽभूत्समुद्रोऽपि कार्ष्ण्यं हन्तुमिवात्मनः ॥ ७२ ॥**

अन्वयः—अथ महातीर्थराज भाजि यत्र समुद्रः अपि आत्मनः कार्ष्ण्यं हंतुं इव समुद्रः अपि अमुद्रः अभूत्, ॥ ७२ ॥

अर्थः—हवे महान् तीर्थने धारण करनारा, एवा जे देशमां ( आसपास ) महासागर पण जाणे पोताना पापोने दूर करवामाटे फेलाइ रहेलो छे, ॥ ७२ ॥

**शत्रुञ्जयोज्जयन्ताख्यतीर्थभूधरसंभवाः । यं शुचिं रचयन्त्युच्चैः परितः सरितः शुभाः ॥ ७३ ॥**

अन्वयः—शत्रुंजय उज्जयंत आरुह्य तीर्थ भूधर संभवाः शुभाः सरितः यं उच्चैः परितः शुचिं रचयंति, ॥ ७३ ॥

अर्थः—वळी शत्रुंजय तथा गिरनारनामना तीर्थरूप पर्वतोमांथी निकळेली मनोहर नदीओ जे देशने उंचेप्रकारे आसपासथी पवित्र करी रही छे. ॥ ७३ ॥

**दीप्तिर्दिनदिनेन्दूनां मज्जतां पश्चिमार्णवे । पृथग्भूत्वेव यत्रास्ति सरोजालजलच्छलात् ॥ ७४ ॥**

अन्वयः—यत्र पश्चिम अर्णवे मज्जतां दिन दिन इंदूनां दीप्तिः सरः जाल जल च्छलात् पृथग् भूत्वा इव अस्ति, ॥ ७४ ॥

अर्थः—वळी जे देशमां पश्चिममहासागरमां डूबता दिवसे दिवसना (हमेशना) चंद्रोनी कांति तळावोना समूहोना जलना मिषथी जाणे जूदी थइने रहेली छे, ॥ ७४ ॥

**पादाः पातालपीयूषकुण्डैरासां सिषेविरे । यस्मिन्नित्याहुरस्ताघवापीः पीताम्भसो जनाः ॥ ७५ ॥**

अन्वयः—आसां पादाः पाताल पीयूष कुंडैः सिषेविरे, इति यस्मिन् अस्ताध वापीः, पीत अंभसः जनाः आहुः, ॥ ७५ ॥

अर्थः—आ वावोना पायाओ (मूलो खरेखर) पातालमां रहेला अमृत कुंडोवडे सेवाइ रहेला छे, एम जे देशमां रहेली अति उंडी वावोने, तेनुं पाणी पीनारा लोको कही रह्या छे, ॥ ७५ ॥

**सदाफलद्रुमैरर्थियाश्चाकालफलद्रुमम् । आनन्दनैर्वनैर्यस्य हस्यते नन्दनं वनम् ॥ ७६ ॥**

अन्वयः—सदा फलद्रुमैः, आनंदनैः यस्य वनैः, अर्थि यांचा काल फलद्रुमं नंदनं वनं हस्यते, ॥ ७६ ॥

अर्थः–हमेशां फलद्रुप थएलां वृक्षोवाळां, तथा चोतरफथी आनंद आपनारां जे देशनां वनो, याचकोनी याचना वखतेज फल देनारां वृक्षवाळां नंदनवननी हांसी करी रहेलां छे, ॥ ७६ ॥

**गिरयो निरयोद्दामदुःखादुद्धर्तुमङ्गिनः । यत्रावनिप्रविष्टाङ्गाः प्रेक्ष्यन्ते तीर्थमानिनः ॥ ७७ ॥**

अन्वयः–यत्र तीर्थमानिनः गिरयः अंगिनः निरय उद्दाम दुःखात् उद्धर्तुं अवनि प्रविष्ट अंगाः प्रेक्ष्यंते, ॥ ७७ ॥

अर्थः–( वळी ) ज्यां तीर्थपणानुं अभिमान धरनारा पर्वतो प्राणीओने नरकना भयंकर दुःखमांथी जाणे बहार कहाडवा माटे पृथ्वीमां ( उंडां उंडां पोतानां) शरीरने दाखल करीने रहेला छे, ॥ ७७ ॥

**नालिकेरीफलस्तन्यः कूपगम्भीरनाभयः । सत्ताम्बूलीकृतमुखा यद्वाप्यः कस्य न प्रियाः ॥ ७८ ॥**

अन्वयः–नालिकेरी फल स्तन्यः, कूप गंभीर नाभयः, सत्तांबुलीकृत मुखाः यद्वाटयः कस्य प्रियाः न? ॥ ७८ ॥

अर्थः–नालियेरीनां फलोरूपी स्तनोवाळी, कूवाओरूपी गंभीर नाभिओवाळी, तथा उत्तम तांबूलो सहित मुखवाळी जे देशनी वाडीओ कोने प्राणप्रियाओ सरखी नथी थती? ॥ ७८ ॥

**यत्केशपाशस्तमसां रहस्येनेव निर्मितः । निषेधतीव नेत्राणां पदार्थशतदर्शनम् ॥ ७९ ॥**

अन्वयः–यत् केश पाशः तमसां रहस्येन निर्मितः इव, नेत्राणां पदार्थ शत दर्शनं निषेधति इव, ॥ ७९ ॥

अर्थः—(वळी जे देशना गांवडांओनी स्त्रीओनो) केशपाश जाणे अंधकारना तत्वथी बनाव्यो होइ नही! तेम जाणे आंखोना

(बीजा) सेंकडो गमे पदार्थोना दृश्यने रोके छे, ॥ ॥ ७९ ॥

**या नेत्रैः प्रसृतिप्रायैः पिबन्तीव नृणां मनः। वाग्भिः सुधामनोज्ञाभिर्जीवयन्तीव मन्मथम् ॥ ८० ॥**

अन्वयः-याः प्रसृति प्रायैः नेत्रैः नृणां मनः पिबंति इव, सुधा मनोज्ञाभिः वाग्भिः मन्मथं जीवयंति इव, ॥ ८० ॥

अर्थः—(वळी) जे स्त्रीओ (पोतानी) विस्तीर्ण आंखोवडे जाणे पुरुषोना मनने पीजती होय नहीं!, तथा अमृतसरखी मनोहर वाणीवडे जाणे कामदेवने जीवाडती होय नहीं! ॥ ८० ॥

**यासां वर्धयतीवास्यशशी संसारसागरम्। तमेवालङ्करोतीव बन्धुरोऽधरविद्रुमः ॥ ८१ ॥**

अन्वयः-यासां आस्य शशी संसार सागरं वर्धयति इव, तं एव बंधुरः अधर विद्रुमः अलंकरोति इव, ॥ ८१ ॥

अर्थः—(वळी) जे स्त्रीओनो मुखरूपी चंद्र जाणे संसारसागरनी वृद्धि करतो होय नहीं! तथा तेनेज होठरूपी मनोहर परवाळां जाणे शोभावतां होय नहीं! ॥ ८१ ॥

**संध्यारागरुचिर्यासां पाणिपादप्रभाभरः। स्त्रीलोकनिन्दास्वाध्याये रुणद्धीव मुनीनपि ॥ ८२ ॥**

अन्वयः-यासां संध्या राग रुचिः पाणि पाद प्रभा भरः, स्त्रीलोक निंदा स्वाध्याये मुनीन् अपि रुणद्धि इव, ॥ ८२ ॥

अर्थः—(वळी) जे स्त्रीओनो संध्याना रंगसरखी कांतिवाळो हाथ पगनी कांतिनो समूह, स्त्रीओनी निंदानो स्वाध्याय करवामां मुनिओने पण जाणे रोकतो होय नहीं! ॥ ८२ ॥

स्वर्णरत्नैः कृतं यासां दैवादकठिनैरिव । संसारदूषणान्यङ्गं पिदधातीव तेजसा ॥ ८३ ॥

अन्वयः—दैवात् अकठिनैः इव स्वर्ण रत्नैः कृतं यासां अंगं, तेजसा संसार दूषणानि पिदधाति इव. ॥ ८३ ॥

अर्थः—दैवयोगे जाणे कोमल थयेलां स्वर्ण अने रत्नोनुं बनावेलुं जे स्त्रीओनुं शरीर, तेजवडे जाणे संसारना दोषोने ढांकतुंहोय नही!

ताभिर्यद्ग्रामरामाभिर्जिता इव सुरस्त्रियः । न लभन्ते प्रियैः सार्धं निद्रां चिन्ताकुला इव ॥ ८४ ॥

अन्वयः—ताभिः यत् ग्राम रामाभिः जिताः इव सुरस्त्रियः, चिंता आकुलाः इव प्रियैः सार्धं निद्रां न लभंते, ॥ ८४ ॥

अर्थः—एवा प्रकारनी जे देशना गांवडांओनी स्त्रीओथी जाणे पराजय पामी होय नही! एवी देवांगनाओ (पण) जाणे चिंतातुर थइ होय नही! तेम (पोताना) स्वामीओसाथे (सुखे) निद्रा पण लेइ शकती नथी, ॥ ८४ ॥

तं देशं श्रीसुराष्ट्राख्यं सुरासुरवृतो विभुः । पुनः पवित्रयामास विहारक्रमलीलया ॥ ८५ ॥

अन्वयः—तं श्रीसुराष्ट्र आख्यं देशं सुर असुर वृतः विभुः विहार क्रम लीलया पुनः पवित्रयामास. । ८५ । चतुर्दशभिः कुलकं ॥

अर्थः—एवा प्रकारना श्रीसुराष्ट्रनामना देशने देवदानवोथी वींटायेला प्रभु विहारक्रमनी लीलाथी फरीने पवित्र करवा लाग्या.

द्रुमाः स्वदानश्रीसङ्गसेविनो यत्तटीजुषः । मन्ये पूर्णायुषः कल्पद्रुमाःस्युर्दिवि दानिनः ॥ ८६ ॥

दर्शनादादिदेवस्य साधुस्वाध्यायकर्णनात् । यत्तिर्यञ्चोऽपि पुण्याप्त्या हसन्ति द्युपतीनपि ॥ ८७ ॥

**जगद्गुरुस्तमारोहदुच्चैः शत्रुञ्जयाचलम् । स्वोप्तं भुवि सुनिष्पन्नं धर्मक्षेत्रमिवेक्षितुम् ॥ ८८ ॥ त्रि०**

अन्वयः—यत् तटी जुषः द्रुमाः स्व दान श्रीसंघ सेविनः, पूर्ण आयुषः दिवि दानिनः कल्पवृक्षाः स्युः (इति) मन्ये, । ८६ । यत् तिर्यंचः अपि आदिदेवस्य दर्शनात्, साधु स्वाध्याय कर्णनात् पुण्य आप्त्या द्युपतीन् अपि हसंति, ॥ ८७ ॥ तं उच्चैः शत्रुंजय अचलं, भुवि स्वउप्तं सुनिष्पन्नं धर्म क्षेत्रं ईक्षितुं इव जगत् गुरुः आरोहत्. ॥ ८८ ॥ त्रिभिर्विशेषकं ॥

अर्थः—जे पर्वतनी तलेटीमां रहेलां वृक्षो, पोतानां दानवडे श्रीसंघनी सेवा करीने, आयु पूर्ण थयाबाद देवलोकमां दानेश्वरी कल्पवृक्षोरूपे थवां जोइये, एम हुं मानुं छुं, ॥ ८६ ॥ वळी जे पर्वतमां रहेता तिर्यंचो पण श्रीऋषभदेवप्रभुनां दर्शनथी तथा मुनिओनां स्वाध्याय सांभळवाथी मेळवेली पुण्योनी प्राप्तिथी देवोनी पण हांसी करे छे, ॥ ८७ ॥ एवा उंचा शत्रुंजयपर्वतपर, पृथ्वीमां पोते वावेला, तथा सारीरीते पाकीने तैयार थयेला धर्मक्षेत्रने जाणे जोवामाटेज प्रभु चड्या. ॥ ८८ ॥ त्रिभिर्विशेषकं ॥

**ताद्दक्समवसारश्रीभूषणो भगवानथ । मोहादिमूर्छितं विश्वं वाक्सुधाभिरजीवयत् ॥ ८९ ॥**

अन्वयः—अथ ताद्दक् समवसार श्री भूषणः भगवान् मोह आदि मूर्छितं विश्वं वाक् सुधाभिः अजीवयत्. ॥ ८९ ॥

अर्थः—पछी तेवां समवसरणनी शोभाने शोभावनारा प्रभु मोह आदिकथी मूर्छित थयेलां जगतने ( पोतानी ) वाणीरूपी अमृतथी सजीवन करवा लाग्या. ॥ ८९ ॥

**पूर्वं प्रबोधितोऽप्येष देशः पूज्यैरलंकृतः । अमुमेवाद्रिमारोढुं तदस्यादिश्यतां गुणः ॥ ९० ॥**

**इति बद्धाञ्जलौ श्रद्धाजलौघविमलात्मनि । द्युपतौ पृच्छति स्वामी श्रुतिभाग्यफलं जगौ ॥ ९१ ॥ युग्मम्**

अन्वयः—अमुं एव अद्रिं आरोढुं, पूर्वं प्रबोधितः अपि एषः देशः पूज्यैः अलंकृतः, तत् अस्य गुणः आदिश्यतां? ॥ ९० ॥ इति श्रद्धा जलओघ विमल आत्मनि द्युपतौ बद्ध अंजलौ पृच्छति स्वामी श्रुति भाग्य फलं जगौ. ॥ ९१ ॥ युग्मं ॥

अर्थः-(हे स्वामी) आज पर्वतपर चडवामाटे पूर्वे पण प्रतिबोधेला एवा आ सौराष्ट्रदेशने आपसाहेबे (फरीने) शोभाव्यो छे, तो आ पर्वतमां (एवो शो) गुण छे? ते फरमावो? ॥ ९० ॥ एरीते श्रद्धारूपी जलना समूहथी निर्मल थयेल आत्मावाळा इंद्रे हाथ जोडीने पूछवाथी प्रभु पण कर्णोना सौभाग्यना फल सरखुं वचन बोल्या के. ॥ ९१ ॥ युग्मं ॥

**धर्मकल्पद्रुमोद्यानं धर्मकामगवीकुलम् । यं श्रितैर्दृश्यते धर्मचिन्तामणिमहाकरः ॥ ९२ ॥**

अन्वयः—धर्म कल्प द्रुम उद्यानं, धर्म काम गवी कुलं, यं श्रितैः धर्म चिंतामणि महाकरः दृश्यते, ॥ ९२ ॥

अर्थः—धर्मरूपी कल्पवृक्षोना बगीचा सरखा, तथा धर्मरूपी कामधेनुओना गोकुल सरखा, एवा जे पर्वतपर चडवाथी धर्मरूपी चिंतामणिरत्नोनी म्होटी खाण जोवामां आवे छे, ॥ ९२ ॥

**महद्भ्योऽपि महीयान्यो यत्रारूढैर्भवार्णवः । दृश्येत गोपदप्रायो मुक्तिः स्पृश्येत पाणिना ॥ ९३ ॥**

अन्वयः—यत्र आरूढैः महद्भ्यः अपि महीयान यः भव अर्णवः गोपद प्रायः दृश्येत, मुक्तिः पाणिना स्पृश्येत, ॥ ९३ ॥

अर्थः—( वळी ) जे पर्वतपर चडवाथी महोटामां महोटो, एवो पण संसाररूपी महासागर खाबोचीयां जेवडो देखाय छे, तथा

मुक्तिने पण हाथवडे स्पर्श करी शकाय छे, ॥ ९३ ॥

**आद्यं लोकाग्रगमने सोपानं समवाप्य यम् । असिध्यन्पुण्डरीकाद्या मुनयः कोटिकोटयः ॥ ९४ ॥**

अन्वयः–लोक अग्र गमने आद्यं सोपानं यं समवाप्य, पुंडरीक आद्याः कोटि कोटयः मुनयः असिध्यन्, ॥ ९४ ॥

अर्थः—( वळी ) लोकना अग्रभागपर जवामाटे पेहेला पगथीयां सरखा, एवा जे पर्वतने मेळवीने पुंडरीक आदिक कोटाकोटि मुनिओ सिद्ध थयेला छे, ॥ ९४ ॥

**धिग्मुक्तिक्षेत्रभावं मेऽद्याप्यनन्ता हि जन्तवः । आर्ता भवे भ्रमन्तीति निर्झरै रोदितीव यः ॥ ९५ ॥**

अन्वयः–मे मुक्ति क्षेत्र भावं धिक्, हि अद्य अपि अनंताः जंतवः आर्ताः भवे भ्रमंति, इति निर्झरैः यः रोदिति इव, ॥ ९५ ॥

अर्थः—(अरेरे ! ) मारां मोक्षक्षेत्रपणाने धिक्कार छे! केमके हजु पण अनंता प्राणीओ दुःख पामताथका आ संसारमां रझळी रह्या छे! जाणे एम मानीने झरणाओवडे जे पर्वत रड्या करे छे, ॥ ९५ ॥

**अहो अस्य सुदुर्भेदः कश्चित्कठिनतागुणः । आत्मा त्यक्ततनुर्यत्र न क्षमः स्यादधोगतौ॥ ९६ ॥**

अन्वयः–अहो! अस्य कश्चित् कठिनता गुणः सुदुर्भेदः! यत्र त्यक्त तनुः आत्मा अधः गतौ क्षमः न स्यात्, ॥ ९६ ॥

अर्थः–अहो! आ पर्वतनो कोइक (विचित्र प्रकारनो) कठीनपणानो गुण महाकष्टवडे भेदी शकाय एवो लागे छे! केमके ज्यां तजेलां शरीरवाळो आत्मा नीचे (नरकमां) जवाने समर्थ थइ शकतो नथी. ॥ ९६ ॥

**क्रूराशयाः क्रूरगिरः कृष्णाः शौचबहिश्चराः । पापस्येव चरा यस्मिन्न पदं ददति द्विकाः ॥ ९७ ॥**

अन्वयः—क्रूर आशयाः, क्रूर गिरः, कृष्णाः, शौच बहिश्चराः द्विकाः पापस्य चराः इव यस्मिन् पदं न ददति. ॥ ९७ ॥

अर्थः—( वळी ) क्रूर अभिप्रायवाळा, क्रूर वचनोवाळा, श्याम रंगना, तथा पवित्रता विनाना कागडाओ, पापाचारीओनीपेठे जे पर्वतपर पगलुं पण देइ शकता नथी. ॥ ९७ ॥

**हिमाद्रौ कविवाचैव यत्रैवाचलराजता । आद्यो जगद्गुरुर्यत्र तिलकाय स्वयं स्थितः ॥ ९८ ॥**

अन्वयः—यत्र एव अचलराजता. हिमाद्रौ कवि वाचा एव, यत्र तिलकाय आद्यः जगत् गुरुः स्वयं स्थितः. ॥ ९८ ॥

अर्थः—(वळी) जे पर्वतनेज गिरिराजपणुं (शोभे छे) हिमाचलमां तो गिरिराजपणुं फक्त कविओनी वाणीथीज छे, केमके जाणे ( तेने गिरिराजपणानुं ) तिलक करवामाटे ज्यां प्रथम तीर्थंकर पोते रहेला हता. ॥ ९८ ॥

**सर्वज्ञा अपि तस्यास्य गिरेर्नेशा गुणोक्तिषु । आयुस्तेषामपि मितं क्रमोद्यं च यतो वचः ॥ ९९ ॥**

अन्वयः—तस्य अस्य गिरेः गुण उक्तिषु सर्वज्ञाः अपि ईशाः न, यतः तेषां अपि आयुः मितं, च वचः क्रम उद्यं. ॥ ९९ ॥

अर्थः—ते आ गिरिराजनुं वर्णन करवाने सर्वज्ञो पण समर्थ नथी, केमके तेओनुं पण आयु प्रमाणवाळुं छे, तथा वचन तो अनुक्रमे बोली शकाय छे. ॥ ९९ ॥ अष्टभिः कुलकं ॥

**इत्यादिश्याल्पशेषेऽह्नि देवच्छन्देऽविशद्विभुः । स्वं स्वं स्थानं पुनः सर्वे तिर्यग्मर्त्यत्रजा ययुः ॥ १३०० ॥**

अन्वयः–इति आदिश्य अह्नि अल्प शेषे विभुः देवच्छंदे अविशत्, पुनः सर्वे तिर्यग् मर्त्य व्रजाः स्वं स्वं स्थानं ययुः. ॥ १३०० ॥

अर्थ –एम कहीने थोडो दिवस बाकी रहेते छते प्रभु देवच्छंदमां जइने बिराज्या, तथा सघळा तिर्यंचोना तथा मनुष्योना समूहो पोतपोताने स्थानके गया. ॥ १३०० ॥

**अस्वप्नत्वफलं किं न गृह्णामीति स्मरन्हरिः । निशि नाभेयमभ्यर्च्य प्रारेभे प्रेक्षणं पुरः ॥ १ ॥**

अन्वयः—अस्वप्नत्व फलं किं न गृह्णामि? इति स्मरन् हरिः निशि नाभेयं अभ्यर्च्य, पुरः प्रेक्षणं प्रारेभे. ॥ १ ॥

अर्थः—अस्वप्नपणानुं फल हुं शामाटे न लेउं? एम याद लावीने इंद्रे रात्रिए श्रीऋषभदेवप्रभुनी पूजा करीने, तेमनी पासे नाटक करवानो प्रारंभ कर्यो. ॥ १ ॥

**ततादिकचतुर्वाद्यसमहस्तकहेलया । चतुर्गतिकसंसारत्रासावेशं सुरा व्यधुः ॥ २ ॥**

अन्वयः–तत आदिक चतुर्वाद्य सम हस्तक हेलया सुराः चतुर्गतिक संसार त्रास आवेशं व्यधुः. ॥ २ ॥

अर्थः—( त्यारे ) वीणाआदिक चारे प्रकारना वाजित्रो साथेना तालपूर्वक देवो जाणे चारे गतिओवाळा संसारना नाशनो देखाव भजववा लाग्या. ॥ २ ॥

**ते च पञ्चमुखेनेव पञ्चशब्देन चञ्चता । वाद्येन चक्रिरे पञ्चमहापापेभपञ्चताम् ॥ ३ ॥**

अन्वयः–च ते पंचमुखेन इव पंच शब्देन चंचता वाद्येन पंच महापाप इभ पंचतां चक्रिरे. ॥ ३ ॥

अर्थः—वळी तेओ सिंहसरखा पांच प्रकारना शब्दोथी शोभता वाजित्रवडे जाणे पांच प्रकारना महान् पापोरूपी हाथीनो विनाश करवा लाग्या. ॥ ३ ॥

**महामृदङ्गधोंकारः स कश्चन तदाभवत् । श्रोतुर्जनस्य येनासञ्शिथिलाः कर्मसंधयः ॥ १०४ ॥**

अन्वयः–तदा सः महामृदंग धोंकारः कश्चन अभवत्, येन श्रोतुः जनस्य कर्म संधयः शिथिलाः आसन्. ॥ ४ ॥

अर्थः–( वळी ) ते समये महोटां मर्दलोनो एवो तो कोइ धोंकारशब्द थवा लाग्यो के, जेथी ते सांभळनारा मनुष्योना कर्मोना सांधाओ ढीला पडी गया. ॥ ४ ॥

**युगादिजिनवक्त्रेन्दुक्षुभितस्य निरन्तरः । रवः पुण्यार्णवस्येव रराज मुरजध्वनिः ॥ १०५ ॥**

अन्वयः–युगादि जिन वक्त्र इंदु क्षुभितस्य पुण्य अर्णवस्य निरंतरः रवः इव, मुरज ध्वनिः रराज. ॥ ५ ॥

अर्थः—( वळी ) श्रीऋषभदेव प्रभुना मुखरूपी चंद्रथी उछळेला पुण्यरूपी महासागरना निरंतर थता घोष सरखो मुरजोनो नाद ( पण ) शोभवा लाग्यो. ॥ ५ ॥

**अप्यादिनाथमुखतः कृषन्ती द्युसदां दृशः । बभूव भाग्यभूरेव नर्तकी भावनर्तनैः ॥ १०६ ॥**

अन्वयः–द्युसदां दृशः आदिनाथ मुखतः कृषती अपि नर्तकी भाव नर्तनैः भाग्य भूः एव बभूव. ॥ ६ ॥

अर्थः—देवोनी आंखोने श्री आदिनाथप्रभुना मुखपरथी खेंचती एवी पण नृत्य करती ( अप्सरा पोताना ) हावभावपूर्वक नृत्यो-

वडे भाग्योना स्थानरूपज थइ. ॥ ६ ॥

**संक्षिपन्ती चतस्त्रोऽपि संसारस्य गतीरिव । उद्धतांह्रिकरद्वन्द्वावर्तनैर्नर्तकी बभौ ॥ ७ ॥**

अन्वयः-संसारस्य चतस्त्रः अपि गतीः संक्षिपंती इव, उद्धत अंह्रिकर द्वंद्वा नर्तकी आवर्तनैः बभौ. ॥ ७ ॥

अर्थः-संसारनी चारे गतिओनो जाणे संक्षेप करती होय नही! तेम हाथपग उंचा करती नाटकणी ( नृत्य करनारी अप्सरा ) फूदडी फरतीथकी शोभवा लागी. ॥ ७ ॥

**सप्तरन्ध्रस्वरसुधाधौताधोगतिदुर्मलः । अवादयत्तदा वंशं सुरवं सुरवांशिकः ॥ ८ ॥**

अन्वयः- सप्तरंध्र स्वर सुधा धौत अधः गति दुर्मलः सुर वांशिकः तदा सुरवं वंशं अवादयत्. ॥ ८ ॥

अर्थः-सात रंध्रोमांथी निकळता नादोरूपी अमृतथी धोइ नाखेल छे नर्कनी गतिनो दुष्ट मेल जेणे, एवो वांसली वगाडनारो देव ते समये उत्तम नादवाळी वांसली वगाडवा लाग्यो. ॥ ८ ॥

**बद्धतुम्बाभवत्तत्र वीणा मधुरवादिनी । उत्तारयितुकामेव श्रोतॄन्संस्रुतिवाहिनीम् ॥ ९ ॥**

अन्वयः—तत्र मधुर वादिनी वीणा, श्रोतॄन् संसृति वाहिनीं उत्तारयितु कामा इव बद्ध तुंबा अभवत्. ॥ ९ ॥

अर्थः-(वळी) ते नाटकमां मधुर नाद करती वीणा, सांभळनाराओने जाणे संसाररूपी नदी उतारवानी इच्छावाळी थइ होय नही! तेम जोडेलां तुंबकोवाळी (शोभती) हती. ॥ ९ ॥

**सुधाम्बुधिमिवोद्भ्रान्तं गीतमुद्भाव्य भाविनाम् । ह्रियेव विलयं प्राप संसारक्षारसागरः ॥ १० ॥**

अन्वयः-भाविनां गीतं उद्भ्रांतं सुधा अंबुधि इव उद्भाव्य, ह्रिया इव, संसार क्षार सागरः विलयं प्राप. ॥ १० ॥

अर्थः-(वळी ते वखते) भावना भावता (देवोना) गायनने, उछळेला अमृतना महासागर सरखो जाणीने, जाणे लज्जाथी संसाररूपी खारो महासागर तो (सूकाइने) नाशज पाम्यो. ॥ १० ॥

**प्रातर्दीपसहस्राभकरव्यतिकरः स्वयम् । धर्मेशस्याभवत्तत्रारात्रिकं रात्रिकण्टकः ॥ ११ ॥**

अन्वयः-तत्र प्रातः दीप सहस्र आभ कर व्यतिकरः रात्रि कंटकः स्वयं धर्म ईशस्य आरात्रिकं अभवत्. ॥ ११ ॥

अर्थः-(वळी) त्यां प्रभात समये हजारोगमे दीपक सरखां किरणोना समूहवाळो सूर्य पोतेज प्रभुनी आरतीरूपे (शोभवा) लाग्यो.

**इति प्रेक्षणमापूर्य प्रणम्यादिजिनं मुदा । वव्रे कृतविहारं श्रीवासुपूज्यं हरिः सुरैः ॥ १२ ॥**

अन्वयः-इति प्रेक्षणं आपूर्य, मुदा आदिजिनं प्रणम्य, हरिः कृत विहारं श्रीवासुपूज्यं सुरैः वव्रे. ॥ १२ ॥

अर्थः-एरीते नाटक संपूर्ण करीने, हर्षपूर्वक श्रीऋषभदेवप्रभुने नमीने, इंद्र ( त्यांथी ) विहार करता, एवा श्रीवासुपूज्यप्रभुनी आसपास देवोसहित वींटाइने चालवा लाग्यो. ॥ १२ ॥

**द्वासप्ततिसहस्राणि श्रमणाः स्वामिनोऽभवन् । गताः सहस्रमूर्तित्वं तपःपुंसः कला इव ॥ १३ ॥**

अन्वयः—सहस्र मूर्तित्वं गताः तपः पुंसः कलाः इव, स्वामिनः द्वासप्तति सहस्राणि श्रमणाः अभवन्. ॥ १३ ॥

अर्थः—एक हजार स्वरूपने प्राप्त थयेली, तपरूपी पुरुषनी जाणे कलाओ होय नहीं! एवा, ते श्रीवासुपूज्यप्रभुना बहोतेर हजार साधुओ हता. ॥ १३ ॥

**लक्षसंख्यैरिव गुणैर्गुणिता जगदीशितुः । एका क्षमैव मूर्तैव साध्वीलक्षमजायत ॥ १४ ॥**

अन्वयः—लक्ष संख्यैः गुणैः गुणिता जगत् ईशितुः मूर्ता एव एका क्षमा एव साध्वी लक्षं अजायत. ॥ १४ ॥

अर्थः—एक लाख संख्यावाळा गुणोवडे गुणाकार करेली, एवी ते प्रभुनी जाणे देहधारी एक क्षमाज होय नहीं! एवी ते प्रभुनी एक लाख साध्वीओ थइ हती. ॥ १४ ॥

**शतद्वयीयुतं जज्ञे सहस्रं पूर्वशालिनाम् । चतुःशतीयुता पञ्चसहस्र्यवधिवेदिनाम् ॥ १५ ॥**

अन्वयः—पूर्व शालिनां शत द्वयी युतं सहस्रं जज्ञे, चतुः शती युता पंच सहस्री अवधि वेदिनां. ॥ १५ ॥

अर्थः—( वळी ते प्रभुना परिवारमां ) एक हजार अने बसो चौद पूर्वधारीओ हता, तथा पांच हजार अने चारसो अवधिज्ञानवाळा मुनिओ हता. ॥ १५ ॥

**मनःपर्यववर्याणां पट्सहस्री शताधिका । षट् सहस्राणि साधूनां केवलज्ञानशालिनाम् ॥ १६ ॥**

अन्वयः—मनः पर्यव वर्याणां शत अधिका षट् सहस्री, केवल ज्ञान शालिनां साधूनां षट् सहस्राणि. ॥ १६ ॥

अर्थः—वळी मनःपर्यव ज्ञानथी शोभता छ हजार ने एकसो मुनिओ हता, तथा छ हजार केवलज्ञानी मुनिओ हता. ॥ १६ ॥

**लब्धवैक्रियलब्धीनां शतं शतगुणीकृतम् । वादलब्धिमतां सप्तचत्वारिंशच्छतानि च ॥ १७ ॥**

अन्वयः—लब्ध वैक्रिय लब्धीनां शतगुणीकृतं शतं, च वाद लब्धिमतां सप्त चत्वारिंशत् शतानि. ॥ १७ ॥

अर्थः—वळी वैक्रियलब्धिवाळा सोगणा एकसो, एटले एक लाख मुनिओ हता, तथा वादलब्धिवाळा सुडतालीससो ( चार हजार ने सातसो ) मुनिओ हता. ॥ १७

**लक्षद्वयं श्रावकाणां दशपञ्चसहस्रयुक् । चतुर्लक्षी षट्त्रिंशत्सहस्राः श्राविका इति ॥ १८ ॥**

अन्वयः—श्रावकाणां दश पंच सहस्रयुक् लक्ष द्वयं, षट्त्रिंशत् सहस्राः चतुर्लक्षी श्राविकाः इति. ॥ १८ ॥

अर्थः—बे लाख अने पंदर हजार श्रावको हता, तथा चार लाख ने छत्रीस हजार श्राविकाओ हती. ॥ १८ ॥

**वर्षलक्षाश्चतुःपञ्चाशतं मासेन वर्जितम् । आ केवलाद्विहरतः परिवारः प्रभोरभूत् ॥ १९ ॥**

अन्वयः—आ केवलात् मासेन वर्जितं चतुः पंचाशतं वर्ष लक्षाः विहरतः प्रभोः परिवारः अभूत्. ॥ १९ ॥

अर्थः—केवलज्ञाननी उत्पत्तिथी मांडीने, एकमास ओछा चोपन लाख वर्षोसुधी विचरेला, एवा ते श्रीवासुपूज्य प्रभुनो ( उपर जणाव्या मुजब ) परिवार थयो हतो. ॥ १९ ॥

**ततस्त्रिजगतः स्वामी बोधयन्वसुधां क्रमात् । मुक्त्या संकेतितमिव प्राप चम्पापुरीवनम् ॥ २० ॥**

अन्वयः—ततः त्रिजगतः स्वामी वसुधां बोधयन् क्रमात् मुक्त्या संकेतितं इव, चंपा पुरी वनं प्राप. ॥ २० ॥

अर्थः—पछी त्रणे जगतना स्वामी एवा ते श्रीवासुपूज्य भगवान् पृथ्वीपर (लोकोने) बोध देताथका अनुक्रमे, जाणे मुक्तिस्त्रीने मळवानुं संकेत करेलुं स्थान होय नहीं! एवा चंपानगरीना वनमां पधार्या. ॥ २० ॥

**षड्भिर्मुनिशतैः साकं पादपोपगमं श्रितः । पर्यङ्कासनमासीनः प्रपेदेऽनशनं प्रभुः ॥ २१ ॥**

अन्वयः—षड्भिः मुनिशतैः साकं पादप उपगमं श्रितः प्रभुः, पर्यंकासनं आसीनः अनशनं प्रपेदे. ॥ २१ ॥

अर्थः—पछी छसो मुनिओनी साथे पादपोपगमने (वृक्ष सरखां निश्चलपणाने) प्राप्त थयेला प्रभुए पर्यंक आसने बेशीने अनशन अंगीकार कर्युं. ॥ २१ ॥

**इति प्रज्ञाय दूतेभ्यः कति तत्राशु नाययुः । दुःखिनः पादचारेण प्रत्यासन्ना महीभुजः ॥ २२ ॥**

अन्वयः—दूतेभ्यः इति प्रज्ञाय तत्र प्रत्यासन्नाः कति दुःखिनः महीभुजः पाद चारेण आशु न आययुः? ॥ २२ ॥

अर्थः—दूतोना मुखथी आ हकीकत जाणीने त्यां नजिकमां रहेला केटला दुःखी राजाओ पगे चालीने पण तुरत न आव्या? ॥

**अस्मत्प्रभूणां संदेहमिदानीं हन्त हन्तु कः । इतीवेन्द्रासनैः प्रापि कम्पस्त्यक्ताशने जिने ॥ २३ ॥**

अन्वयः—हंत इदानीं अस्मत् प्रभूणां संदेहं कः हंतु? इति इव, त्यक्त अशने जिने इंद्र आसनैः कंपः प्रापि. ॥ २३ ॥

अर्थः—अरेरे! हवे आपणा स्वामिओनो संशय कोण दूर करशे? जाणे एवी चिंताथी होय नही! तेम प्रभुए अनशन लेवाथी इंद्रोनां आसनो कंपवा लाग्यां. ॥ २३ ॥

**अवधिज्ञानविज्ञातपीठकम्पनकारणाः । चतुःषष्टिरिहाजग्मुर्वासवा देवतावृताः ॥ १४ ॥**

अन्वयः—अवधिज्ञान विज्ञात पीठ कंपन कारणाः, चतुः षष्टिः वासवाः देवता आवृताः इह आजग्मुः, ॥ २४ ॥

अर्थः—अवधिज्ञानथी जाणेल छे आसनो कंपवानुं कारण जेओए, एवा चोसठे इंद्रो, (बीजा) देवोवडे परवर्याथका अहीं (चंपापुरीना उद्यानमां) आव्या. ॥ २४ ॥

**अथेन्द्राश्च नरेन्द्राश्च प्रभुं दत्तप्रदक्षिणाः । नत्वा तस्थुर्महाशोककीलिता इव निश्चलाः ॥ २५ ॥**

अन्वयः—अथ इंद्राः च नरइंद्राः च, प्रभुं दत्त प्रदक्षिणाः नत्वा महा शोक कीलिताः इव निश्चलाः तस्थुः. ॥ २५ ॥

अर्थः—पछी ते इंद्रो अने राजाओ प्रभुने प्रदक्षिणा देइने तथा वांदीने, जाणे महान् शोकवडे स्तंभाइ गया होय नही! तेम (त्यां) निश्चल थइने रह्या. ॥ २५ ॥

**अन्ते मासस्य चन्द्रेऽथोत्तराभद्रपदास्थिते । शुक्लाषाढचतुर्दश्यां स्वामी मोक्षोन्मुखोऽजनि ॥ २६ ॥**

अन्वयः—अथ मासस्य अंते, उत्तराभद्रपदा स्थिते चंद्रे, शुक्ल आषाढ चतुर्दश्यां स्वामी मोक्ष उन्मुखः अजनि. ॥ २६ ॥

अर्थः—पछी एक मासने अंते, उत्तरा भाद्रपदनामना नक्षत्रनी साथे चंद्रनो योग थये छते असाड सुदी चौदसने दिवसे प्रभु मोक्षनी सन्मुख थया. ॥ २६ ॥

**बादरे काययोगेऽथ स्थित्वा स्थिरतरासनः । स्वामी रुरोध वाक्चित्तयोगौ योगेन बादरौ ॥ २७ ॥**

अन्वयः—अथ स्वामी स्थिरतर आसनः बादरे काय योगे स्थित्वा योगेन बादरौ चित्त योगौ रुरोध. ॥ २७ ॥

अर्थः—पछी प्रभुए वधारे स्थिर आसने रहीने, तथा बादर काययोगमां स्थिर थइने, योगवडे बादर वचनयोगने तथा बादर मनोयोगने रोक्या. ॥ २७ ॥

**काययोगेन सूक्ष्मेण काययोगं स बादरम् । रुद्ध्वा रुरोध वाक्चित्तयोगौ सूक्ष्मो जगद्गुरुः ॥ २८ ॥**

अन्वयः—सः जगत्गुरुः सूक्ष्मेण काय योगेन बादरं काय योगं रुध्ध्वा सूक्ष्मौ वाक् चित्त योगौ रुरोध. ॥ २८ ॥

अर्थः—(पछी) ते जगत्गुरुए सूक्ष्म काययोगवडे बादर काययोगने रोकीने, सूक्ष्म वचनयोगने तथा सूक्ष्म मनोयोगने रोक्या.

**तार्तीयोकमिदं शुक्लध्यानं सूक्ष्मक्रियाह्वयम् । प्रभुः क्रमादमुं सूक्ष्मकाययोगमसाधयत् ॥ २९ ॥**

अन्वयः—प्रभुः क्रमात् अमुं सूक्ष्म काय योगं असाधयत्, इदं सूक्ष्म क्रिया आह्वयं तार्तीयीकं शुक्ल ध्यानं ॥ २९ ॥

अर्थः—प्रभुए अनुक्रमे आ सूक्ष्म काययोगने पण साध्यो (रोक्यो), अने तेने सूक्ष्मक्रियानामनो शुक्लध्याननो त्रीजो पायो जाणवो.

**अथोच्छिन्नक्रियं तुर्यं शुक्लध्यानमशिश्रियत् । पञ्चह्रस्वाक्षरोच्चारसमानसमयं विभुः ॥ ३० ॥**

अन्वयः—अथ विभुः पंच ह्रस्व अक्षर उच्चार समान समयं, उच्छिन्न क्रियं तुर्य शुक्लध्यानं अशिश्रियत्. ॥ ३० ॥

अर्थः—पछी प्रभुए पांच ह्रस्व अक्षरोना उच्चार जेटला समयवाळा उच्छिन्नक्रियनामना शुक्लध्यानना चोथा पायानो आश्रय कर्यो.

**क्षीणकर्मार्थकर्तव्यो विलीनक्लेशसंततिः । अनंतदर्शनज्ञानवीर्यानन्दो जगद्गुरुः ॥ ३१ ॥**

**ऊर्ध्वगो बन्धविध्वंसादेरण्डफलबीजवत् । ऋजुनैव पथा शिष्यैः साकं लोकाग्रमासदत् ॥ ३२ ॥ युग्मं ॥**

अन्वयः—क्षीण कर्म अर्थ कर्तव्यः, विलीन क्लेश संततिः, अनंत दर्शन, ज्ञान वीर्य आनंदः, जगत्गुरुः, ॥ ३१ ॥ बंध विध्वंसात् एरंड फल बीजवत् ऋजुना एव पथा ऊर्ध्वगः शिष्यैः साकं लोक अग्रं आसदत्. ॥ ३२ ॥ युग्मं ।

अर्थः—क्षीण थयेल छे कर्मोसंबंधि कार्य जेनुं, नष्ट थयेल छे क्लेशोनी परंपरा जेमनी, तथा अनंत दर्शन, अनंत ज्ञान, अने अनंत वीर्यना आनंदवाळा प्रभु, ॥ ३१ ॥ कर्मबंधन त्रुटी जवाथी एरंडफलना बीजनीपेठे सिद्धेज मार्गे उंचे चडताथका शिष्यो सहित लोकना अग्र भागमां (मोक्षमां) पहोंच्या. ॥ ३२ ॥ युग्मं ॥

**युग्मम् ॥ स्वामिना नारकेभ्योऽपि ददतानन्दवर्णिकाम् । महानन्दस्य बुभुजे स्वयं नवफली तदा ॥ ३३ ॥**

अन्वयः—तदा नारकेभ्यः अपि आनंद वर्णिकां ददता स्वामिना स्वयं महानंदस्य नव फली बुभुजे. ॥ ३३ ॥

अर्थः—ते वखते नारकना जीवोने पण आनंदनो नमुनो देता थका प्रभु पोते महान् आनंदना नवां फलोनी श्रेणि भोगववा लाग्या.

**मोहचेष्टामपि तदाक्रन्दं संक्रन्दनादयः । विभोर्वियोगे कुर्वन्तो न शोच्यत्वदशामगुः ॥ ३४ ॥**

अन्वयः—तदा विभोः वियोगे मोह चेष्टां आक्रंदं कुर्वतः संक्रंदन आद्यः अपि शोच्यत्व दशां न अगुः. ॥ ३४ ॥
अर्थः—ते समये प्रभुनो वियोग थतां मोहनी चेष्टारूप विलाप करता इंद्र आदिको पण निर्बलपणानी दशाने प्राप्त थया नही, ( अर्थात् तेओनां तेवां हृदयमाटे दुनीयामां निर्बलतानो अपवाद थयो नही. ) ॥ ३४ ॥

**जगद्बन्धुः कृपासिन्धुः स्वामिन्ख्यातोऽसि किं ततः । दत्वास्मभ्यं महादुःखं महानन्दं श्रितः स्वयम् ॥ ३५ ॥**

अन्वयः-(हे) स्वामिन्! (त्वं) जगत् बंधुः, कृपा सिंधुः ख्यातः असि ततः अस्मभ्यं महादुःखं दत्वा स्वयं महानंदं किं श्रितः?
अर्थः-हे स्वामी! आप जगत्‌ना बांधवतरीके, तथा दयाना महासागर तरीके प्रख्याति पामेला हता, तो पछी अमोने (आवुं आपना वियोगरूप) महान कष्ट आपीने तमोए पोते महान् आनंदमय मुक्तिनो आश्रय केम लीधो? ॥ ३५ ॥

**स्वर्गस्यापि नमस्यत्वं या निन्ये नाथ भूस्त्वया । विश्वाश्रुवारिधौ मङ्क्तुं त्वद्वियोगेऽद्य सेच्छति ॥ ३६ ॥**

अन्वयः-(हे) नाथ! या भूः त्वया स्वर्गस्य अपि नमस्यत्वं निन्ये, सा अद्य त्वद्वियोगे विश्व अश्रु वारिधौ मंक्तुं इच्छति.
अर्थः—हे स्वामी! जे पृथ्वीने आपे स्वर्गने पण नमवा लायक बनावी छे, ते पृथ्वी आजे आपनो वियोग थवाथी, जगतना आंसुओना महासागरमां डूबी मरवाने इच्छे छे. ॥ ३६ ॥

**धिगस्मान्रेणवोऽप्येते भान्ति धन्यतमाः प्रभो । अनुयान्तीव येऽद्य त्वामस्मन्निःश्वासपीडिताः ॥ ३७ ॥**

अन्वयः-(हे) प्रभो! अस्मान् धिक्? एते रेणवः अपि धन्यतमाः भांति, ये अस्मत् निःश्वास पीडिताः अद्य त्वां अनुयांति इव!

अर्थः-हे स्वामी! अमोने तो धिक्कारज छे, परंतु आ रजने पण वधारे धन्यवाद घटे छे, के जे अमारा निःश्वासथी पीडित थइने आजे जाणे (उडीने) आपनी पाछळ आवती होय नही! तेम लागे छे! ॥ ३७ ॥

**त्वद्वाचा दुग्धवर्षिण्या जनन्येव वियोगिनः । अतिबालस्य जगतो गतिः काद्य भविष्यति ॥ ३८ ॥**

अन्वयः—दुग्ध वर्षिण्या जनन्या इव त्वद्वाचा वियोगिनः अतिबालस्य जगतः अद्य का गतिः भविष्यति? ॥ ३८ ॥

अर्थः-दूध वरसावनारी माता सरखी आपनी वाणीना वियोगवाळा अतिबाल्य अवस्थावाळा आ जगतनी आजे (हवे) शुं गति थशे?

**धर्मदुग्धाब्धिचन्द्रेण केवलज्ञानभानुना । त्वया विना जगन्मोहध्वान्तात्कस्त्रायतां प्रभो ॥ ३९ ॥**

अन्वयः—(हे) प्रभो! धर्म दुग्ध अब्धि चंद्रेण, केवलज्ञान भानुना त्वया विना मोह ध्वांतात् जगत् कः त्रायतां? ॥ ३९ ॥

अर्थः—हे स्वामि! धर्मरूपी क्षीरसागरने ( वृद्धि पमाडवामाटे ) चंद्रसरखा, तथा केवलज्ञानरूपी सूर्यसरखा, एवा आपविना मोहरूपी अंधकारथी जगतनो (हवे) कोण बचाव करशे? ॥ ३९ ॥

**हहा महाधमतमा विश्वतारक नारकाः । प्रमोदं कलयामासुर्ये तनुं त्यजति त्वयि ॥ ४० ॥**

अन्वयः—(हे) विश्व तारक! त्वयि तनुं त्यजति हहा! ये महा अधमतमाः नारकाः, (ते अपि) प्रमोदं कलयामासुः. ॥ ४० ॥

अर्थः-हे जगतने तारनारा प्रभु! आपे शरीर छोडवाथी, अरेरे! जे नारकीओ अत्यंत दुःखमां पीडाइ रह्या हता, तेओए पण आनंदनो अनुभव मेळव्यो. ॥ ४० ॥

इत्यादिवाग्भिर्दलयन्हृदयान्यश्मनामपि । सुहृदेव रुदञ्छक्रः स्वहृदैव व्यबोध्यत ॥ ४१ ॥

अन्वयः-इत्यादि वाग्भिः रुदन् शक्रः अश्मनां अपि हृदयानि दलयन् सुहृदा इव स्व हृदा एव व्यबोध्यत. ॥ ४१ ॥

अर्थः-इत्यादिक वचनोवडे विलाप करतो इंद्र, पत्थरोना हृदयोने पण पिगळावतोथको, जाणे मित्रसरखा पोताना हृदयथीज (अंते) प्रतिबोध पाम्यो. ॥ ४१ ॥ सप्तभिः कुलकं ॥

आक्रन्दतोऽथ भूशक्रान्प्रबोध्य विबुधाधिपः । तत्कालकृत्ये त्रिदशानादिदेशाभियोगिकान् ॥ ४२ ॥

अन्वयः—अथ आक्रंदतः भूशक्रान् प्रबोध्य विबुध अधिपः तत्काल कृते आभियोगिकान् त्रिदशान् आदिदेश. ॥ ४२ ॥

अर्थः-पछी विलाप करता एवा (सर्व) राजाओने प्रतिबोध आपीने इंद्रे ते वखते करवा योग्य कार्यमाटे आभियोगिक देवोने हुकम कर्यो.

वनादानीय गोशीर्षचन्दनैधांसि नन्दनात् । ऐन्द्र्यां ककुभि तैर्वृत्ता नाथाय रचिता चिता ॥ ४३ ॥

अन्वयः—तैः नंदनात् वनात् गोशीर्ष चंदन एधांसि आनीय ऐंद्र्यां दिशि नाथाय वृत्ता चिता रचिता. ॥ ४३ ॥

अर्थः-तेओए नंदन वनमांथी गोशीर्ष चंदनना काष्टो लावीने पूर्व दिशामां प्रभुना ( शरीरनो अग्निसंस्कार करवामाटे ) गोळ आकरनी चिता बनावी. ॥ ४३ ॥

ऐक्ष्वाकवेभ्यः साधुभ्यस्त्रिकोणा दक्षिणादिशि । पश्चिमायां चतुःकोणान्येभ्यस्तु विहिता चिता ॥ ४४ ॥

अन्वयः—ऐक्ष्वाकवेभ्यः साधुभ्यः दक्षिणा दिशि त्रिकोणा, तु अन्येभ्यः पश्चिमायां चतुः कोणा चिता विहिता. ॥ ४४

अर्थः—वळी इक्ष्वाकुवंशना साधुओनां शरीरोमाटे दक्षिणदिशामां त्रिकोण चिता बनावी, तथा बीजा साधुओनां शरीरोमाटे पश्चिमदिशामां चोखुणी चिता बनावी. ॥ ४४ ॥

**स्नानं क्षीराम्बुधेर्नीरर्लेपं गोशीर्षचन्दनैः । शक्रः स्वामितनोश्चक्रेऽन्येषामन्येऽथ नाकिनः ॥ ४५ ॥**

अन्वयः—अथ शक्रः स्वामितनोः क्षीर अंबुधेः नीरैः स्नानं, गोशीर्ष चंदनैः लेपं चक्रे, अन्ये नाकिनः अन्येषां. ॥ ४५ ॥

अर्थः—पछी इंद्रे प्रभुना शरीरने क्षीरसमुद्रना जलथी स्नान कराव्युं, तथा गोशीर्षचंदनवडे तेपर विलेपन कर्युं. अने बीजा देवोए बीजा मुनिओनां शरीरोने तेम कर्युं. ॥ ४५ ॥

**देवदूष्येण देवेन्द्रो हंसाङ्केनाध्यवासयत् । जिनाङ्गं सुमनोरत्नभूषणैरप्यभूषयत् ॥ ४६ ॥**

अन्वयः—देवेंद्रः हंस अंकेन देव दूष्येण जिन अंगं अध्यवासयत्, सुमनः रत्न भूषणैः अपि अभूषयत्. ॥ ४६ ॥

अर्थः—पछी देवेंद्रे हंसना चिह्नवाळां देवदूष्य वस्त्रवडे प्रभुना शरीरने आच्छादित कर्युं, तथा पुष्पो अने रत्नोनां आभूषणोथी पण शणगार्युं. ॥ ४६ ॥

**मूर्तिमद्भिः प्रभोर्भक्तित्रैविध्यसुकृतैरिव । रत्नैश्च रचयांचक्रुस्त्रिदशाः शिबिकात्रयम् ॥ ४७ ॥**

अन्वयः—च त्रिदशाः प्रभोः मूर्तिमद्भिः भक्ति त्रैविध्य सुकृतैः इव, रत्नैः शिबिका त्रयं रचयांचक्रुः. ॥ ४७ ॥

अर्थः—पछी ते देवोए प्रभुनी देहधारी भक्तिना त्रण प्रकारना पुण्यो सरखां रत्नोवडे त्रण शिबिकाओ बनावी. ॥ ४७ ॥

**नत्वा कृत्वा प्रभुं मूर्ध्नि शिबिकायां हरिर्न्यधात् । अन्याञ्छिबिकयोः साधूञ्छक्रवच्चिक्षिपुः सुराः ॥ ४८ ॥**

अन्वयः—हरिः प्रभुं नत्वा मूर्ध्नि कृत्वा शिबिकायां न्यधात्, अन्यान् साधून् शक्रवत् सुराः शिबिकयोः चिक्षिपुः. ॥ ४८ ॥

अर्थः—पछी इंद्रे प्रभुनां शरीरने नमीने, तथा मस्तकपर लेइने ते शिबिकामां पधराव्युं, तथा बीजा मुनिओनां शरीरोने इंद्रनीपेठे (बीजा) देवोए ते बन्ने शिबिकाओमां पधराव्यां. ॥ ४८ ॥

**सहस्रवाह्यां तीर्थेशशिबिकामुद्दधौ हरिः । ऊहे सुरसहस्राभ्यां तच्चान्यच्छिबिकाद्वयम् ॥ ४९ ॥**

अन्वयः—सहस्र वाह्यां तीर्थेश शिबिकां हरिः उद्दधौ, च तत् अन्य शिबिका द्वयं सुर सहस्राभ्यां ऊहे. ॥ ४९ ॥

अर्थः—एकहजार देवोथी उपडी शके एवी ते तीर्थंकरप्रभुना शरीरवाळी शिबिका इंद्रे उपाडी, अने ते बीजी बन्ने शिबिकाओ बीजा बे हजार देवोए उंचकी. ॥ ४९ ॥

**सुरस्त्रीषु ददानासु परितस्तालरासकान् । पुरः सुपर्वगन्धर्वगणे तूर्यत्रयोद्यते ॥ ५० ॥**

अन्वयः—सुर स्त्रीषु परितः ताल रासकान् ददानासु, पुरः सुपर्व गंधर्व गणे तूर्य त्रय उद्यते, ॥ ५० ॥

अर्थः—(ते वखते) देवांगनाओ (ते शिबिकाओनी) आसपास तालीओ दइ रास रमवा लागी, तथा आगळना भागमां देवगंधर्वोना समूहो त्रणे प्रकारनां वाजित्रो वगाडवा लाग्या, ॥ ५० ॥

**कुर्वत्सु त्रिदशेष्वग्रे चीरतोरणधोरणीः । यक्षकर्दमविच्छर्दान्पुरः कुर्वत्सु केषुचित् ॥ ५१ ॥**

अन्वयः–केषुचित् त्रिदशेषु अग्रे चीर तोरण धोरणीः कुर्वत्सु, पुरः यक्षकर्दम विच्छर्दान् कुर्वत्सु, ॥ ५१ ॥

अर्थः–वळी केटलाक देवो अगाडीना भागमां वस्त्रोनां तोरणोनी श्रेणिओ बांधवा लाग्या, तथा आगळ आगळ केसरना रसनो छटकाव करवा लाग्या, ॥ ५१ ॥

**केषुचिद्विदधानेषु धूपोत्क्षेपं पुरः पुरः । विभोरुपरि बिभ्रत्सु शुभ्रच्छत्राणि केषुचित् ॥ ५२ ॥**

अन्वयः–केषुचित् पुरः पुरः धूप उत्क्षेपं विदधानेषु, केषुचित् विभोः उपरि शुभ्र च्छत्राणि बिभ्रत्सु, ॥ ५२ ॥

अर्थः–(वळी) केटलाक देवो आगळ आगळ धूप उखेववा लाग्या, तथा केटलाक प्रभुना ( शरीरवाळी ते शिबिकापर ) श्वेत छत्रो धारण करवा लाग्या. ॥ ५२ ॥

**शिबिकां परि वर्षत्सु केषुचित्कुसुमस्त्रजः । हन्त्रीं निःशेषदोषाणां शेषां गृह्णत्सु केषुचित् ॥ ५३ ॥**

अन्वयः–केषुचित् शिबिकां परि कुसुम स्त्रजः वर्षत्सु, केषुचित् निःशेष दोषाणां हंत्रीं शेषां गृह्णत्सु, ॥ ५३ ॥

अर्थ–(वळी) केटलाक देवो ते शिबिकानी आसपास पुष्पमालाओनो वरसाद वरसावता हता. तथा केटलाक देवो सर्व दोषोने हणनारी शेषा लेता हता, ॥ ५३ ॥

नानाविधां शुचश्चेष्टां स्पष्टयन्तु च केषुचित् । हरिः सुराश्च शिबिकात्रयं निन्युश्चिताः प्रति ॥ ५४ ॥

अन्वयः–च केषुचित् नानाविधां शुचः चेष्टां स्पष्टयत्सु, हरिः च सुराः शिबिका त्रयं चिताः प्रति निन्युः. ॥ ५४ ॥

अर्थः–वळी केटलाक देवो विविध प्रकारनी शोकनी चेष्टाने प्रकट करता हता, एरीते ते इंद्र तथा देवो ते त्रणे शिबिकाओने ते चिताओपासे लेइ गया. ॥ ५४ ॥ पंचभिः कुलकं ॥

चितायामुचितज्ञोऽथ पूर्वस्यां पूर्वदिक्पतिः । न्यधात्प्रभुतनुं साधूनन्ये देवाश्चिताद्वये ॥ ५५ ॥

अन्वयः–अथ उचितज्ञः पूर्वदिक् पतिः पूर्वस्यां चितायां प्रभु तनुं न्यधात्, अन्ये देवाः चिता द्वये साधून्. ॥ ५५ ॥

अर्थः–पछी योग्यताने जाणनारा पूर्वदिशाना स्वामी सौधर्मेंद्रे पूर्वदिशा तरफनी चितामां प्रभुनुं शरीर पधराव्युं, अने बीजा देवोए बीजी बे चिताओमां (बीजा) साधुओनां शरीरो पधराव्यां. ॥ ५५ ॥

अग्निरग्निकुमारद्राग्वायुर्वायुकुमारकैः । चितासु चिक्षिपे पूरः कर्पूराणां सुरः परैः ॥ ५६ ॥

अन्वयः–द्राक् अग्नि कुमारैः अग्निः, वायु कुमारैः वायुः, परैः सुरैः कर्पूराणां पूरः चितासु चिक्षिपे. ॥ ५६ ॥

अर्थः–( पछी त्यां ) तुरतज अग्निकुमार देवोए अग्नि विकुर्व्यो, वायुकुमार देवोए वायु विकुर्व्यो, तथा बीजा देवोए ते चिताओमां कपूरनो समूह नाख्यो. ॥ ५६ ॥

चितात्रयस्य तस्योच्चैः प्रसृता धूमवल्लयः । दधुः सदुःखद्योमुक्तवेणिपाशत्रयोपमाम् ॥ ५७ ॥

अन्वयः–तस्य चिता त्रयस्य उच्चैः प्रसृता धूम वल्लयः सदुःख द्यो मुक्त वेणि पाश त्रय उपमां दधुः. ॥ ५७ ॥

अर्थः–ते त्रणे चिताओमांथी उंचे उछळेली धुमाडाओनी श्रेणिओ, दुःख पामेली आकाशरूपी (स्त्रीए छूटी मूकेली) त्रण वेणिपाशोनी उपमाने धारण करती हती. ॥ ५७ ॥

अभ्रंलिहमहाकीलाचक्रवालेन ताश्चिताः । मूर्ता लोकत्रयीशोककृशानव इवाज्वलन् ॥ ५८ ॥

अन्वयः–अभ्रं लिह महा कीला चक्रवालेन ताः चिताः, मूर्ताः लोक त्रयी शोक कृशानवः इव अज्वलन्. ॥ ५८ ॥

अर्थः–छेक आकाशने अडती म्होटी म्होटी ज्वालाओना समूहवडे करीने ते त्रणे चिताओ त्रणे लोकना देहधारी शोकरूपी अग्निओनीपेठे बळवा लागी. ॥ ५८ ॥

दग्धेषु वह्निकीलाभिरस्थिभ्योऽन्येषु धातुषु । चिता व्यध्यापयन्मेघकुमाराः क्षीरधेर्जलैः ॥ ५९ ॥

अन्वयः–अस्थिभ्यः अन्येषु धातुषु वह्नि कीलाभिः दग्धेषु मेघ कुमाराः क्षीरधेः जलैः चिताः व्यध्यापयन. ॥ ५९ ॥

अर्थः—हाडकांओ शिवायनी बीजी धातुओ अग्निनी ज्वालाओथी बळीगये छते, मेघकुमारोए क्षीरसमुद्रना जलथी ते चिताओने ठारी नाखी. ॥ ५९ ॥

अधिमाणवकस्तम्भं वृत्तवज्रसमुद्गके । न्यस्य पूजयितुं स्वस्य जयमङ्गलहेतवे ॥ ६० ॥

अथोपरितनीं शक्रः श्रेयोबीजमिवाग्रहीत् । जिनेन्दोर्दक्षिणां दंष्ट्रामीशानेन्द्रस्त्वदक्षिणाम् ॥ ६१ ॥युग्मं

अन्वयः—अथ इंद्रः आधे माणवक स्तंभे वृत्त वज्र समुद्गके न्यस्य स्वस्य जयमंगल हेतवे पूजयितुं, ॥ ६० ॥ श्रेयः बीजं इव उपरितनीं जिनेंदोः दक्षिणां दंष्ट्रां अग्रहीत्, तु इशानेंद्रः अदक्षिणां, ॥ ६१ ॥ युग्मं ॥

अर्थः—पछी सौधर्मेंद्रे माणवकस्तंभनी अंदर राखेला वज्रना गोळाकार दाबडामां राखीने, पोताना विजय मंगल माटे पूजवा-सारुं, ॥ ६० ॥ कल्याणमा बीज सरखी प्रभुनी जमणी तरफनी दाढा ग्रहण करी, तथा इशानेंद्रे डाबी तरफनी दाढा ग्रहण करी.

**जगृहेऽधस्तनीं दंष्ट्रामवामां चमरेश्वरः । बलिस्तु वामामन्ये तु शक्रा दन्तान्यथोचितम् ॥ ६२ ॥**

अन्वयः—चमर ईश्वरः अधस्तनीं अवामां दंष्ट्रां जगृहे, तु बलिः वामां, तु अन्ये शक्राः यथोचितान् दंतान्, ॥ ६२ ॥

अर्थः—(पछी) चमरेंद्रे नीचली जमणी दाढा ग्रहण करी, अने बलींद्रे नीचली डाबी दाढा ग्रहण करी, तथा बीजा इंद्रोए यथायो-ग्यरीते दांतो ग्रहण कर्या. ॥ ६२ ॥

**अगृह्णन्कीकसकणान्सुपर्वाणः परे प्रभोः । भस्मलेशान्नरेशास्तद्भूरेणूंश्चापरे नराः ॥ ६३ ॥**

अन्वयः—परे सुपर्वाणः प्रभोः कीकस कणान् अगृह्णन्, नरेशाः भस्मलेशान्, च अपरे नराः तत् भू रेणून्. ॥ ६३ ॥

अर्थः—वळी बीजा देवोओए प्रभुना शरीरमा हाडकांओना टुकडा ग्रहण कर्या, तथा राजाओए तेनी राखना अंशो लीधा, अने बीजा लोकोए ते जमीननी धूली ग्रहण करी. ॥ ६३ ॥

**वेणूनां ग्रहणेनैव मर्त्यैः खाते कृतेऽद्भुते । रत्नस्तूपं व्यधुः शक्राश्चितास्थाने जिनेशितुः ॥ ६४ ॥**

अन्वयः-रेणूनां ग्रहणेन एव मर्त्यः अद्भुते खाते कृते शक्राः जिनेशितुः चिता स्थाने रत्न स्तूपं व्यधुः. ॥ ६४ ॥

अर्थः-ते धूली लेवाथीज लोकोए त्यां म्होटो खाडो करी देवाथी इंद्रोए ते प्रभुनी चितानि जगोपर रत्नोनो थूभ कर्यो. ॥ ६४ ॥

**कौमारेऽष्टादशाद्वानां लक्षाण्यथ विभोर्व्रते । चतुःपञ्चाशदित्यायुर्द्वासप्तत्यब्दलक्ष्यभूत् ॥ ६५ ॥**

अन्वयः-अथ विभोः कौमारे अब्दानां अष्टादश लक्षाणि, व्रते चतुः पंचाशत्, इति द्वासप्तति अब्द लक्षी आयुः अभूत्. ६५

अर्थः—हवे प्रभुना कुमार अवस्थामां अढार लाख वर्षो वीत्यां, तथा दीक्षामां चोपन लाख वर्षो वीत्यां, एम सर्व मळी प्रभुनुं बहोतेर लाख वर्षोनुं आयु हतुं. ॥ ३५ ॥

**श्रेयांसनिर्वृतेरासीद्वासुपूज्यस्य निर्वृतिः । सागरेषु व्यतीतेषु चतुःपञ्चाशति प्रभोः ॥ ६६ ॥**

अन्वयः—श्रीश्रेयांस निवृत्तेः चतुः पंचाशति सागरेषु व्यतीतेषु वासुपूज्यस्य प्रभोः निर्वृतिः आसीत्. ॥ ६६ ॥

अर्थः—श्रीश्रेयांसप्रभु मोक्षे गयाबाद चोपन सागरोपम वीते छते श्रीवासुपूज्य प्रभुनुं निर्वाण थयुं. ॥ ६६ ॥

**इति प्रशस्तिमालिख्य रत्नस्तूपे जगत्पतेः चेलुर्निर्वाणकल्याणकारिणः पविपाणयः । ६७ । त्रिभिर्विशेषकं**

अन्वयः—इति रत्न स्तूपे जगत् पतेः प्रशस्ति आलिख्य निर्वाण कल्याण कारिणः पविपाणयः चेलुः. ॥ ६७ ॥

अर्थः—एरीते ते रत्नोना थूभपर प्रभुनी प्रशस्ति लखीने प्रभुनुं निर्वाण कल्याणक करनारा ते इंद्रो (त्यांथी) चाली निकळया.

**लब्धिर्महोदयपदस्य बभूव भर्तुरित्युल्लसद्विशदसंमदपूरपूर्णाः । नन्दीश्वरे ध्रुवजिनेश्वरमन्दिरेषु, यात्रां**

पवित्ररुचयोऽष्टदिनानि कृत्वा ॥ ६८ ॥

अन्वयः—भर्तुः महोदय पदस्य लब्धिः बभूव, इति उल्लसत् विशद संमद पूर पूर्णाः पवित्र रुचयः नंदीश्वरे ध्रुव जिनेश्वर मंदिरेषु अष्ट दिनानि यात्रां कृत्वा, ॥ ६८ ॥

अर्थः—प्रभुने (हवे) मोक्षपदनी प्राप्ति थइ छे, एम विचारी उल्लसायमान थता निर्मल हर्षना समूहथी भरेला, तथा पवित्र रुचिवाळा (इंद्रो) नंदीश्वरद्वीपमां शाश्वतां जिनमंदिरोमां आठ दिवसो सुधी यात्रा करीने, (अठ्ठाइ महोत्सव करीने), ॥ ६८ ॥

श्रीवासुपूज्यचरितं परिपूर्णमेतदाह्लादनं सततमन्तरनुस्मरन्तः । रोमाञ्चरम्यमहसः सह सर्वदेवैः, स्थानं ययुर्निजनिजं जयिनः सुरेन्द्राः ॥ ६९ ॥ युग्मम् ॥

अन्वयः—सततं आह्लादनं एतत् परिपूर्णं श्रीवासुपूज्य चरितं अंतः अनुस्मरंतः, रोमांच रम्य महसः जयिनः सुरेंद्राः सर्व देवैः सह निज निजं स्थानं ययुः. ॥ ६९ ॥ युग्मं ॥

अर्थः—हमेशां (हृदयमां) आनंद उपजावनारां, आ संपूर्ण थयेलां श्रीवासुपूज्य प्रभुना चरित्रनुं हृदयनी अंदर स्मरण करताथका, रोमांचोवडे मनोहर तेजवाळा, तथा विजय पामेला (ते सघळा) इंद्रो सर्व देवोनी साथे पोत पोताने स्थानके गया. ॥ ६९ ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरित आह्लादनाङ्के महाकाव्ये महोदयलब्धिवर्णनो नाम चतुर्थः सर्गः ॥

## ॥ अथ मूलग्रंथकर्तुः प्रशस्तिः ॥

॥ एरीते श्रीमन् आह्लादननामना दंडाधिपतिए प्रार्थना करेला, तथा श्रीविजयसिंहसूरिजीना शिष्य श्रीवर्धमानसूरिजीए रचेला श्रीवासुज्यचरित्रनामना आह्लादनना चिह्नवाळां महाकाव्यमां महोदयलब्धि (मोक्षप्राप्ति) ना वर्णन नामनो चोथो सर्ग समाप्त थयो.

**श्रीनागेन्द्रमुनीन्द्रगच्छतिलकः श्रीविरसूरिर्बभौ यस्माद्बोधमवाप्य मण्डलपतिर्जज्ञे यतिश्चच्चिगः।**
**तच्छिष्यः परमारवंशविशदः श्रीवर्धमानप्रभु–स्तत्पट्टोदयपर्वतैकतरणिः श्रीरामसूरिस्ततः ॥ १ ॥**

अन्वयः—श्रीनागेंद्र मुनींद्र गच्छ तिलकः श्रीवीरसूरिः बभौ, यस्मात् बोधं अवाप्य मंडल पतिः चच्चिगः यतिः जज्ञे, तत् शिष्यः परमार वंश विशदः श्रीवर्धमान प्रभुः, ततः तत् पट्ट उदय पर्वत एक तरणिः श्रीरामसूरिः. ॥ १ ॥

अर्थः—श्रीनागेंद्र मुनींद्रना गच्छमां तिलकसरखा श्रीवीरसूरिनामे आचार्य शोभता हता, के जेमनी पसेथी जैनधर्मनो प्रतिबोध पामीने मंडलेश्वर चच्चिगनामना राजा मुनि (जैनसाधु) थया हता. तेमना शिष्य तथा परमारवंशने दीपावनारा श्रीवर्धमानसूरि-नामे आचार्य थया, पछी तेमनी पाटरूपी उदयाचलपर्वतपर एक सूर्य सरखा श्री रामसूरिनामे आचार्य थया. ॥ १ ॥

**चन्द्रः कुवलयोद्बोधे चन्द्रसूरिरभूदथ। ततः शमसुधाम्भोधिर्देवसूरिर्मुनीश्वरः ॥ २ ॥**

अन्वयः—अथ कुवलय उद्बोधे चंद्रः चंद्र सूरिः अभूत्, ततः शम सुधा अंभोधिः देवसूरिः मुनि इश्वरः. ॥ २ ॥

अर्थः—त्यारपछी पृथ्वीना वलयरूपी (चंद्रविकासी कमलने) प्रफुल्लित करवामां चंद्रसरखा श्रीचंद्रसूरिनामे आचार्य (तेमना शिष्य)

थया, अने त्यारपछी शांतिरूपी अमृतना महासागरसरखा श्री देवसूरिनामना आचार्य थया. ॥ २ ॥

**बभूवाभयदेवाख्यः सूरिर्भूरिगुणस्ततः । श्रीहेमसूरिर्यद्वयाख्यां व्याचख्यौ भूभुजा समम् ॥ ३ ॥**

अन्वयः—ततः भूरि गुणः अभयदेव आख्यः सूरिः बभूव, यत् व्याख्यां भूभुजा समं श्रीहेमसूरिः व्याचख्यौ. ॥ ३ ॥

अर्थः—त्यारपछी घणा गुणोवाळा श्रीअभयदेवसूरिनामना आचार्य थया, के जेमनी प्रशंसा राजानी साथे श्रीमान् हेमचंद्रसूरिजीए करेली हती. ॥ ३ ॥

**श्रीमान्धनेश्वरः सूरिरथाजनि मुनिप्रभुः । रूपे वचसि च प्राप जयपत्रं जनेषु यः ॥ ४ ॥**

अन्वयः—अथ मुनि प्रभुः श्रीमान् धनेश्वरः सूरिः अजनि, यः जनेषु रूपे च वचसि जयपत्रं प्राप. ॥ ४ ॥

अर्थः—त्यार पछी मुनिओमां श्रेष्ठ श्रीमान् धनेश्वरसूरि थया, के जेमणे लोकोमां रूपना संबंधमां तथा वाणीना संबंधमां जयपताका मेळवी हती. ॥ ४ ॥

**गुरुर्विजयसिंहोऽभूद्यश्चक्रे प्रियमेलकम् । सर्वत्र स्वसरस्वत्या विद्वज्जनमनोऽम्बुधौ ॥ ५ ॥**

अन्वयः—विजयसिंह गुरुः अभूत्, यः सर्वत्र विद्वत् जन मनः अंबुधौ स्व सरस्वत्याः प्रिय मेलकं चक्रे. ॥ ५ ॥

अर्थ —(त्यारबाद तेमना शिष्य) श्रीविजयसिंह सूरीश्वर थया, के जेमणे सर्व जगोए विद्वान मनुष्योना मनरूपी महासागरमां पोतानी वाणीरूपी नदीनो प्रिय मेलाप (संगम) कराव्यो. ॥ ५ ॥

निस्तन्द्रोऽजनि देवेन्द्रसूरिर्यन्मुखमण्डपे । विललास कवित्वश्रीः साकं वक्तृत्वसंपदा ॥ ६ ॥

अन्वयः-निस्तंद्रः देवेंद्र सूरिः जज्ञे, यत् मुख मंडपे वक्तृत्व संपदा साकं कवित्व श्रीः विललास. ॥ ६ ॥

अर्थः-तेमनी पाटे महाविद्वान श्रीदेवेंद्रसूरिनामना आचार्य थया, के जेमना मुखरूपी मंडपमां वाचालपणानी संपत्ति सहित कविपणानी लक्ष्मी विलास करती हती. ॥ ६ ॥

सूरेर्विजयसिंहस्य शिष्यो गुर्वाज्ञया ततः । सूरिः श्रीवर्धमानोऽस्मिन्गच्छे यामिकतां दधौ ॥ ७ ॥

अन्वयः—तत. विजयसिंहस्य सूरेः शिष्यः श्रीवर्धमानः सूरिः गुरु आज्ञया अस्मिन् गच्छे यामिकतां दधौ. ॥ ७ ॥

अर्थ -पछी (उपर वर्णवेला) श्रीविजयसिंहसूरिजीना शिष्य श्रीवर्धमानसूरि (आ श्रीवासुपूज्यचरित्र महाकाव्यना कर्ता) गुरुमहाराजनी आज्ञाथी आ नागेंद्रगच्छमां देखरेख राखनारा (आचार्य पदधारी) हता. ॥ ७ ॥

उदयाद्रिरिव श्रीमान्स नन्द्यादुदयप्रभुः । यत्रोदयी वचोभानुर्भव्याम्भोजानि भासयेत् ॥ ८ ॥

अन्वयः-उदयाद्रिः इव श्रीमान् उदयप्रभुः नंद्यात्, यत्र उदयी वचः भानुः भव्य अंभोजानि भासयेत्. ॥ ८ ॥

अर्थः—उदयाचल पर्वतसरखा श्रीमान् उदयप्रभसूरि समृद्धि पामो ? के जेमनाथी उदय पामेलो वाणीरूपी सूर्य भव्यजनोरूपी कमलोने विकस्वर करतो हतो. ॥ ८ ॥

अस्मिन्गुरुक्रमे भक्तः श्रीगल्लककुलेऽभवत् । वाधूर्व्याधूतदुष्कर्मा धर्माम्बुधिविधुः सुधीः ॥ ९ ॥

अन्वयः—अस्मिन् गुरु क्रमे भक्तः, व्याधूत दुष्कर्मा, धर्म अंबुधि विधुः, सुधीः, श्रीगल्लक कुले वाधूः अभवत्. ॥ ९ ॥

अर्थः—आ नागेंद्रगच्छनी गुरुपरंपरानो भक्त, पापोने दूर करनारो, धर्मरूपी महासागरनी वृद्धि करवामां चंद्रसरखो, तथा उत्तम बुद्धिवाळो श्रीगाल्हा वंशमां (गोत्रमां) वाधूनामे (श्रावक) हतो. ॥ ९ ॥

**योऽकारयन्महावीरचैत्यं संगमखेटके । तस्मै हलशतक्षोणीं चतुर्वाटीयुतां ददौ ॥ १० ॥**

अन्वयः—यः संगम खेटके महावीर चैत्यं अकारयत्, तस्मै चतुर्वाटी युतां हल शत क्षोणीं ददौ. ॥ १० ॥

अर्थः—के जेणे संगमखेटनामना गाममां श्रीमहावीरप्रभुनु जिनमंदिर बंधाव्युं हतुं, तथा ते मंदिरना खर्चना निर्वाहमाटे तेणे चार वाडीओ सहित एकसो हल (विघां) जेटली जमीन आपी हती ॥ १० ॥

**तद्भूरभूदघोन्मर्दी कपर्दी येन कारितम् । चैत्यं युगादिदेवस्य ग्रामे वटसराभिधे ॥ ११ ॥**

अन्वयः—अघ उन्मर्दी कपर्दी तद्भूः अभूत्, येन वटसर अभिधे ग्रामे युगादि देवस्य चैत्यं कारितं. ॥ ११ ॥

अर्थः— पापनो नाश करनारो तेनो कपर्दीनामे पुत्र थयो, के जेणे वटसरनामना गाममां श्रीयुगादिदेवप्रभुनुं (श्रीऋषभदेव प्रभुनुं) जिनमंदिर बंधाव्युं ॥ ११ ॥

**तत्पुत्र आम्रदेवोऽभूदाम्रवन्मङ्गलास्पदम् । राणुका गेहिनी तस्य पुण्यश्रीरिव देहिनो ॥ १२ ॥**

अन्वयः—आम्रवत् मंगल आस्पदं तत्पुत्रः आम्रदेव अभूत्, तस्य देहिनी पुण्यश्रीः इव राणुका गेहिनी. ॥ १२ ॥

अर्थः—पछी आंबानीपेठे मंगलिकना स्थानकसरखो ते कपर्दीनो आम्रदेवनामे पुत्र थयो, तथा तेने शरीरधारी पुण्यलक्ष्मीसरखी राणुकानामनी स्त्री हती. ॥ १२ ॥

**तत्सूनुर्देवचन्द्रोऽभून्निस्तन्द्रो धर्मकर्मणि । पद्मिनी पद्मिनीवास्य प्रिया शीलश्रियो गृहम् ॥ १३ ॥**

अन्वयः— धर्म कर्मणि निस्तंद्रः देवचंद्रः तत् सूनुः अभूत्, अस्य शील श्रियः गृहं पद्मिनी इव पद्मिनी प्रिया. ॥ १३ ॥

अर्थः—( पछी ) धर्मकार्योमां उद्यमी, एवो देवचंद्रनामे ते आम्रदेवनो पुत्र थयो, अने तेने शीलरूपी लक्ष्मीनां स्थान कमलिनी सरखी पद्मिनीनामे स्त्री हती. ॥ १३ ॥

**चत्वारो जज्ञिरे विश्वनन्दना नन्दनास्तयोः । भव्यजीवमनःशुद्धयोर्धर्मभेदा इवाङ्गिनः ॥ १४ ॥**

अन्वयः—तयोः विश्वनंदनाः, भव्य जीव मनः शुद्धयोः अंगिनः धर्म भेदाः इव चत्वारः नंदनाः जज्ञिरे. ॥ १४ ॥

अर्थः—तेओने जगतने आनंद आपनारा, भव्य जीव अने मननी शुद्धिना जाणे देहधारी धर्मना भेदो होय नही! एवा चार पुत्रो थया हता. ॥ १४ ॥

**तेषु ज्येष्ठोऽजनि श्रीमानम्बडः सचिवाग्रणीः । अद्वितीयो विवेकेन द्वितीयो जह्णस्ततः ॥ १५ ॥**

अन्वयः— तेषु ज्येष्ठः सचिव अग्रणीः श्रीमान् अंबडः अजनि, ततः विवेकेन अद्वितीयः द्वितीयः जह्णः. ॥ १५ ॥

अर्थः—तेओमां म्होटो, तथा ( राजाना ) मंत्रीओमां अग्रेसर श्रीमान् अंबडनामनो हतो, तथा अनुपम विवेकवाळो बीजो जह्ण

(जड्डण) नामनो पुत्र हतो. ॥ १५ ॥

**पश्चादाह्लादनो जातिमण्डनं दण्डनायकः । मन्त्री धर्मधुराधुर्यस्तुर्यः प्रह्लादनः पुनः ॥ १६ ॥**

अन्वयः—पश्चात् जाति मंडनः, दंड नायकः आह्लादनः, पुनः तुर्यः धर्म धुरा धुर्यः प्रह्लादनः मंत्री. ॥ १६ ॥

अर्थः—ते पछी (पोतानी) ज्ञातिने शोभावनारो, तथा दंडनायकनी (कोट्टपालनी) पदवीने धारण करनारो (त्रीजो) आह्लादननामे पुत्र हतो, अने चोथो धर्मधुरंधर प्रह्लादननामनो मंत्रीपदने धारण करनारो पुत्र हतो. ॥ १६ ॥

**ज्येष्ठे स्वर्गश्रियं प्राप्ते श्रीमदम्बडमन्त्रिणि । विशेषाद्धर्मधुर्यत्वमाह्लादनः सुधीर्दधौ ॥ १७ ॥**

अन्वयः—ज्येष्ठे अंबड मंत्रिणि स्वर्ग श्रियं प्राप्ते, सुधीः आह्लादनः विशेषात् धर्म धुर्यत्वं दधौ. ॥ १७ ॥

अर्थः—(तेओमांथी) म्होटो अंबडमंत्री स्वर्गलक्ष्मीने प्राप्त थयाबाद उत्तम बुद्धिवाळो आह्लादन विशेष प्रकारे धार्मिक कार्योमां अग्रेसरपणुं धारण करवा लाग्यो. ॥ १७ ॥

**यत्कीर्तिव्रततिः स्थारापद्रस्थानकसंभवा । न्यायधर्मामृतैः सिक्ता विस्तृता विश्वमण्डपे ॥ १८ ॥**

अन्वयः—थारापद्र स्थानक संभवा यत् कीर्ति व्रततिः न्याय धर्म अमृतैः सिक्ता विश्व मंडपे विस्तृता. ॥ १८ ॥

अर्थः—थारापद्र (थराद) नामना गाममां उत्पन्न थयेली जे आह्लादन दंडनायकनी कीर्ति रूपी वेलडी, न्याय अने धर्मथी सींचाइने जगतरूपी मंडपपर विस्तार पामी हती. ॥ १८ ॥

यः श्रीसत्यपुरे वीरप्रासादे नाभिनन्दनम् । थारापद्रे च नाभेयचैत्ये श्रीपार्श्वनायकम् ॥ १९ ॥
तथा चन्द्रप्रभस्वामिसीमन्धरयुगन्धरान् । अम्बिकाभारतीमूर्तीर्दिव्यस्फूर्तीर्व्यधापयत् ॥ २० ॥ युग्मं ॥

अन्वयः—यः श्रीसत्यपुरे वीर प्रासादे नाभिनंदनं, च थारापद्रे नाभेय चैत्ये श्रीपार्श्वनायकं, ॥ १९ ॥ तथा चंद्रप्रभस्वामि सीमंधर युगंधरान्, दिव्य स्फूर्तीः अंबिका भारती मूर्तीः व्यधापयत् ॥ २० ॥ युग्मं ॥

अर्थः— जे आ आह्लादननामना दंडपतिए श्रीसत्यपुरमां ( साचोरनगरमां ) श्रीवीरप्रभुना प्रासादमां श्रीऋषभदेवप्रभुनी, तथा थारापद्रनामना नगरमां ( थरादमां ) श्रीऋषभदेवप्रभुना प्रासादमां श्रीपार्श्वनाथ प्रभुनी, ॥ १९ ॥ तथा श्रीचंद्रप्रभस्वामीनी, सीमंधरस्वामिनी अने युगंधरप्रभुनी प्रतिमाओ, तथा दिव्य तेजवाळी अंबिका अने सरस्वतीनी मूर्ति स्थापन करी हती. ॥ २० ॥ युग्मं ॥

नाभिपद्मे यथात्मानं योगी ध्यायत्यहर्निशम् । पद्मकोशे तथा योऽयमादिनाथं स्वकारितम् ॥ २१ ॥

अन्वयः—योगी यथा अहर्निशं नाभिपद्मे आत्मानं ध्यायति. तथा यः अयं पद्म कोशे स्व कारितं आदिनाथं. ॥ २१ ॥

अर्थः—योगी जेम हमेशां नाभिकमलमां ( रहेला ) आत्मानुं ध्यान धरे छे, तेम जे आ आह्लादन दंडनायक कमलकोशपर पोते करावेली श्रीऋषभदेवप्रभुनी मूर्तिनुं ध्यान धरता हता. ॥ २१ ॥

ग्रामे वटसरे नाम्नि तथा संगमखेटके । येनोद्दध्रे समं पूर्वैश्चैत्यद्वन्द्वं जिनान्वितम् ॥ २२ ॥

अन्वयः-येन पूर्वैः समं वटसरे नाम्नि ग्रामे, तथा संगम खेटके जिन अन्वितं चैत्य द्वयं उद्दध्रे. । २२ ॥

अर्थः-वळी जे आह्लादन दंडनायके पूर्वे कहेलां चैत्यो सहित वटसरनामना गाममां, तथा संगमखेट नामना गाममां जिनेश्वरप्रभुनी प्रतिमाओसहित बे जिनमंदिरोनो जीर्णोद्धार कराव्यो हतो. ॥ २२ ॥

**अणहिल्लपुरे लक्ष्म्यास्तिलकं श्रेयसां निधिः । स्वगुरोर्वसतिर्येनोद्दध्रे भक्तिशुभात्मना ॥ २३ ॥**

अन्वयः-भक्ति शुभ आत्मना येन अणहिल्लपुरे लक्ष्म्याः तिलकं, श्रेयसां निधिः स्व गुरोः वसतिः उद्दध्रे. ॥ २३ ॥

अर्थः—शुभ भक्तिवंत आत्मावाळा एवा जे आह्लादन दंडनायके अणहिल्लपुरपाटणमां लक्ष्मीना तिलकसरखा, तथा कल्याणना भंडारसरखा पोताना गुरुमहाराजना उपाश्रयनो उद्धार कर्यो हतो. ॥ २३ ॥

**लेखयत्यमलज्ञानदानभृत्पुस्तकानि यः । अगण्यपुण्यलक्ष्म्याप्त्यै शासनानीव सर्वदा ॥ २४ ॥**

अन्वयः—यः अगण्य पुण्य लक्ष्मी आप्त्यै सर्वदा शासनानि इव, अमल ज्ञान दान भृत् पुस्तकानि लेखयति. ॥ २४ ॥

अर्थः—( वळी ) जेणे असंख्य पुण्योनी लक्ष्मीनी प्राप्तिमाटे हमेशां फरमानसरखां, निर्मल ज्ञान आपनारां ( जैनधर्मनां ) पुस्तको लखावेलां छे. ॥ २४ ॥

**प्रासादः शुशुभे येनोद्धृतः श्रीवासुपूज्ययुक् । पत्तनस्य पुरो राज्ञो रत्नवानिव शेखरः ॥ २५ ॥**

अन्वयः-पत्तनस्य पुरः राज्ञः रत्नवान् शेखरः इव येन उध्धृतः श्रीवासुपूज्य युक् प्रासादः शुशुभे. ॥ २५ ॥

अर्थः—अणहिल्लपुरपाटणरूपी राजानो जाणे रत्नजडेलो मुकुट होय नही! एवो जे आ आह्लादन दंडनायके जीर्णोद्धार करेलो श्रीवासुपूज्यप्रभुनो प्रासाद शोभी रहेलो छे. ॥ २५ ॥

**अमेयं स्पृहयञ्छ्रेयः श्रीमदाह्लादनो गुरुम् । श्रीवर्धमानसूरिं स भक्त्याभ्यार्थितवानिति ॥ २६ ॥**

अन्वयः—अमेयं श्रेयः स्पृहयन् सः श्रीमत् आह्लादनः भक्त्या गुरुं श्रीवर्धमानसूरिं इति अभ्यर्थितवान्. ॥ २६ ॥

अर्थः—अगणित कल्याणने इच्छनारा ते श्रीमान् आह्लादन दंडनायके भक्तिभावथी गुरुमहाराज श्रीवर्धमानसूरिजीने एवी प्रार्थना करीके,

**जीर्णोद्धार इहाणहिल्लनगरे श्रीवासुपूज्यप्रभोः, प्रासादस्य मया भवद्वचनतः स्वश्रेयसे कारितः । यूयं तच्चरितस्य पुण्यघटनां कुर्वीत जीर्णोध्धृतिं, कृत्येऽस्मिन्निपुणा यतो गणधराः स्युः सूत्रधारा ध्रुवम् ॥ २७ ॥**

अन्वयः—इह अणहिल्लनगरे मया भवत् वचनतः स्व श्रेयसे श्रीवासुपूज्य प्रभोः प्रासादस्य जीर्ण उद्धारः कारितः, यूयं तत् चरितस्य पुण्य घटनां जीर्ण उध्धृतिं कुर्वीत? यतः अस्मिन् कृत्ये ध्रुवं गणधराः सूत्रधाराः निपुणाः स्युः ॥ २७ ॥

अर्थ—आ अणहिल्लपुरपाटणमां में आप साहेबना उपदेशथी, मारां कल्याणमाटे श्रीवासुपूज्यप्रभुना प्रासादनो जीर्णोद्धार कराव्यो छे, तो हवे आप ते श्रीवासुपूज्यप्रभुना चरित्रनो पवित्र घटनावाळो (रचनावाळो) जीर्णोद्धार करो? केमके आ कार्यमां खरेखर मुनिसमुदायना अग्रेसर सूत्रधारो (सलाटो—पक्षे—जैन आगमो जाणनारा आप सरखा सूरिवरो) निपुण (समर्थ) होय छे. ॥ २७॥

**ततोऽसौ निधिनिध्यर्कसंख्ये ( १२९९ ) विक्रमवत्सरे । आचार्यश्चरितं चक्रे वासुपूज्यविभोरिदम् ॥ २८ ॥**

अन्वयः—ततः असौ आचार्यः निधि निधि अर्क संख्ये (१२९९) विक्रम संवत्सरे वासुपूज्य विभोः इदं चरित्रं चक्रे. ॥ २८ ॥

अर्थः—एवीरीतनी ते आह्लादनदंडाधिपतिनी प्रार्थनाथी ते श्रीवर्धमानसूरिनामना आचार्यमहाराजे विक्रम संवत् बारसो नवाणुं (१२९९) मां श्रीवासुपूज्यप्रभुनुं आ चरित्र रच्युं. ॥ २८ ॥

**चतुरा वाचयन्त्वेतद् वृद्धा व्याख्यां नयन्त्वपि । शब्दप्रमाणसाहित्यागमज्ञाः शोधयन्तु च ॥ २९ ॥**

अन्वयः—एतत् चतुराः वाचयंतु, वृद्धाः व्याख्यां अपि नयंतु, च शब्द प्रमाण सहित्य आगम ज्ञाः शोधयंतु ? ॥ २९ ॥

अर्थः—आ चरित्रने बुद्धिशाली विद्वानो वांचो ? ज्ञानवृद्धो तेनी व्याख्या पण करो ? अने व्याकरण, न्याय, साहित्य अने आगमना जाणकारो शुद्ध करो ? (एम कही प्रशस्तिकारे आ ग्रंथनी योग्यरीते अति गहनता जणावी छे, अने ते योग्यज छे.) ॥ २९ ॥

**यावत्पूर्वाङ्गणेऽस्मिन्नसमतमतमोगोमयालेपनार्द्रे, सायं संध्यापुरन्ध्री स्फुरदुडुकुसमे मुञ्चतीन्दुप्रदीपम् । प्रातःश्रीः सांध्यरागप्रसृमरघुसृणे भानुकुम्भं च तुष्ट्यै, धर्माधीशस्य तावज्जिनचरितमिदं सङ्घलोके मुदे स्तात्**

अन्वयः—असमतम तमः गोमय आलेपन आर्द्रे, स्फुरत् उडु कुसुमे पूर्वा अंगणे सायं संध्या पुरंध्री यावत् इंदु प्रदीपं मुंचति च, प्रातःश्रीः सांध्य राग प्रसृमर घुसृणे (पूर्वा अंगणे) तुष्ट्यै भानु कुंभ (मुंचति) तावत् धर्म अधीशस्य इदं जिन चरितं संघलोके मुदे स्तात्.

अर्थः—अतुल्य अंधकाररूपी गोमयना आलेपनथी भीनाशवाळां, तथा स्फुरायमान थयेला ताराओरूपी पुष्पोवाळां पूर्व दिशारूपी आंगणामां सायंकाळनी संध्यारूपी सौभाग्यवंती स्त्री ज्यांसुधी चंद्ररूपी दीपकने मूके छे, तथा प्रभातकाळनी लक्ष्मी संध्याना

(लाल) रंगरूपी विस्तीर्ण केसरना छटकाववाळां (ते पूर्वदिशारूपी आंगणामां) मंगलिकमाटे सूर्यरूपी कुंभने मूके छे, त्यांसुधी धर्माधिपति एवा आ श्रीवासुपूज्य प्रभुनुं चरित्र संघना लोकोमां आनंद करनारुं थाओ ? ॥ ३० ॥

**सर्वाक्षरगणनायां जयति श्रीवासुपूज्यचरितमिदम् । वेदनिधिवेदबाणा (५४६४) नीताङ्क ग्रन्थसंपूर्णम् ।३१।**

अन्वयः-इदं श्रीवासुपूज्य चरितं सर्व अक्षर गणनायां वेद निधि वेद बाण आनीत अंक ग्रंथ संपूर्ण. ॥ ३१ ॥

अर्थः—आ श्रीवासुपूज्यप्रभुना चरित्रनो विस्तार, सर्व अक्षरो गणवाथी पांच हजार चारसो चोराणुं (५४९४) श्लोक प्रमाणनो थाय छे.

॥ इतिश्रीवासुपूज्य चरित्रं समाप्तम् ॥

## अथास्य ग्रंथस्य सान्वयगूर्जरभाषांतरकर्तुः प्रशस्तिः ॥

**अत्रास्ति जामनगरं नगरं गरिष्ठं । यस्मिन् जिनेशनिलयोपरिगा पताका ॥**
**ऋद्धिं पुरस्य किल दर्शयितुं द्युलोकं । लोलानिलेन लुलिताह्वयतीव रेजे. ॥ १ ॥**

अन्वयः-अत्र जामनगरं गरिष्ठं नगरं अस्ति, यस्मिन् जिन ईश निलय उपरिगा पताका किल पुरस्य ऋद्धिं द्युलोकं दर्शयितु लोल अनिलेन लुलिता आह्वयति इव रेजे. ॥ १ ॥

अर्थः—आ भरतक्षेत्रमां आवेला ( काठीयावाड नामना देशमां समुद्रना किनारापर उत्तरतरफ ) जामनगर नामनुं म्होटुं नगर

छे, के जेनी अंदर रहेलां जिनेश्वरप्रभुना मंदिरपर रहेली पताका खरेखर ते नगरनी समृद्धि देवलोकने देखाडवामाटे, चपल वायुथी उडतीथकी जाणे बोलावती होय नही! तेम शोभी रहेली छे. ॥ १ ॥

तत्रौशजातिवणिजां मुकुटोपमस्तु । वंशो बभूव किल लालणनामधेयः ॥
तद्वंशमौक्तिकनिभोऽत्र बभूव चेभ्यः । श्रीवर्धमान इति नामविमंडितो वै. ॥ २ ॥

अन्वयः—तु तत्र ओश जाति वणिजां किल मुकुट उपमः लालणनामधेयः वंशः बभूव. च अत्र वै तत् वंश मौक्तिक निभः श्रीवर्धमानः इति नाम विमंडितः इभ्यः बभूव. ॥ २ ॥

अर्थः—हवे ते जामनगरमां ओशवाळ ज्ञातिना वणिकोमां खरेखर मुकुट समान लालण नामनो वंश (गोत्र) विद्यमान छे. अने त्यांज खरेखर ते वंशमां मुक्ताफलनीपेठे शोभता, अने "श्रीवर्धमान" एवा नामथी अलंकृत थयेला महाधनाढ्य शाहुकार थया. (आ श्रीवर्धमानशाहनो विस्तीर्ण वृत्तांत श्रीअमरसागरसूरिजीए रचेला "श्रीवर्धमान पद्मसिंह चरित्र" नामना ग्रंथमां जणावेलो छे.)

विरचितमिह तेन मंदिरैक–मधिगततुंगतया तिरस्कृताद्रि ॥
अगणितवसुना जिनेशबिंबैः । प्रवरतरैः परिमंडितं मनोज्ञं. ॥ ३ ॥

अन्वयः—इह तेन, अधिगत तुंगतया तिरस्कृत अद्रि. प्रवरतरैः जिनेश बिंबैः परिमंडितं, मनोज्ञं मंदिर एकं अगणित वसुना विरचितं.

अर्थः—आज जामनगरमां ते श्रीवर्धमानशाहे, प्राप्त करेली उंचाइथी पर्वतनो पण तिरस्कार करनारुं, तथा अतिमनोहर जिनप्रतिमा-

ओवडे शोभितुं एक मनोहर (फरता बावन जिनालयोवाळुं) जिनमंदिर अगणित द्रव्य खरचीने बंधावेलुं छे. ॥ ३ ॥

**तस्य कोटिध्वजस्याभूत् । सुपुत्रश्च कलान्वितः, ॥ नाम्ना जगडुशाहश्च । चंद्रवत्तापवर्जितः ॥ ४ ॥**

अन्वयः–च तस्य कोटिध्वजस्य कलान्वितः, च चन्द्रवत् ताप वर्जितः, नाम्ना " जगडुशाहः " सुपुत्रः अभूत्. ॥ ४ ॥

अर्थः–पछी ते कोटिध्वज वर्धमानशाहशेठना कळाओथी युक्त थयेला, अने चंद्रनीपेठे संतापविनाना " जगडुशाह " नामे उत्तम पुत्र थया. ॥ ४ ॥

**तस्याभूद्धनभाजस्तु । पुत्रो गोवर्धनाह्वयः ॥ धनधान्यैश्च संपूर्णः । पुत्रादिपरिवारभाक् ॥ ५ ॥**

अन्वयः–तु धनभाजः तस्य, धन धान्यैः संपूर्णः, च पुत्र आदि परिवारभाक् " गोवर्धन " आह्वयः पुत्रः अभूत्. ॥ ५ ॥

अर्थः—पछी ते धनवान जगडुशाहना धन अने धान्योवडे भरेला, तथा पुत्र आदिकना परिवारवाळा " गोवर्धन " (गोधाशाह) नामना पुत्र थया. ॥ ५ ॥

**बभूवास्यांगजो रम्यो । नाम्ना वल्लभजित् खलु ॥ कच्छदेशे च मंत्रित्वं । प्राप्तं तेन ततादरं ॥ ६ ॥**

अन्वयः—अस्य " वल्लभजित्" नाम्ना रम्यः अंगजः बभूव, च तेन खलु कच्छदेशे तत आदरं मंत्रित्वं प्राप्तं ॥ ६ ॥

अर्थः–ते गोवर्धनशाहना " वल्लभ(म)जि " नामना मनोहर पुत्र थया, अने तेमणे खरेखर कच्छदेशमां विस्तीर्ण आदरसत्कारवाळुं ( त्यांना राजानुं ) मंत्रिपद मेळव्युं हतुं. ॥ ६ ॥

**दृष्ट्वा तस्य हि चातुर्यं । भूमिपालोऽर्पयद्धरां ॥ वर्षैके सततं लक्ष–मुद्रिकामूल्यधारिणीं, ॥ ७ ॥**

अन्वयः–हि तस्य चातुर्यं दृष्ट्वा भूमिपालः वर्ष एके सततं लक्ष मुद्रिका मूल्य धारिणीं धरां अर्पयत्. ॥ ७ ॥

अर्थः–खरेखर (मंत्रिकार्यमां) ते वल्लभजीशाहनी हुशीयारी जोइने (ते कच्छ देशना) राजाए, दरवर्षे निरंतर एकलाख कोरीनी उपज आपनारी जमीन (इनामतरीके) अर्पण करेली छे. (के जेनी उपज, तथा तेमनी इमारतो हाल पण कच्छ मांडवीमां "गोधावल्लभजीना" गरासना नामथी प्रसिद्ध छे, तथा त्यां वसता तेमना वंशजो हाल पण जैन संघमां अग्रपद भोगवे छे.) ॥ ७ ॥

**तस्य तु लालचंद्राख्यः । पुत्रः सन्मानितो जनैः ॥ धनराजश्च तत्पुत्रो । धर्मकार्यरतः सदा ॥ ८ ॥**

अन्वयः–तु तस्य जनैः सन्मानितः लालचंद्र आख्यः पुत्रः, च सदा धर्म कार्य रतः तत् पुत्रः धनराजः. ॥ ८ ॥

अर्थः—पछी ते वल्लभजीशाहना लोकोथी सन्मान पामेला "लालचंद्र" नामना पुत्र थया, तथा हमेशां धर्मकार्यमां लीन थयेला तेमना "धनराज" नामे पुत्र थया. ॥ ८ ॥

**श्रेष्ठी ज्येष्ठाह्वयश्चासीत् । तनुजस्तस्य शोभितः ॥ यस्य नाम विदेशेषु । प्रसिद्धं शुभकार्यतः. ॥ ९ ॥**

अन्वयः–च तस्य शोभितः तनुजः ज्येष्ठ आह्वयः श्रेष्ठी आसीत्, यस्य नाम शुभ कार्यतः विदेशेषु प्रसिद्धं जातं. ॥ ९ ॥

अर्थः—पछी ते धनराजशाहना पुत्र जेठाशाहनामना शेठ थया, के जेमनुं नाम (तेमणे करेलां) शुभ कार्योथी परदेशोमां पण प्रसिद्ध थयेलुं छे. ॥ ९ ॥

सत्यं श्राद्धव्रतं तेन । द्वितीयं परिपालितं ॥ यावज्जीवं तथा त्यक्तं । श्रेयसे रात्रिभोजनं. ॥ १० ॥

अन्वयः–तेन यावत् जीवं सत्यं द्वितीयं श्राद्धव्रतं परिपालितं, तथा श्रेयसे रात्रिभोजनं त्यक्तं, ॥ १० ॥

अर्थः–ते जेठाशाहे छेक जीवितपर्यंत सत्यवचन बोलवारूप श्रावकनुं बीजुं अणुव्रत पाळयुं हतुं, तथा पोताना आत्मकल्याणमाटे तेमणे रात्रिभोजननो पण त्याग कर्यो हतो. ॥ १० ॥

तस्य सूनवरसामजिदाह्वो । राजमान्य इव वारिधिदेशः ॥
रत्नमौक्तिकमणिप्रकराढ्यो–ऽत्राभवत्सुकमलापरिवृत्तः ॥ ११ ॥

अन्वयः—तस्य अत्र वारिधि देशः इव, राजमान्यः रत्न मौक्तिक मणि प्रकर आढ्यः, सुकमला परिवृत्तः सूनुवर सामजित् आह्वः अभवत्. ॥ ११ ॥

अर्थः–ते जेठाशाहना आ जामनगरमां महासागरना प्रदेशनीपेठे राजना सन्मानवाळा (पक्षे–चंद्रना सन्मानवाळा) रत्नो, मोती, तथा मणिओना समूहनी समृद्धिवाळा, तथा उत्तम लक्ष्मीथी अलंकृत थयेला "सामजीशाह" नामे उत्तम पुत्र थया. ॥ ११ ॥

हंसराज इति नामतोऽभवत् । तस्य सूनुरमितैर्गुणैर्युतः ॥
जैनशास्त्रवरस्वारिधौ मनो । मीनतामभजदस्य सर्वदा. ॥ १२ ॥

अन्वयः—तस्य अमितैः गुणैः युतः "हंसराजः" इति नामतः सूनुः अभवत्, अस्य मनः सदा जैन शास्त्र वर वारिधौ मीनतां अभजत्.
अर्थः—ते सामजीशाहना प्रमाणरहित (घणा) गुणोवाळा "हंसराज" नामे पुत्र थया, अने तेमनुं हृदय हमेशां जैनशास्त्रोरूपी उत्तम महासागरमां मत्स्यनीपेठे अवगाहन करी रहेलुं छे, (अर्थात् ते जैनशास्त्रोनां उंचा प्रकारना ज्ञानवाळा छे.) ॥ १२ ॥

**रचितं तस्य पुत्रेण । हीरालालाह्वयेन हि ॥ ग्रंथस्यास्य बुधेशानां । हृच्चमत्कारकारिणः ॥ १३ ॥**

**इदं भाषांतरं रम्यं । गूर्जराख्योरुभाषया ॥ ऋतुसिद्धिनिधींद्वब्दे । सान्वयं वैक्रमीयके ॥ १४ ॥युग्मं ॥**

अन्वयः—हीरालाल आह्वयेन तस्य पुत्रेण हि बुध ईशानां हृत् चमत्कार कारिणः अस्य ग्रंथस्य, गूर्जराख्य उरु भाषया इदं सान्वयं रम्यं भाषांतरं वैक्रमीयके ऋतु सिद्धि निधि इंदु अब्दे (१९८६) रचितं. ॥ १३ ॥ १४ ॥ युग्मं ॥
अर्थः—ते हंसराजशाहना हीरालाल नामना पुत्रे खरेखर विद्वानोना हृदयमां चमत्कार उपजावनरा आ "श्रीवासुपूज्य चरित्र महाकाव्य" नामना ग्रंथनुं गूजरातीनामनी भाषामां आ तेना संस्कृत भाषाना अन्वयसहित मनोहर भाषांतर विक्रम संवत् ओगणीससो छयासी (१९८६) मां रचेलुं छे. ॥ १३ ॥ १४ ॥ युग्मं ॥

हीरालालकवेश्चास्य, चत्वारः सूनवो ध्रुवं । राजंते जयिनो नित्यं । विष्णोरिव चतुर्भुजाः ॥ १ ॥ प्रथमो विठ्ठलजिदाख्यो, मनःसुखो द्वितीयकः । तृतीयो बालचंद्राख्यो, जयसिंहश्चतुर्थकः ॥ २ ॥ ब्राह्मीलक्ष्म्याविवातुल्य—बुद्धिरूपसमन्विते । ललिताकांताख्यातेऽस्य, तनये अपि राजतः ॥ ३ ॥ षडप्येतदपत्यानि, राजंते विदुषोऽस्य हि । जडावाख्योरुभार्यायाः, कुक्षिजातान्यनुक्रमात् ॥

ज्येष्ठविठ्ठलजितत्पुत्रौ, चंपकामीयकाभिधौ । राजेते बाल्यभावोरु–क्रीडनोद्यमतत्परौ ॥ ५ ॥ दुहितरस्त्रयस्तस्य राजंतेऽतिमनोहराः ॥ कविता चंदना चैव । धीरजाख्याश्च विश्रुताः ॥ ६ । मनःसुखस्य पुत्र्येका । मंजुलाख्याथ राजते । बाल्यक्रीडनतः पित्रो–रमंदानंददायिनी ॥ ७ ॥ पुत्र्येका बालचंद्रस्य, विद्यते कमलाभिधा । अमला राजहंसीव, पक्षद्वयविराजिता ॥ ८ ॥ राजते जयसिंहस्य, तनयो बाल्यमंडितः । नाम्ना विनोदलालश्च, कुटुंबस्य प्रमोदकः ॥ ९ । राजेते ललितायाश्च, द्वे अपत्ये कुलोज्ज्वले, चंद्रावतीति पुत्रीह । संपल्लालश्च नंदनः ॥ १० ॥ पुत्रपौत्रप्रपौत्रोरु–दौहित्रपरिवारभाक् । राजते हंसराजोऽद्य, पिताप्येवं कवीशितुः ॥ ११ ॥

लब्ध्वायदाननकजोक्तिमधूरुसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥

संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः. ॥१५॥

वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोकारिणां धुर्यं । रम्यं चारित्रमाश्रितं. ॥ १६ ॥ युग्मं ॥

आ श्रीचारित्रविजयजी महाराज न्यायांभोनिधि तपागच्छाधिराज श्रीविजयानंदसूरीश्वरजीना महान् शिष्य हता.

॥ समाप्तोऽयं सान्वयस्य गूर्जर भाषांतरोपेतस्य श्रीवासुपूज्यचरित्रस्याष्टमो भागः तत्समाप्तौ समाप्तश्चायं ग्रंथः ॥ श्रीरस्तु ॥

॥ इति श्रीवासुपूज्यचरित्रे अष्टमोभागः समाप्तः ॥